www.thearyasamaj.org




# भाषाप्रवेशः

## प्रथमः भागः

संस्कृतभारती
नवदेहली

www.thearyasamaj.org

## भवताम् अध्ययनस्य अनुकूलतायै संस्कृतभारत्या सज्जीकृताः सन्ति अन्येऽपि बहवः ग्रन्थाः । यथा -

भाषाभ्यासाय -

• अभ्यासपुस्तकम् • विभक्तिवल्लरी • शतृशानजन्तमञ्जरी • अभ्यासदर्शिनी • सम्भाषणसोपानम् • कालबोधिनी • णत्वणिजन्तम् • सन्देशसंस्कृतम् • सम्भाषणसंस्कृतम् (ध्वनिमुद्रिकासहितम्) • प्रयोगाः (ध्वनिमुद्रिकासहितम्)

भाषाज्ञानवर्धनाय -

• समासः • सन्धिः • कारकम् • शुद्धिकौमुदी • भाषापाकः • इड्व्यवस्था • धातुरूपनन्दिनी • तिङ्कृत्कोषः - १ • प्रक्रियानुसारी पाणिनीयधातुपाठः • तिङ्कृत्कोषः - २ • इडागमः • पाणिनीयमूलधातुपाठः • सनाद्यन्तधातुपाठः • अष्टाध्यायीसूत्रपाठः

विचारशक्तिवर्धनाय -

• परिष्कारः • संस्कृतभारती • परिवर्तनम् • सङ्क्रमणम् • उत्तिष्ठत मा स्वप्त • सप्तदशी • पूर्णाङ्कं प्रति • ज्ञानदीप्तिः • सावधानाः स्याम

संस्कारवर्धनाय -

• सुगन्धः • पञ्चतन्त्रकथाः • शृण्वन्तु कथाम् एताम् • प्रेरणादीपः • हे मनः ! समाश्वासितु

प्रेरणायै, मनोविनोदाय भाषाभ्यासाय च -

• Pride of India (आङ्ग्लभाषया) • भारतीयविज्ञानपरम्परा • साार्थः • धर्मश्रीः • आवरणम् • वंशवृक्षः • अनाथोऽसि पुत्र ! • भुवमानीता भगवद्भाषा । • ऋणविमुक्तिः • युगावतारः इत्यादयः बहवः ग्रन्थाः ।

अभिनयाय -

• नवरूपकम् • कविकोपकलापः • जागरूको भव । • मार्जलस्य मुखं दृष्टम्

श्रवणसुखाय भाषाभ्यासाय च ध्वनिमुद्रिकाः -

• गीतसंस्कृतम् • गेयसंस्कृतम् • शिशुसंस्कृतम् • हितोपदेशकथाः • अमरकोषः • बालकेन्द्रम् • संवादमाला • बालरञ्जिनी

---

पुस्तकानि ध्वनिमुद्रिकाश्च प्राप्तुं भवतां केन्द्रसंयोजकस्य सम्पर्कं कुर्वन्तु ।

www.thearyasamaj.org

# भाषाप्रवेशः

## प्रथमः भागः

संस्कृतभारती
नवदेहली

www.thearyasamaj.org

प्रकाशनम् -
संस्कृतभारती
मातामन्दिरगली, झण्डेवाला,
नवदेहली - ११० ०५५

© प्रकाशकस्य एव

मुखपुटकला, आन्तरसज्जता च
- महेन्द्रः
साहाय्यम् - शालिनी

प्रथमं मुद्रणम् - २००७ , २५,०००
द्वितीयं मुद्रणम् - २०१२, ५,०००

*मुद्रणम्* -
वागर्थ
न.रा. कालोनी, बेङ्गलूरु - १९

ISBN 978- 81-87276-36-3

**BHAASHAA PRAVESHAH - I** A Textbook to learn Samskrit at Samskrita Shikshana Kendra written by various authors.
Publisher - **SAMSKRITA BHARATI**, Mata Mandir Gali, Jhandewala, New Delhi - 110 055. Ph: (011) 23517689. Website - www.samskrita-bharati.org
Pages - vi + 202 Rs.130/- Second Print - Dec - 2012
Printed at - **Vagartha,** N. R. Colony, Bangalore - 560 019

www.thearyasamaj.org

# भाषाप्रवेशः

## प्रथमः भागः

सम्पादकसमितिः

डा॰ चाँदकिरण सलूजा

डा॰ विश्वासः

सुधीष्टकुमार मिश्रः

गिरीशचन्द्र तिवारी

एम्. वि. मोहनः

संस्कृतभारती

नवदेहली

www.thearyasamaj.org

प्रियशिक्षार्थिनः !

संस्कृताध्ययनं कर्तुम् उत्सुकानां भवतां हार्दं स्वागतम् । 'मया संस्कृताध्ययनं करणीयम्' इति भवन्तः यं सङ्कल्पं कृतवन्तः सः अमूल्यः अस्ति । संस्कृताध्ययनेन जीवने कीदृशः लाभः भविष्यति इति अग्रे भवन्तः एव अनुभविष्यति । सङ्कल्पं कृतवतां भवतां हार्दम् अभिनन्दनम् ।

सम्भाषणशिबिरे भागग्रहणेन भवन्तः संस्कृतभाषायाः स्वल्पं परिचयं प्राप्नुवन्ति । ततः अग्रिमम् अभ्यासं भाषाप्रवेशे कर्तुं शक्नुवन्ति । सोपानक्रमेण भवतां ज्ञानवर्धनाय कौशलविकासाय च अत्रत्याः पाठाः सज्जीकृताः सन्ति । प्रतिपाठम् आरम्भे दत्तां सूचनां सावधानतया पठन्तु । ततः भवतां शिक्षकस्य मार्गदर्शनम् अनुसृत्य ताः तथैव पालयन्तु । आरम्भदिनेषु उच्चैः पठनं महते लाभाय भवति । अतः यत्र यत्र 'उच्चैः पठन्तु' इति सूचना दत्ता अस्ति तत्र सर्वत्र अवश्यम् उच्चैः पठन्तु । अभ्यासलेखनार्थम् अन्यस्य पुस्तकस्य आवश्यकता नास्ति । यदि भवतां देवनागरीलिप्याः अधिकः अभ्यासः नास्ति तर्हि तदर्थं संस्कृतभारत्या प्रकाशितानि अन्यानि पुस्तकानि स्वीकृत्य अभ्यासं कर्तुं शक्नुवन्ति । तादृशानाम् अन्येषां बहूनां पुस्तकानां विवरणाय भवतां केन्द्रशिक्षकं संयोजकं वा विचारयन्तु । पाठेषु अभ्यासेषु यदि यत्र कुत्रापि भवतां संशयः भवति तर्हि निस्सङ्कोचतया भवतां शिक्षकं पृष्ट्वा मार्गदर्शनं प्राप्नुवन्तु । प्रतिदिनं संस्कृताभ्यासाय स्वल्पं समयं रक्षन्तु, तस्मिन् समये तदेव कार्यं कुर्वन्तु । तेन भवताम् अध्ययनं व्यवस्थितं भविष्यति ।

भवतां सङ्कल्पः यशस्वी भवतु । संस्कृताध्ययनं सफलं भवतु ।

शुभं भवतु ।

*सम्पादकः*

www.thearyasamaj.org

# अनुक्रमणिका


| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| १. | परिचयः (मम / भवतः / भवत्याः) | १ |
| २. | सः / सा / तत् / एषः / एषा / एतत् | २ |
| ३. | ग्रन्थालयः | ७ |
| ४. | अहम् / भवान् / भवती / त्वम् | ९ |
| ५. | आम् / न / किम् ? | १२ |
| ६. | अस्ति / नास्ति | १३ |
| ७. | अत्र / तत्र / कुत्र / अन्यत्र / सर्वत्र / एकत्र | १४ |
| ८. | षष्ठीविभक्तिः | १५ |
| ९. | पुरतः / पृष्ठतः / वामतः / दक्षिणतः / उपरि / अधः / अन्तः | २४ |
| १०. | आवश्यकम् / मास्तु / पर्याप्तम् / धन्यवादः | २६ |
| ११. | वर्तमानकालः (लट्लकारः) | २७ |
| १२. | कः किं करोति ? | ३५ |
| १३. | आज्ञाप्रार्थनादयः (लोट्लकारः) | ३७ |
| १४. | शरीरावयवाः | ४१ |
| १५. | सङ्ख्याः | ४२ |
| १६. | कः समयः ? | ४४ |
| १७. | क्रियापदस्य विभज्य प्रयोगः | ४६ |
| १८. | सप्तमीविभक्तिः | ५० |
| १९. | कदा ? | ६४ |
| २०. | अद्य / श्वः / परश्वः / प्रपरश्वः / .. | ६६ |
| २१. | भूतकालप्रयोगः (क्तवतु / लङ्लकारः / स्म) | ६८ |
| २२. | प्राणादपि संस्कृतिः श्रेष्ठा | ७७ |
| २३. | उपसर्गाः | ८० |
| २४. | द्वितीयाविभक्तिः | ८६ |
| २५. | गीतोपदेशप्रसङ्गः (क्तवतु) | ९६ |

www.thearyasamaj.org


| | | |
|---|---|---|
| २६ | भविष्यत्कालः (लृट्लकारः) | ९९ |
| २७ | तदा किं किं भविष्यति ? (लृट्लकारः) | १०४ |
| २८ | पञ्चमीविभक्तिः | १०७ |
| २९ | नगरदर्शनं कदा ? (तः - पर्यन्तम्) | ११४ |
| ३० | वारम् / अद्य आरभ्य | ११६ |
| ३१ | शीघ्रम् / मन्दम् / सम्यक् / उच्चैः / शनैः | ११७ |
| ३२ | क्त्वाप्रत्ययान्तानि | ११८ |
| ३३ | अखण्डविश्वासः (क्त्वा–अभ्यासः) | १२१ |
| ३४ | ल्यप्प्रत्ययान्तानि | १२३ |
| ३५ | अव्ययानि (च / अपि / एव / इति / यत्) | १२७ |
| ३६ | चतुर्थीविभक्तिः | १३४ |
| ३७ | किमर्थम् ? | १४४ |
| ३८ | अन्धाय अनन्धाय देहि (अव्ययानि) | १४७ |
| ३९ | अद्यतन / श्वस्तन / पुरातन / इदानन्तन – इत्यादयः | १५४ |
| ४० | किन्तु / निश्चयेन / प्रायशः / खलु / अपेक्षया | १५७ |
| ४१ | तृतीयाविभक्तिः | १५९ |
| ४२ | तुमुन्प्रत्ययान्तानि | १७२ |
| ४३ | अतः | १७६ |
| ४४ | यतः | १७८ |
| ४५ | सम्बोधनम् | १८० |
| ४६ | गर्वभङ्गः (अव्ययानि) | १८३ |
| ४७ | पत्रम् | १९१ |
| ४८ | दशमस्त्वमसि | १९२ |
| ४९ | बालाः श्रद्धया कथां शृण्वन्ति | १९७ |
| ५० | परिशिष्टम् | |

aryasamaj.org



एतत् सङ्गणकम् ।

तत् विमानम् ।



| वस्त्रम् / नारिकेलम् / द्वारम् / व्यजनम् |
|---|

| कन्दुकम् / दूरदर्शनम् / दधि / वारि |
|---|

एतत् वस्त्रम् । ........... ........... । तत् कन्दुकम् । ........... ........... ।

........ .......। ........... ........... । ....... ....... । ........... ........... ।

उच्चैः पठन्तु, लिखन्तु च -




एषः गजः ।    एतौ गजौ ।    एते गजाः ।

एषः अश्वः । एतौ अश्वौ । एते अश्वाः । सः सेनापतिः ।...... ...... । ...... ...... ।

एषः ग्रामः । ...... ...... । ...... ...... । सः शिशुः । तौ शिशू । ते शिशवः ।

एषः सर्पः । ...... ...... । ...... ...... । सः पटुः । ...... ...... । ...... ...... ।

एषः कविः । एतौ कवी । एते कवयः। सः पशुः । ...... ...... । ...... ...... ।

एषः कपिः । ...... ...... ...... ...... । सः पिता । तौ पितरौ । ते पितरः ।

एषः अतिथिः ।...... ...... ...... ...... । सः भ्राता । .... भ्रातरौ । .... भ्रातरः ।

ww.thearyasamaj.org

उच्चैः पठन्तु, लिखन्तु च -




एषा माला । एते माले । एताः मालाः ।

| | | | | | |
|---|---|---|---|---|---|
| एषा वैद्या । | एते वैद्ये । | एताः वैद्याः । | सा नदी । | ते नद्यौ । | ताः नद्यः । |
| एषा भक्ता । | ..... ...... । | ..... ...... । | सा कूपी । | ..... ...... । | ..... ...... । |
| ..... ...... । | एते बालिके । | ..... ...... । | ..... ...... । | ..... ...... । | ताः सूच्यः । |
| ..... ...... । | ..... ...... । | एताः लताः । | ..... ...... । | ते जनन्यौ । | ..... ..... । |
| एषा गतिः । | एते गती । | एताः गतयः । | सा धेनुः । | ते धेनू । | ताः धेनवः । |
| एषा व्यक्तिः । | ..... ...... । | ..... ...... । | सा रज्जुः । | ..... ...... । | ..... ..... । |
| ..... ...... । | एते कृती । | ..... ...... । | सा माता । | ते मातरौ । | ताः मातरः । |

उच्चैः पठन्तु, लिखन्तु च -




एतत् पुष्पम् । एते पुष्पे । एतानि पुष्पाणि ।

| | | | | | |
|---|---|---|---|---|---|
| एतत् फलम् । | एते फले । | एतानि फलानि । | तत् नक्षत्रम् । | ते नक्षत्रे । | तानि नक्षत्राणि । |
| एतत् चक्रम् । | ..... ....... | ..... ...... । | ..... ..... । | ते उपनेत्रे । | ..... ....... । |
| ..... ...... । | एते पुस्तके । | ..... ...... । | तत् पर्णम् । | ..... ....... | ..... ....... । |
| ..... ...... । | ..... ....... | एतानि यानानि । | तत् वारि । | ते वारिणी । | तानि वारीणि । |
| एतत् मुखम् । | ..... ....... | ..... ...... । | ..... ..... । | ते दधिनी । | ..... ....... । |
| ..... ...... । | एते नगरे । | ..... ...... । | तत् वस्तु । | ते वस्तुनी । | तानि वस्तूनि । |

www.thearyasamaj.org

उच्चैः पठन्तु, जानन्तु च –

## अवधेयम्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| अकारान्तः पुंलिङ्गः | बालकः | बालकौ | बालकाः |
| इकारान्तः ,, | कविः | कवी | कवयः |
| उकारान्तः ,, | गुरुः | गुरू | गुरवः |
| ऋकारान्तः ,, | पिता | पितरौ | पितरः |
| आकारान्तः स्त्रीलिङ्गः | बालिका | बालिके | बालिकाः |
| इकारान्तः ,, | मतिः | मती | मतयः |
| ईकारान्तः ,, | नदी | नद्यौ | नद्यः |
| उकारान्तः ,, | धेनुः | धेनू | धेनवः |
| ऊकारान्तः ,, | वधूः | वध्वौ | वध्वः |
| ऋकारान्तः ,, | माता | मातरौ | मातरः |
| अकारान्तः नपुंसकलिङ्गः | वनम् | वने | वनानि |
| इकारान्तः ,, | वारि | वारिणी | वारीणि |
| उकारन्तः ,, | वस्तु | वस्तुनी | वस्तूनि |

## अभ्यासः

1. कोष्ठकयोः शब्दान् स्वीकृत्य उदाहरणानुसारं वाक्यानि रचयन्तु –

| | |
|---|---|
| एषः, एतौ, एते / सः, तौ, ते<br>एषा, एते, एताः / सा, ते, ताः<br>एतत्, एते, एतानि / तत्, ते, तानि | नर्तक्यः, गीतम्, आभरणानि, उपन्यासः, जनभाषा, पात्रे, कूप्यः, मापिके, प्रकोष्ठौ, कण्ठः, गुलिकाः, तालाः, स्नुषा, कपयः, सेवकाः, गुरुः, मतिः, लोकयानानि, दधि, ग्रामाः, पर्णानि, घट्यौ, श्लोकाः, अभ्यासाः, सूच्यः, शाटिका, आसनम्, माला, वस्त्रे, वधूः, संस्कृतगृहम् |

एषः उपन्यासः । ______ ______

______ ______ ______

______ ______ ______

______ ______ ______

______ ______ ______

www.thearyasamaj.org

उदाहरणानुसारं वाक्यानि रचयन्तु –

कौ के
कः का
के
काः
किम्
के
कानि

वीराः सर्पः
लेखकाः
धेनुः लेखनी
नगरम्
सूत्राणि कुञ्चिकाः
बुद्धिः
मयूरः व्यजनानि

के वीराः ?

www.thearyasamaj.org

# ३ ग्रन्थालयः



एषः ग्रन्थालयः । एतौ ग्रन्थपालौ । एते ग्रन्थाः ।
एषा कपाटिका । एते उत्पीठिके । एताः पत्रिकाः ।
एतत् सूचनाफलकम् । एते वातायने । एतानि व्यजनानि ।

सः उपन्यासः । तौ लेखौ। ते श्लोकाः ।
सा कविता । ते कथे । ताः वार्ताः ।
तत् महाभारतम् । ते काव्ये । तानि नाटकानि ।

## अभ्यासः

1. पाठं दृष्ट्वा रिक्तस्थानानि पूरयन्तु -

| | | |
|---|---|---|
| .............. ग्रन्थालयः । | .......... ग्रन्थपालौ । | .............. ग्रन्थाः । |
| ............. कपाटिका । | .......... उत्पीठिके । | ............ पत्रिकाः । |
| ......... सूचनाफलकम् । | ........... वातायने । | ........... व्यजनानि । |
| .............. उपन्यासः । | .............. लेखौ । | ............ श्लोकाः । |
| ................ कविता । | ............... कथे । | .............. वार्ताः । |
| ............ महाभारतम् । | ............. काव्ये । | ........... नाटकानि । |

www.thearyasamaj.org

उच्चैः पठन्तु, जानन्तु च -

| | एक. | द्वि. | बहु. | एक. | द्वि. | बहु. | एक. | द्वि. | बहु. |
|---|---|---|---|---|---|---|---|---|---|
| पु. | एषः | एतौ | एते | सः | तौ | ते | कः | कौ | के |
| स्त्री. | एषा | एते | एताः | सा | ते | ताः | का | के | काः |
| नपुं. | एतत् | एते | एतानि | तत् | ते | तानि | किम् | के | कानि |

2. एतानि रूपाणि पठित्वा एतेषाम् उत्तराणां प्रश्नवाक्यानि लिखन्तु -

यथा - एषः ग्रन्थालयः । एषः कः ?

१. एते छात्राः । .................. ?
२. एतत् मन्दिरम् । .................. ?
३. एताः सञ्चिकाः । .................. ?
४. एतौ सहोदरौ । .................. ?
५. एषा सखी । .................. ?
६. एते बान्धवाः । .................. ?
७. सः सचिवः । .................. ?
८. तानि पर्णानि । .................. ?
९. ते नक्षत्रे । .................. ?
१०. तौ कार्यालयौ । .................. ?
११. ताः विज्ञापिकाः । .................. ?
१२. सा वृद्धा । .................. ?

## ४

*अहम् / भवान् / भवती / त्वम्*

पश्यन्तु, उच्चैः पठन्तु च -



अहं गायकः ।



आवां गायकौ ।



वयं गायकाः ।



त्वं सैनिकः ।



युवां सैनिकौ ।



यूयं सैनिकाः ।

www.thearyasamaj.org



भवान् शिक्षकः । भवन्तौ शिक्षकौ । भवन्तः शिक्षकाः ।

भवती छात्रा । भवत्यौ छात्रे । भवत्यः छात्राः ।

## अभ्यासः

उदाहरणं दृष्ट्वा रिक्तस्थानं पूरयन्तु -

| | | |
|---|---|---|
| १. अहं सैनिकः । | आवां.................. । | वयं ...... ......... । |
| २. अहं................ । | ................. नेतारौ । | ........... ......... । |
| ३. .......... अधिवक्ता । | ........... ............ । | ........... ......... । |
| ४. अहं कविः । | ........... ............ । | वयं कवयः । |
| ५. अहं शिशुः । | ........... ............ । | ............ ........ । |
| ६. अहं ............... । | ........... ........ साधू । | ............ ........ । |

एतानि रूपाणि पुनःपुनः उच्चैः पठन्तु -

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| अकारान्तः पुंलिङ्गशब्दः | युवकः | युवकौ | युवकाः |
| ,, ,, | घटः | घटौ | घटाः |
| ,, ,, | मयूरः | मयूरौ | मयूराः |
| इकारान्तः पुंलिङ्गशब्दः | कविः | कवी | कवयः |
| ,, ,, | मुनिः | मुनी | मुनयः |
| ,, ,, | ध्वनिः | ध्वनी | ध्वनयः |

www.thearyasamaj.org

| | | | |
|---|---|---|---|
| उकारान्तः पुंलिङ्गशब्दः | शिशुः | शिशू | शिशवः |
| ,, ,, | गुरुः | गुरू | गुरवः |
| ऋकारान्तः पुंलिङ्गशब्दः | भ्राता | भ्रातरौ | भ्रातरः |
| ,, ,, | पिता | पितरौ | पितरः |
| ,, ,, | कर्ता | कर्तारौ | कर्तारः |
| इकारान्तः स्त्रीलिङ्गशब्दः | मतिः | मती | मतयः |
| ,, ,, | तिथिः | तिथी | तिथयः |
| ईकारान्तः स्त्रीलिङ्गशब्दः | नदी | नद्यौ | नद्यः |
| ,, ,, | भगिनी | भगिन्यौ | भगिन्यः |
| उकारान्तः स्त्रीलिङ्गशब्दः | धेनुः | धेनू | धेनवः |
| ,, ,, | रज्जुः | रज्जू | रज्जवः |
| ऊकारान्तः स्त्रीलिङ्गशब्दः | वधूः | वध्वौ | वध्वः |
| ऋकारान्तः स्त्रीलिङ्गशब्दः | माता | मातरौ | मातरः |
| इकारान्तः नपुंसकलिङ्गशब्दः | दधि | दधिनी | दधीनि |
| उकारान्तः नपुंसकलिङ्गशब्दः | वस्तु | वस्तुनी | वस्तूनि |

## अभ्यासः

1. उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु -

| | | | |
|---|---|---|---|
| १. | भवान् वैद्यः । | भवन्तौ .................... । | भवन्तः वैद्याः । |
| २. | ...................... । | .................... सेवकौ । | .................... सेवकाः । |
| ३. | ...................... । | .......................... । | .................... रक्षकाः । |
| ४. | भवान् श्रोता । | भवन्तौ श्रोतारौ । | भवन्तः श्रोतारः । |
| ५. | भवान् वक्ता । | .......................... । | .......................... । |
| ६. | ...................... । | भवन्तौ दातारौ । | .......................... । |
| ७. | भवान् कविः । | .......................... । | .......................... । |
| ८. | ...................... । | भवन्तौ अतिथी । | .......................... |
| ९. | ...................... । | .......................... । | भवन्तः गुरवः । |
| १०. | ...................... । | भवन्तौ पटू । | .......................... । |
| ११. | भवती महिला । | भवत्यौ.................... । | भवत्यः.................... । |

www.thearyasamaj.org

| | | | |
|---|---|---|---|
| १२. | ........................ । | ............... शिक्षिके । | ........................ । |
| १३. | ........................ । | ........................ । | भवत्यः नायिकाः । |
| १४. | भवती भगिनी । | ........................ । | ........................ । |
| १५. | भवती माता । | ........................ । | ........................ । |
| १६. | ........................ । | भवत्यौ वध्वौ । | ........................ । |
| १७. | त्वं भक्तः । | युवां.................. । | यूयं.................. । |
| १८. | ........................ । | युवाम् अर्चकौ । | ........................ । |
| १९. | त्वं कविः । | ........................ । | ........................ । |
| २०. | ........................ । | ........................ । | यूयं साधवः । |

## 2. उचितशब्दयोः संयोजनेन वाक्यं रचयन्तु -

उदा १. त्वं लेखिका ।

२. ........................................

३. ........................................

४. ........................................

५. ........................................

६. ........................................

७. ........................................

८. ........................................

| | |
|---|---|
| १. त्वं | शिक्षकाः |
| २. आवाम् | ऋषयः |
| ३. वयम् | भगिन्यौ |
| ४. युवाम् | भारतीयः |
| ५. अहम् | छात्रौ |
| ६. भवन्तौ | भ्रातरौ |
| ७. यूयम् | लेखिका |
| ८. भवन्तः | तरुण्यः |

## 2. कोष्ठके विद्यमानानां रूपाणां साहाय्येन रिक्तस्थानं पूरयन्तु -

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| १. | अहम् | आवाम् | वयम् | ३. | भवान् | भवन्तौ | भवन्तः |
| २. | त्वम् | युवाम् | यूयम् | ४. | भवती | भवत्यौ | भवत्यः |

| | | |
|---|---|---|
| १. अहं शिशुः । | आवां शिशू । | वयं .................. । |
| २. .......... गायिका । | ...................... । | ...................... । |
| ३. ........... प्राचार्यः । | ...................... । | ...................... । |
| ४. ........... तरुणी । | ...................... । | ...................... । |

www.thearyasamaj.org

# ५

आम् / न / किम् ?

*उच्चैः पठन्तु -*



एषः बालकः किम् ?
आम्, एषः बालकः ।

सः गजः किम् ?
आम्, सः गजः ।





एषा अजा किम् ?
न, एषा महिषी ।

तत् लोकयानं किम् ?
न, तत् विमानम् ।



## अभ्यासः

1. कोष्ठकस्थं चिह्नं दृष्ट्वा उचितानि वाक्यानि लिखन्तु -

| | | | | |
|---|---|---|---|---|
| भगतसिंहः | देशभक्तः | ✓ | राजनेता | ✗ |
| सुधाकरः | छात्रः | ✓ | वैद्यः | ✗ |
| प्रतिभा | समाजसेविका | ✗ | शिक्षिका | ✓ |
| गणेशः | चित्रकारः | ✓ | कर्मकरः | ✗ |
| विवेकानन्दः | शिक्षकः | ✗ | अधिवक्ता | ✓ |
| अब्दुलकलामः | वैज्ञानिकः | ✓ | सैनिकः | ✗ |

उदा० - १. भगतसिंहः देशभक्तः किम् ? आम्, भगतसिंहः देशभक्तः । सः राजनेता न ।

२. सुधाकरः छात्रः किम् ? ........................ । ........................ ।

३. ........................? ........................ । ........................ ।

४. ........................ ? ........................ । ........................ ।

५. ........................ ? ........................ । ........................ ।

६. ........................ ? ........................ । ........................ ।

www.thearyasamaj.org



## *अस्ति / नास्ति*



वृक्षः अस्ति ।
फलं नास्ति ।



क्रीडाङ्गणम् अस्ति ।
क्रीडकः नास्ति ।

## अभ्यासः

1. कोष्ठकस्थं चिह्नं दृष्ट्वा 'किम् अस्ति, किं नास्ति' इति लिखन्तु –

| | | | |
|---|---|---|---|
| मार्जालः | ✓ | द्रोणी | ✗ |
| गन्धवर्तिका | ✗ | सैनिकः | ✓ |
| उत्पीठिका | ✗ | शाटिका | ✓ |
| चित्रम् | ✓ | फेनकम् | ✗ |
| वस्त्रम् | ✗ | पादरक्षा | ✗ |
| कूपी | ✓ | शिरस्त्राणम् | ✓ |

| | |
|---|---|
| १. मार्जालः अस्ति । | २. ............................ । |
| ३. ............................ । | ४. ............................ । |
| ५. ............................ । | ६. ............................ । |
| ७. ............................ । | ८. ............................ । |
| ९. ............................ । | १०. ............................ । |
| ११. ............................ । | १२. ............................ । |

## प्रहेलिका

अस्थि नास्ति शिरो नास्ति बाहुरस्ति निरङ्गुलिः ।
नास्ति पादद्वयं गाढम् अङ्गमालिङ्गति स्वयम् ।।

(किं तत् इति कथयतु यस्य अस्थि नास्ति, शिरः नास्ति, बाहुद्वयम् अस्ति, अङ्गुलिः नास्ति, पादौ न स्तः, परन्तु शरीरं दृढम् आलिङ्गति ?)

उत्तरम् - युतकम्

www.thearyasamaj.org

# ७

*अत्र / तत्र / कुत्र ? / अन्यत्र / सर्वत्र / एकत्र*

## पश्यन्तु, उच्चैः पठन्तु च -







बालकः कुत्र अस्ति ?
बालकः अत्र अस्ति ।

बालिका कुत्र अस्ति ?
बालिका तत्र अस्ति

शिक्षकः - उद्यानं कुत्र अस्ति ?
छात्राः - उद्यानम् अत्र अस्ति ।
शिक्षकः - बालः कुत्र अस्ति ?
छात्राः - बालः तत्र अस्ति ।
शिक्षकः - कन्दुकं कुत्र अस्ति ?
छात्राः - कन्दुकम् अत्र नास्ति ।
शिक्षकः - वायुः कुत्र अस्ति ?
छात्राः - वायुः अत्र अस्ति, वायुः तत्र अस्ति, वायुः अन्यत्र अस्ति ।
शिक्षकः - वायुः सर्वत्र अस्ति ।



बालिकाः एकत्र उपविशन्ति ।

बालकाः एकत्र उपविशन्ति ।

## अभ्यासः











## रिक्तस्थानानि पूरयन्तु -

१. स्यूतः अत्र अस्ति ।
२. लेखनी .................. ।
३. वायुः सर्वत्र अस्ति ।
४. मन्त्री अन्यत्र अस्ति ।

५. चषकः तत्र अस्ति ।
६. घटी ...................... ।
७. देवः ...................... ।
८. पर्वतः ...................... ।

www.thearyasamaj.org

# ८ षष्ठीविभक्तिः

पश्यन्तु, उच्चैः पठन्तु च -



शिवः



गणेशः

शिवस्य पुत्रः गणेशः ।



पार्वती शिवः

पार्वत्याः पतिः शिवः ।



सीता रामः

सीतायाः पतिः रामः ।



भारतम्

भारतस्य राजधानी देहली ।

१. विवेकानन्दस्य गुरुः रामकृष्णः ।
२. देशस्य नाम भारतम् ।
३. अर्जुनस्य आयुधं गाण्डीवम् ।
४. कौसल्यायाः पतिः दशरथः ।
५. पत्रिकायाः नाम सम्भाषणसन्देशः ।
६. नद्याः नाम गङ्गा ।
७. कादम्बर्याः लेखकः बाणभट्टः ।
८. पुस्तकस्य नाम बालतोषिणी ।
९. रामायणस्य कर्ता वाल्मीकिः ।
१०. गृहस्य नाम कृष्णसदनम् ।

## अवधेयम्

गणेशः - गणेशस्य
सीता - सीतायाः
पार्वती - पार्वत्याः
वाहनम् - वाहनस्य

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| बालकः - बालकस्य | बालकयोः | बालकानाम् |
| महिला - महिलायाः | महिलयोः | महिलानाम् |
| नदी - नद्याः | नद्योः | नदीनाम् |
| फलम् - फलस्य | फलयोः | फलानाम् |

www.thearyasamaj.org

### उच्चैः पठन्तु -

१. हरेः पत्नी लक्ष्मीः ।
२. गिर्योः मध्ये सूर्योदयः शोभते ।
३. कवीनां कृतिः काव्यम् ।
४. अभिमन्योः पिता अर्जुनः ।
५. साध्वोः शीघ्रं मैत्री भवति ।
६. साधूनां दर्शनं पुण्यम् ।
७. पितुः आज्ञा पालनीया ।
८. सुभद्रा भ्रात्रोः प्रिया भगिनी ।
९. भ्रातॄणां वात्सल्यम् अनुपमम् ।
१०. वारिणः संरक्षणं कर्तव्यम् ।

## अवधेयम्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| गिरिः - | गिरेः | गिर्योः | गिरीणाम् |
| गुरुः - | गुरोः | गुर्वोः | गुरूणाम् |
| कर्ता - | कर्तुः | कर्त्रोः | कर्तॄणाम् |
| वारि - | वारिणः | वारिणोः | वारीणाम् |
| मधु - | मधुनः | मधुनोः | मधूनाम् |

### उच्चैः पठन्तु -

१. आपत्काले बुद्धेः परीक्षा भवति ।
२. तत्र द्वयोः पङ्क्त्योः मध्ये स्थानं नास्ति ।
३. संस्कृते सूक्तीनां महत्त्वम् अस्ति ।
४. रज्जोः अग्रभागं गृह्णातु ।
५. आञ्जनेयस्य हन्वोः प्रहारः आसीत् ।
६. तत्र धेनूनां समूहः तिष्ठति ।
७. वध्वाः आगमनेन गृहं सुशोभितम् ।
८. दशरथः वधूनां स्वागतं कृतवान् ।
९. गणेशः मातुः भक्तः ।
१०. मातॄणां वचनानि हिताय एव भवन्ति ।

## अवधेयम्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| मतिः - | मत्याः / मतेः | मत्योः | मतीनाम् |
| रज्जुः - | रज्ज्वाः / रज्जोः | रज्ज्वोः | रज्जूनाम् |
| वधूः - | वध्वाः | वध्वोः | वधूनाम् |
| माता - | मातुः | मात्रोः | मातॄणाम् |

www.thearyasamaj.org

*षष्ठीविभक्तिः – सर्वनामशब्दाः*



एतस्य नाम शिवराजः ।



एतस्याः नाम मीराबायी ।




एतस्य नाम रामायणम् ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| एतद्-शब्दः पुंलिङ्गे नपुंसकलिङ्गे च | एतस्य | एतयोः | एतेषाम् |
| एतद्-शब्दः स्त्रीलिङ्गे | एतस्याः | एतयोः | एतासाम् |
| तद्-शब्दः पुंलिङ्गे नपुंसकलिङ्गे च | तस्य | तयोः | तेषाम् |
| तद्-शब्दः स्त्रीलिङ्गे | तस्याः | तयोः | तासाम् |
| अस्मद्-शब्दः त्रिषु लिङ्गेषु | मम | आवयोः | अस्माकम् |
| युष्मद्-शब्दः त्रिषु लिङ्गेषु | तव | युवयोः | युष्माकम् |

## अभ्यासः

1. आवरणे विद्यमानयोः शब्दयोः साहाय्येन वाक्यानि रचयन्तु –

१. वसुदेवः - देवकी (पतिः - पत्नी) वसुदेवस्य पत्नी देवकी, देवक्याः पतिः वसुदेवः ।

२. रामकृष्णः - विवेकानन्दः (गुरुः - शिष्यः)

..............................................................................

३. दाशरथिः - वैदेही (पतिः - पत्नी)

..............................................................................

४. जमदग्निः - रेणुका (पतिः - पत्नी)

..............................................................................

५. अभिमन्युः - सुभद्रा (पुत्रः - माता)

..............................................................................

www.thearyasamaj.org

3. आवरणे विद्यमानस्य शब्दस्य षष्ठीविभक्तिरूपेण रिक्तस्थानानि पूरयन्तु -

| | |
|---|---|
| यथा - १. भारतस्य राजधानी देहली । | (भारतम्) |
| २. ...................... राजधानी श्रीनगरम् । | (काश्मीरम्) |
| ३. ...................... राजधानी जयपुरम् । | (राजस्थानम्) |
| ४. ......................... चञ्चलतां पश्यतु । | (कपिः) |
| ५. .................... मनः प्रशान्तं भवति । | (मुनिः) |
| ६. ........................ वाक्यानि स्मरन्तु । | (गुरुः) |
| ७. सः बालकः ...................... प्रियः । | (पिता) |
| ८. युद्धे ............. अतीव आनन्दः भवति । | (जेता) |
| ९. ........................... स्नेहः अतुलः । | (माता) |
| १०. ........................... ध्वनिः मधुरः । | (वीणा) |
| ११. .............................. गतिः वक्रा । | (नदी) |
| १२. ....................... मूल्यम् अधिकम् । | (वस्तु) |

4. उदाहरणानुसारं वाक्यानि रचयन्तु -




यथा - वसुदेवस्य पुत्रः कृष्णः ।

........................................ ।

........................................ ।

........................................ ।

........................................ ।

........................................ ।

........................................ ।

........................................ ।

www.thearyasamaj.org

5. उदाहरणानुसारं वाक्यानि रचयन्तु -

| | | | | |
|---|---|---|---|---|
| हिमालयः | ← | गिरिः | → | विन्ध्याचलः |
| सन्देशः | ← | पत्रिका | → | चन्दमामा |
| सरस्वती | ← | देवी | → | अन्नपूर्णा |
| रामायणम् | ← | ग्रन्थः | → | हर्षचरितम् |

गिरेः नाम हिमालयः । गिरेः नाम विन्ध्याचलः ।

.................................. । .................................. ।

.................................. । .................................. ।

.................................. । .................................. ।

6. उदाहरणानुसारं वाक्यानि रचयन्तु -

उदा - (देशौ) देशयोः मध्ये युद्धं मा भवतु ।

१. (हस्तौ) .................................. संयोजनेन अञ्जलिः भवति ।
२. सः (गुरू) ..................................आशीर्वादं प्राप्नोति ।
३. (भ्रातरौ) ..................................कलहेन भगिनी खिन्ना भवति ।
४. (वाहने) .................................. घट्टनेन दुर्घटना भवति ।
५. श्रीकृष्णः (सेने) ........................ मध्ये अर्जुनस्य रथं स्थापयति ।
६. अद्य (कवी)..................................सम्माननकार्यक्रमः अस्ति ।
७. मम (भगिन्यौ) ..................................निवासः ग्रामे अस्ति ।
८. कौरवाः - पिता - धृतराष्ट्रः कौरवाणां पिता धृतराष्ट्रः ।
९. पाण्डवाः - रक्षकः - कृष्णः .................................. ।
१०. भारतीयाः - धर्मः - सनातनः .................................. ।
११. वयम् - भाषा - संस्कृतम् .................................. ।
१२. नद्यः - जीवनं - परोपकारार्थम् .................................. ।
१३. भाषा - जननी - संस्कृतम् .................................. ।

www.thearyasamaj.org

### 7. आवरणे विद्यमानस्य शब्दस्य षष्ठीविभक्तिरूपेण रिक्तस्थानानि पूरयन्तु -

१. मयूराः .......... ...................... (मेघाः) गर्जनम् इच्छन्ति ।
२. पण्डितः ............ ................... (नाटकानि) रचनां करोति ।
३. बृहस्पतिः ............................... (देवाः) गुरुः अस्ति ।
४. सज्जनाः ........... .................... (सूक्तयः) स्मरणं कुर्वन्ति ।
५. गोपालकः ......... ....................... (धेनवः) पालनं करोति ।
६. पिता ............ .................. (वस्तूनि) गणनां करोति ।
७. वयं ............................... (कार्यकर्तारः) वचनं शृणुमः ।
८. अहं ............ ................. (गुरवः) सेवां करोमि ।
९. सभायां ....... ....................... (वाद्यानि) ध्वनिः अधिकः अस्ति ।
१०. माता ....... ....................... (अपत्यानि) पालनं करोति ।

### 8. कोष्ठकस्थैः उचितपदैः रिक्तस्थानानि पूरयन्तु -

१. वयं प्रतिदिनं .................. ........ जीवनचरित्रं पठामः ।
२. तेषां .................................... कविताः रमणीयाः सन्ति ।
३. विवेकानन्दस्य .......................... पठनेन स्फूर्तिः लभ्यते ।
४. तयोः .................. ................ मैत्री जगत्प्रसिद्धा ।
५. ........................................ अनुसरणेन जीवने अनुशासनं भवति ।
६. ........................................ मध्ये सहकारभावः आवश्यकः ।
७. ........................................ ऐक्यं न सुलभम् ।
८. अद्यत्वे .................. .............. जलं कलुषितं भवति ।
९. गोपालकः .................. ........... पालनं करोति ।
१०. .................. .................. आज्ञा पालनीया ।

| |
|---|
| धेनूनाम् |
| नियमानाम् |
| महापुरुषाणाम् |
| गुरूणाम् |
| नदीनाम् |
| कवीनाम् |
| वचनानाम् |
| मित्रयोः |
| मतीनाम् |
| कार्यकर्तॄणाम् |

www.thearyasamaj.org

9. बन्धुवाचकपदानि पठन्तु, वाक्यानि पूरयन्तु च -

| | | | | |
|---|---|---|---|---|
| १. | पितुः पिता | पितामहः | लवः - दशरथः | लवस्य पितामहः दशरथः । |
| २. | पितुः माता | पितामही | लवः - कौसल्या | ............................ । |
| ३. | मातुः पिता | मातामहः | कुशः - जनकः | ............................ । |
| ४. | मातुः माता | मातामही | कुशः - सुमेधा | ............................ । |
| ५. | पुत्रस्य पुत्रः | पौत्रः | दशरथः - लवः | ............................ । |
| ६. | पुत्र्याः पुत्रः | दौहित्रः | जनकः - कुशः | ............................ । |
| ७. | सहोदरस्य पत्नी | भ्रातृजाया | लक्ष्मणः - सीता | ............................ । |
| ८. | पत्युः सहोदरः | देवरः | सीता - लक्ष्मणः | ............................ । |
| ९. | पत्न्याः सहोदरः | श्यालः | अर्जुनः - धृष्टद्युम्नः | ............................ । |
| १०. | पत्युः भगिनी | ननान्दा | रुक्मिणी - सुभद्रा | ............................ । |
| ११. | पितुः सहोदरः | पितृव्यः | अर्जुनः - धृतराष्ट्रः | ............................ । |
| १२. | मातुः सहोदरः | मातुलः | दुर्योधनः - शकुनिः | ............................ । |
| १३. | भगिन्याः पुत्रः | भागिनेयः | कंसः - कृष्णः | ............................ । |
| १४. | पितृव्यस्य पत्नी | पितृव्या | अर्जुनः - गान्धारी | ............................ । |
| १५. | मातुलस्य पत्नी | मातुलानी | अभिमन्युः - रुक्मिणी | ............................ । |

10. स्वस्य बान्धवानां सम्बन्धे ५ वाक्यानि रचयन्तु -

............................................................ ।

............................................................ ।

............................................................ ।

............................................................ ।

............................................................ ।

11. एतत् सुभाषितं पठन्तु, रिक्तस्थानानि पूरयन्तु च -

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो
ज्ञानस्योपशमो कुलस्य विनयो वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपसः क्षमा बलवतां धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ।।

www.thearyasamaj.org

१. ऐश्वर्यस्य विभूषणं सुजनता ।
२. ...............विभूषणं वाक्संयमः ।
३. ................ विभूषणम् उपशमः ।
४. ............ विभूषणं ............ ।
५. ...............विभूषणं पात्रे व्ययः ।
६. तपसः विभूषणं .................. ।
७. .................... विभूषणं क्षमा ।
८. ........... विभूषणं ............ ।
९. .................. विभूषणं शीलम् ।

12. चित्रे वृक्षस्य मूलं, फलं च दृष्ट्वा सङ्ख्याम् अनुसृत्य कस्य मूलस्य किं फलम् इति लिखन्तु ।




१२३४५६७ ८९१०

१. (त्यागः) त्यागस्य फलं सन्तोषः ।
२. (पठनम्) ----------------------------------------
३. (अतिभोजनम्) ----------------------------------------
४. (आशा) ----------------------------------------
५. (भक्तिः) ----------------------------------------
६. (योगासनम्) ----------------------------------------
७. (हिंसा) ----------------------------------------
८. (परोपकारः) ----------------------------------------
९. (सेवा) ----------------------------------------
१०. (परिश्रमः) ----------------------------------------

www.thearyasamaj.org

13. एतानि सुभाषितानि उच्चैः पठन्तु -

पुण्यस्य फलमिच्छन्ति पुण्यं नेच्छन्ति मानवाः ।
फलं पापस्य नेच्छन्ति पापं कुर्वन्ति यत्नतः ।

(जनाः पुण्यस्य फलम् इच्छन्ति, किन्तु पुण्यकार्याणि कर्तुं न इच्छन्ति ।
पापस्य फलं न इच्छन्ति, किन्तु प्रयत्नेन पापकार्याणि कुर्वन्ति । )

हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम् ।
श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम् ।।

(दानकरणम् एव हस्तस्य भूषणम् । सत्यभाषणम् एव कण्ठस्य भूषणम् ।
शास्त्रश्रवणम् एव कर्णस्य भूषणम् । अतः अन्यैः आभरणैः किमपि प्रयोजनं नास्ति ।)

पापानां शोधकं नित्यं परानन्दस्य बोधकम् ।
रोचकं चित्तवृत्तीनां भजध्वं नाम मङ्गलम् ।।

(भगवतः नाम पापानां शोधनं करोति । महानन्दं बोधयति ।
चित्तवृत्तीनां रोचकं भवति । अतः तत् सेवनीयम् ।)

**अभ्यासः**

14. एतेषु श्लोकेषु विद्यमानानि षष्ठीविभक्तिरूपाणि अत्र लिखन्तु -

---------------------- ---------------------- ----------------------

---------------------- ---------------------- ----------------------

---------------------- ---------------------- ----------------------

15. षष्ठीविभक्तिरूपाणि उपयुज्य पञ्च वाक्यानि रचयन्तु -

----------------------------------------------------------------------

----------------------------------------------------------------------

----------------------------------------------------------------------

----------------------------------------------------------------------

----------------------------------------------------------------------

www.thearyasamaj.org

# ९

*पुरतः / पृष्ठतः / वामतः / दक्षिणतः*
*उपरि / अधः / अन्तः*



एषा कक्ष्या । कक्ष्यायाम् अध्यापिका पाठयति । अध्यापिकायाः पुरतः छात्राः सन्ति । अध्यापिकायाः पृष्ठतः भित्तिः अस्ति । अध्यापिकायाः दक्षिणतः आसन्दः अस्ति । अध्यापिकायाः वामतः मानचित्रम् अस्ति । कक्ष्यायाम् उत्पीठिका अपि अस्ति । उत्पीठिकायाः उपरि पुस्तकम् । पुस्तकस्य उपरि लेखनी । पुस्तकस्य अधः उत्पीठिका । उत्पीठिकायाः अधः अवकरिका अस्ति । पाठनं कक्ष्यायाः अन्तः प्रचलति ।

## अवधेयम्

**पुरतः, पृष्ठतः, दक्षिणतः, वामतः, उपरि, अधः, अन्तः इत्येतेषां योगे षष्ठीविभक्तिः प्रयुज्यते ।**

## अभ्यासः

### I. उपरि दत्तं चित्रं दृष्ट्वा लिखन्तु –

१. अध्यापिका केषां पुरतः अस्ति ? ................................................ ।
२. भित्तिः कुत्र अस्ति ? ................................................ ।
३. उत्पीठिका कस्याः उपरि अस्ति ? ................................................ ।
४. पुस्तकं कस्याः अधः अस्ति ? ................................................ ।
५. लेखनी कस्य उपरि अस्ति ? ................................................ ।

www.thearyasamaj.org

६. मानचित्रं कस्याः वामतः अस्ति ? ................................................ ।

७. आसन्दः कस्याः दक्षिणतः अस्ति ? .............................................. ।

८. शिक्षणं कस्याः अन्तः प्रचलति ? ................................................ ।

## 2. उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु –

१. बालकस्य पुरतः शकटः अस्ति । (बालकः)
२. .................... पृष्ठतः गृहाणि सन्ति । (उद्यानम्)
३. .................... उपरि फलानि सन्ति । (वृक्षः)
४. वाक्यं .................... उपरि लिखितम् अस्ति । (कृष्णफलकम्)
५. कृष्णफलकं .................... दक्षिणतः अस्ति । (द्वारम्)
६. .................... पृष्ठतः भावचित्रं नास्ति । (छात्राः)
७. भावचित्रम् .................... वामतः अस्ति । (अध्यापकः)
८. नेत्रे .................... उपरि स्तः । (नासिका)
९. नासिका .................... अधः अस्ति । (नेत्रे)
१०. नासिका .................... उपरि अस्ति । (ओष्ठः)
११. जलं .................... अन्तः अस्ति । (कूपी)
१२. मण्डूकः .................... अन्तः अस्ति । (जलम्)
१३. .................... अन्तः कोऽपि नास्ति । (प्रकोष्ठः)
१४. लेखनी .................... अन्तः न आसीत् ? (स्यूतः)
१५. मीनः .................... अन्तः तरति ? (किम्)
१६. ते .................... वामतः दक्षिणतः च नारिकेलसस्यम् आरोपयन्ति । (विद्यालयः)
१७. पुस्तकालयः .................... दक्षिणतः अस्ति, वामतः न । (नदी)
१८. पुस्तकं .................... पृष्ठतः अस्ति, पुरतः न । (लेखनी)
१९. बालकाः .................... अधः सन्ति, उपरि न । (वृक्षः)
२०. कः ............................. अन्तः अस्ति ? (पाकशाला)

www.thearyasamaj.org

# १०

*आवश्यकम् / मास्तु / पर्याप्तम्*
*धन्यवादः / स्वागतम्*

## उच्चैः पठन्तु, अवगच्छन्तु च -

माता - नलिनि ! सुनयने ! भोजनार्थम् आगच्छताम् ।
नलिनी - भोजने किं किम् अस्ति ?
माता - ओदनम् अस्ति, शाकम् अस्ति, मधुरम् अस्ति ।
सुनयना - मातः ! अन्नं परिवेषयतु ।
माता - नलिनि ! किम् आवश्यकम् ?
नलिनी - किञ्चित् शाकम् आवश्यकम् ।
माता - सुनयने ! दधि आवश्यकं किम् ?
सुनयना - दधि मास्तु, अवलेहं परिवेषयतु ।
माता - अन्यत् किम् आवश्यकम् ?
नलिनी - किमपि मास्तु, पर्याप्तम् ।
सुनयना - मम अपि पर्याप्तम् ।
दिनेशः - *(प्रविश्य)* हरिः ओम् । सुनयना अस्ति किम् ?
सुनयना - दिनेश ! आगच्छतु, स्वागतम् । भोजनं करोतु ।
दिनेशः - मास्तु । भवत्याः विज्ञानपुस्तकं मम आवश्यकम् ।
सुनयना - स्वीकरोतु ।
दिनेशः - धन्यवादः ।
सुनयना - स्वागतम् ।

**अभ्यासः**

### 1. उदाहरणं दृष्ट्वा उचितं पदं स्वीकृत्य रिक्तस्थानं पूरयन्तु -

यथा - प्रातः जागरणम् आवश्यकं भवति । आवश्यकम् । (आवश्यकम् / मास्तु)
१. गुरोः आज्ञापालनम् .............................. अस्ति । (आवश्यकं / मास्तु)
२. अधिकं भोजनं .............................. । (आवश्यकं / मास्तु / पर्याप्तम्)
३. बालकस्य उचितं नामकरणम् ...................... । (आवश्यकं / मास्तु )
४. ज्येष्ठानां निन्दनं .................................... । (आवश्यकं / मास्तु)
५. पुत्र ! ११ वादनं जातं, पठनं ............................ । (आवश्यकं / पर्याप्तम्)

www.thearyasamaj.org

# ११ वर्तमानकालः

लट्लकारः

पश्यन्तु, उच्चैः पठन्तु, अवगच्छन्तु च –



छात्रः पठति ।



छात्रौ पठतः ।



छात्राः पठन्ति ।

| | | |
|---|---|---|
| गायकः गायति । | गायकौ गायतः । | गायकाः गायन्ति । |
| सैनिकः रक्षति । | सैनिकौ रक्षतः । | सैनिकाः रक्षन्ति । |
| मयूरः नृत्यति । | मयूरौ नृत्यतः । | मयूराः नृत्यन्ति । |
| कविः वर्णयति । | कवी वर्णयतः । | कवयः वर्णयन्ति । |
| अतिथिः आगच्छति । | अतिथी आगच्छतः। | अतिथयः आगच्छन्ति । |
| शिशुः क्रीडति । | शिशू क्रीडतः । | शिशवः क्रीडन्ति । |
| शत्रुः प्रहरति । | शत्रू प्रहरतः । | शत्रवः प्रहरन्ति । |
| पिता स्मरति । | पितरौ स्मरतः । | पितरः स्मरन्ति । |
| माता गणयति । | मातरौ गणयतः । | मातरः गणयन्ति । |
| धेनुः चरति । | धेनू चरतः । | धेनवः चरन्ति । |
| मूर्तिः अस्ति । | मूर्ती स्तः । | मूर्तयः सन्ति । |
| पङ्क्तिः अस्ति । | पङ्क्ती स्तः । | पङ्क्तयः सन्ति । |
| भवान् अस्ति । | भवन्तौ स्तः । | भवन्तः सन्ति । |
| भवती पश्यति । | भवत्यौ पश्यतः । | भवत्यः पश्यन्ति । |



अहं लिखामि ।



आवां लिखावः ।



वयं लिखामः ।

| | | |
|---|---|---|
| अहं वदामि । | आवां वदावः । | वयं वदामः । |
| अहं पश्यामि । | आवां पश्यावः । | वयं पश्यामः । |
| अहम् अस्मि । | आवां स्वः । | वयं स्मः । |
| अहं हसामि । | आवां हसावः । | वयं हसामः । |

www.thearyasamaj.org



| त्वं खादसि । | युवां खादथः । | यूयं खादथ । |
| --- | --- | --- |
| त्वं नमसि । | युवां नमथः । | यूयं नमथ । |
| त्वं नयसि । | युवां नयथः । | यूयं नयथ । |
| त्वम् असि । | युवां स्थः । | यूयं स्थ । |

## अभ्यासः

1. उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु –

उदा० – हरिणः धावति । हरिणौ धावतः । हरिणाः धावन्ति ।

१. कविः रचयति । ................................................
२. यानं चलति । ................................................
३. माता पालयति । ................................................
४. पिकः कूजति । ................................................
५. बालः चुटति । ................................................
६. वृक्षः फलति । ................................................
७. महिला जल्पति । ................................................
८. वस्त्रं शुष्यति । ................................................
९. शुकः रटति । ................................................
१०. चोरः चोरयति । ................................................
११. पुष्पं विकसति । ................................................
१२. वानरः आरोहति । ................................................
१३. पिता नयति । ................................................
१४. मशकः दशति । ................................................

www.thearyasamaj.org

१५. कार्यं सिद्ध्यति । ........................................ ........................................

१६. मूर्खः निन्दति । ........................................ ........................................

१७. सौचिकः सीव्यति । ........................................ ........................................

१८. चालकः चालयति । ........................................ ........................................

१९. कृषकः कर्षति । ........................................ ........................................

२०. भगिनी स्निह्यति । ........................................ ........................................

२१. सिंहः गर्जति । ........................................ ........................................

२२. चटकः कूजति । ........................................ ........................................

२३. तक्षकः तक्षति । ........................................ ........................................

२४. कार्यकर्ता सञ्चरति । ........................................ ........................................

२५. वैद्यः चिकित्सति । ........................................ ........................................

## अभ्यासः

2. एतस्य कोष्ठकस्य साहाय्येन १५ वाक्यानि रचयन्तु –

| | | | | | |
|---|---|---|---|---|---|
| बालः | बालौ | बालाः | विस्मरति | विस्मरतः | विस्मरन्ति |
| सेवकः | सेवकौ | सेवकाः | भ्रमति | भ्रमतः | भ्रमन्ति |
| भक्तः | भक्तौ | भक्ताः | अर्चति | अर्चतः | अर्चन्ति |
| अतिथिः | अतिथी | अतिथयः | प्रविशति | प्रविशतः | प्रविशन्ति |
| पण्डितः | पण्डितौ | पण्डिताः | चिन्तयति | चिन्तयतः | चिन्तयन्ति |
| साधुः | साधू | साधवः | ध्यायति | ध्यायतः | ध्यायन्ति |

यथा – बालः विस्मरति । बालौ विस्मरतः । बालाः विस्मरन्ति ।

१. ........................................ ........................................ ........................................

२. ........................................ ........................................ ........................................

३. ........................................ ........................................ ........................................

४. ........................................ ........................................ ........................................

५. ........................................ ........................................ ........................................

www.thearyasamaj.org

६
७
८
९
१०
११
१२
१३
१४
१५

## अवधेयम्

| | | | | | | |
|---|---|---|---|---|---|---|
| | बालकः | बालकौ | बालकाः | | | |
| | मित्रम् | मित्रे | मित्राणि | | | |
| | बालिका | बालिके | बालिकाः | | | |
| | भवती | भवत्यौ | भवत्यः | | | |
| | भवान् | भवन्तौ | भवन्तः | | | |
| | सः | तौ | ते | | | |
| | सा | ते | ताः | | | |
| | तत् | ते | तानि | अस्ति | स्तः | सन्ति |
| प्रथमपुरुषः | एषः | एतौ | एते | इच्छति | इच्छतः | इच्छन्ति |
| | एषा | एते | एताः | वदति | वदतः | वदन्ति |
| | मुनिः | मुनी | मुनयः | | | |
| | गुरुः | गुरू | गुरवः | | | |
| | पिता | पितरौ | पितरः | | | |
| | माता | मातरौ | मातरः | | | |
| | व्यक्तिः | व्यक्ती | व्यक्तयः | | | |
| | धेनुः | धेनू | धेनवः | | | |
| | वधूः | वध्वौ | वध्वः | | | |

www.thearyasamaj.org

| | | | | | |
|---|---|---|---|---|---|
| (मध्यमपुरुषः) त्वम् | असि / गच्छसि / वससि | युवाम् | स्थः / गच्छथः / वसथः | यूयम् | स्थ / गच्छथ / वसथ |
| (उत्तमपुरुषः) अहम् | अस्मि / गच्छामि / वसामि | आवाम् | स्वः / गच्छावः / वसावः | वयम् | स्मः / गच्छामः / वसामः |

*वर्तमानकाले विशेषक्रियापदानि*

उच्चैः पठन्तु, जानन्तु च -

प्रथमपुरुषस्य

एकवचनप्रयोगः । यथा -

कः जानाति ?  का करोति ?  भवान् चिनोति ।

एषः क्रीणाति ।  एषा शक्नोति ।  मित्रं प्राप्नोति ।  दाता ददाति ।

सः गृह्णाति ।  सा शृणोति ।  भीरुः रोदिति ।

द्विवचनप्रयोगः । यथा -

कौ जानीतः ?  तौ कुरुतः ।  ते चिनुतः ।

भवत्यौ क्रीणीतः ।  एतौ शक्नुतः ।  मित्रे प्राप्नुतः ।  दातारौ दत्तः ।

मित्रे गृह्णीतः ।  कौ शृणुतः ?  भीरू रुदतः ।

बहुवचनप्रयोगः । यथा -

काः जानन्ति ?  भवन्तः कुर्वन्ति ।  ते चिन्वन्ति ।

एताः क्रीणन्ति ।  भवत्यः शक्नुवन्ति ।  एते प्राप्नुवन्ति ।  दातारः ददति ।

काः गृह्णन्ति ?  मित्राणि शृण्वन्ति ।  के रुदन्ति ?

www.thearyasamaj.org

## अभ्यासः

1. अधस्तनकोष्ठकसाहाय्येन उदाहरणानुगुणं वाक्यानि रचयन्तु -

| | | | | |
|---|---|---|---|---|
| अहं<br>आवाम्<br>वयम् | सेवां | (करोति) | सत्कारं | त्वं<br>युवाम्<br>यूयम् |
| | भजनं | (शृणोति) | प्रवचनं | |
| | वस्त्रं | (चिनोति) | शाकं | |
| | दातुं | (शक्नोति) | ज्ञातुं | |
| | ज्ञानं | (प्राप्नोति) | उद्योगं | |
| | शत्रुं | (गृह्णाति) | चोरं | |
| | भूमिं | (क्रीणाति) | भवनम् | |
| | रामायणं | (जानाति) | महाभारतं | |
| | पीडया | (रोदिति) | भीत्या | |
| | धनं | (ददाति) | भोजनं | |

उदा० -

अहं सेवां करोमि ।
आवां सेवां कुर्वः ।
वयं सेवां कुर्मः ।

त्वं सत्कारं करोषि ।
युवां सत्कारं कुरुथः ।
यूयं सत्कारं कुरुथ ।

*(एतस्य कोष्ठकस्य आधारेण ६० वाक्यानि रचयितुं शक्यन्ते ।)*

www.thearyasamaj.org

## अभ्यासः

### 1. उदाहरणानुगुणं वचनं परिवर्त्य रिक्तस्थानानि पूरयन्तु -

उदा॰- वटुः शास्त्रं शृणोति । वटवः शास्त्रं शृण्वन्ति ।

१. विधाता सर्वं जानाति । विधातारः ..........................

२. वक्ता भाषणं करोति । ..........................

३. पङ्गुः चलितुं शक्नोति । पङ्गवः ..........................

४. मार्जारः मूषकं गृह्णाति । ..........................

५. भगिनी उपायनं क्रीणाति । ..........................

६. बालः क्रीडनकं चिनोति । ..........................

७. विक्रेता दुग्धं ददाति । ..........................

८. युवकः उद्योगं प्राप्नोति । ..........................

९. मित्रं साहाय्यं करोति । ..........................

१०. रुग्णः कष्टेन रोदिति । ..........................

### 2. रिक्तस्थानानि पूरयन्तु -

| ए.व. | ब.व. | ए.व. | ब.व. | ए.व. | द्वि.व. | ए.व. | द्वि.व. |
|---|---|---|---|---|---|---|---|
| करोति | कुर्वन्ति | ........ | गृह्णन्ति | ........ | कुरुतः | गृह्णाति | ........ |
| शृणोति | ........ | ........ | क्रीणन्ति | शृणोति | ........ | ........ | क्रीणीतः |
| ........ | चिन्वन्ति | जानाति | ........ | ........ | चिनुतः | जानाति | ........ |
| प्राप्नोति | ........ | ददाति | ........ | शक्नोति | ........ | ........ | दत्तः |
| शक्नोति | ........ | रोदिति | ........ | ........ | प्राप्नुतः | ........ | रुदतः |

### 3. आवरणात् उचितं क्रियापदं चित्वा रिक्तस्थानानि पूरयन्तु -

१. भवन्तौ विषयं ................ । (जानाति / जानन्ति / जानीतः)

२. ग्राहकौ वस्तु ................ । (क्रीणीतः / क्रीणाति / क्रीणन्ति)

३. आरक्षकौ चोरं ................ । (गृह्णन्ति / गृह्णाति / गृह्णीतः)

४. कर्मकरौ कार्यं ................ । (करोति / कुरुतः / कुर्वन्ति)

५. भगिन्यौ सङ्गीतं ................ । (शृणोति / शृण्वन्ति / शृणुतः)

६. भवत्यौ सर्वत्र गन्तुं ........... । (शक्नुतः / शक्नोति / शक्नुवन्ति)

www.thearyasamaj.org

७. भक्तौ पुष्पं .................... । (चिन्वन्ति / चिनुतः / चिनोति)
८. शिशू उच्चैः .................. । (रोदिति / रुदतः / रुदन्ति)
९. दम्पती मधुरं ................. । (प्राप्नुवन्ति / प्राप्नोति / प्राप्नुतः)

### 4. उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु –

उदा०–

| | | |
|---|---|---|
| १. ग्राहकः वस्तूनि क्रीणाति । | ग्राहकौ वस्तूनि क्रीणीतः । | ग्राहकाः वस्तूनि क्रीणन्ति । |
| २. अलसः निद्रां करोति । | ........... ...... ...... । | ........................... । |
| ३. ...... ...... ...... । | प्रतिनिधी वस्तु चिनुतः । | ........................... । |
| ४. माता भोजनं ददाति । | ......... ...... ...... । | ........................... । |
| ५. ............ ...... । | ......... ...... ...... । | सेनापतयः पुरस्कारं प्राप्नुवन्ति । |
| ६. ...... ...... ...... । | दातारौ दातुं शक्नुतः । | .......... ...... ...... । |
| ७. कार्यकर्ता कार्यं जानाति । | ........... ...... ...... । | ........... ...... ...... । |
| ८. ...... ...... ...... । | .......... ...... ...... । | शिष्याः उपदेशं शृण्वन्ति । |
| ९. दरिद्रः दुःखेन रोदिति । | .......... ...... ...... । | ........................... । |
| १०. ...... ...... ...... । | शिशू कन्दुकं गृह्णीतः । | ........................... । |

## क्रियारञ्जिनी

### 5. अत्र २० क्रियापदानि दत्तानि सन्ति । तेषाम् अन्वेषणं कुर्वन्तु, लिखन्तु च –

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| आ | न | य | ति | व | | वा | प्र |
| क | रो | ति | व | द | दा | ति | क्षा |
| र्ष | | ह | स | ति | | | ल |
| ति | च | ल | ति | ष्ठ | अ | | य |
| उ | प | वि | श | ति | व | ह | ति |
| त्ति | त | | क्नो | वि | त | र | ति |
| ष्ठ | ति | | ति | | र | क्ष | ति |
| ति | त्य | ज | ति | स्ना | ति | | |

| | |
|---|---|
| १. यथा – आरोहति | २. ............... |
| ३. ............ | ४. ............... |
| ५. ............ | ६. ............... |
| ७. ............ | ८. ............... |
| ९. ............ | १०. ............... |
| ११. ............ | १२. ............... |
| १३. ............ | १४. ............... |
| १५. ............ | १६. ............... |
| १७. ............ | १८. ............... |
| १९. ............ | २०. ............... |

www.thearyasamaj.org



# कः किं करोति ?



घटं विनिर्माति कुम्भकारः
पटं च वयति तन्तुवायः ।
नृत्यं करोति नर्तकः
गीतं गायति गायकः ॥



देवम् अर्चति अर्चकः
देशं रक्षति सैनिकः ।
शिक्षां यच्छति शिक्षकः
भिक्षां याचति भिक्षुकः ॥



लेखान् विलिखति लेखकः
यानं चालयति चालकः ।
आपणिकः खलु विक्रीणीते
ग्राहक एषः क्रीणाति ॥



चित्रं रचयति चित्रकारः
वार्तां सज्जयति पत्रकारः ।
भूषां तनोति स्वर्णकारः
लोहं तापयति लोहकारः ॥



वस्तूनि चोरयति ननु चोरः
वार्ताम् आनयति खलु चारः ।
वस्त्राणि सीव्यति सौचिकः
केशान् लुनाति क्षौरिकः ॥

www.thearyasamaj.org

1. अस्मिन् पद्ये यानि क्रियापदानि सन्ति तानि रिक्ते स्थाने लिखन्तु -

| | | |
|---|---|---|
| १. विनिर्माति | २. .................. | ३. .................. |
| ४ .................. | ५. .................. | ६. .................. |
| ७. .................. | ८. .................. | ९. .................. |
| १०. .................. | ११. .................. | १२. .................. |
| १३. .................. | १४. .................. | १५. .................. |
| १६. .................. | १७. .................. | १८. .................. |
| १९. .................. | २०. .................. | |

2. एते किं कुर्वन्ति इति लिखन्तु –

| | |
|---|---|
| यथा - तन्तुवायः | तन्तुवायः पटं वयति । |
| गायकः | ........................................... । |
| सैनिकः | ........................................... । |
| भिक्षुकः | ........................................... । |
| चालकः | ........................................... । |
| पत्रकारः | ........................................... । |
| चारः | ........................................... । |
| स्वर्णकारः | ........................................... । |
| क्षौरिकः | ........................................... । |
| लेखकः | ........................................... । |
| सौचिकः | ........................................... । |

## सुभाषितम्

*यः पठति लिखति पश्यति परिपृच्छति पण्डितानुपाश्रयति ।*
*तस्य दिवाकरकिरणैर्नलिनीदलमिव विकास्यते बुद्धिः ।।*

(यः सर्वदा पठति, लिखति, पश्यति, पण्डितानां सेवनं च करोति तस्य बुद्धिः सूर्यकिरणैः नलिनीपुष्पं यथा विकसति तथा विकसति ।

www.thearyasamaj.org

# आज्ञाप्रार्थनादयः १३

उच्चैः पठन्तु, अवगच्छन्तु च -

*लोट्लकारः*

पुत्रः - अम्ब ! भवती कुत्र गतवती आसीत् ? बहु विलम्बः जातः ।
माता - अद्य अवकाशकारणात् यानानि शीघ्रं न प्राप्यन्ते स्म । अतः विलम्बः ... ।
पुत्रः - भवती श्रान्ता प्रतीयते । किं ददानि ? चायं करवाणि उत पानकम् ?
माता - बहु घर्मः अस्ति । पानकम् एव करोतु ।
पुत्रः - भवती विवृणोतु । अहं निर्मामि ।
माता - मास्तु । अहमेव करोमि ।
पुत्रः - सर्वदा भवती करोति एव । अद्य अहं कर्तुम् इच्छामि ।
माता - अस्तु । तथैव भवतु ।
पुत्रः - शीघ्रं वदतु । भवत्याः विवरणानुगुणम् अहं निर्मामि ।
माता - अस्तु । प्रथमं चषकमितं शीतलं जलं स्वीकरोतु । ततः पञ्चचमसमितां शर्करां जले योजयतु ।
पुत्रः - अग्रे किं करवाणि ?
माता - अधुना जम्बीरं कर्तयतु । जले सम्यक्तया निष्पीडयतु ।
पुत्रः - ततः किम् ?
माता - इदानीं पानकं सिद्धं भोः ! अत्र शीघ्रम् आनयतु ।
अधुना आवां पानकम् आस्वादयाव ।

उच्चैः पठन्तु, अवगच्छन्तु च -

| | | |
|---|---|---|
| भवान् पश्यतु । | भवन्तौ पश्यताम् । | भवन्तः पश्यन्तु । |
| भवान् आगच्छतु । | भवन्तौ आगच्छताम् । | भवन्तः आगच्छन्तु । |
| भवान् स्वीकरोतु । | भवन्तौ स्वीकुरुताम् । | भवन्तः स्वीकुर्वन्तु । |
| भवती पठतु । | भवत्यौ पठताम् । | भवत्यः पठन्तु । |
| भवती उपविशतु । | भवत्यौ उपविशताम् । | भवत्यः उपविशन्तु । |
| त्वं लिख । | युवां लिखतम् । | यूयं लिखत । |
| त्वं वद । | युवां वदतम् । | यूयं वदत । |
| त्वं नय । | युवां नयतम् । | यूयं नयत । |

www.thearyasamaj.org

## अभ्यासः

### 1. उदाहरणानुगुणं वाक्यानि लिखन्तु -

| भवान् | भवती |
|---|---|
| सूचयति | गायति |
| प्रेषयति | चलति |
| त्यजति | मिलति |
| सञ्चरति | तिष्ठति |
| प्रदर्शयति | जानाति |
| दण्डयति | प्रक्षालयति |

उदा - १. भवान् सूचयतु । २. भवती गायतु ।

३. ........................ ४. ........................

५. ........................ ६. ........................

७. ........................ ८. ........................

९. ........................ १०. ........................

११. ........................ १२. ........................

१३. ........................ १४. ........................

### 2. यथोचितेन पदेन योजयन्तु -

| | | | |
|---|---|---|---|
| सन्मार्गं | जयतु | सन्मार्गम् | अनुसरतु । |
| सहयोगं | पश्यतु | ................ | ................ । |
| प्रकृतिं | स्मरतु | ................ | ................ । |
| संस्कृतं | अनुसरतु | ................ | ................ । |
| ध्येयं | ददातु | ................ | ................ |
| भारतं | लसतु | ................ | ................ । |

### 3. कोष्ठके विद्यमानेन उचितक्रियापदेन रिक्तस्थानानि पूरयन्तु -

श्रृणोतु, भवतु, सम्पादयतु, करोतु, निर्मातु
त्यजतु, प्राप्नोतु, साधयतु, सृजतु, प्रदर्शयतु

भवान् / भवती →

| | | | |
|---|---|---|---|
| १. परिश्रमं | .............. । | ६. दुर्गुणं | .............. । |
| २. जागरूकः | .............. । | ७. लक्ष्यं | .............. । |
| ३. प्रवचनं | .............. । | ८. पराक्रमं | .............. । |
| ४. विजयं | .............. । | ९. चित्रं | .............. । |
| ५. शक्तिं | .............. । | १०. नूतनं | .............. । |

www.thearyasamaj.org

## अवधेयम्

| | एकवचनम् | | द्विवचनम् | | बहुवचनम् | |
|---|---|---|---|---|---|---|
| प्र.पु. | भवान् / सः | प्रेषयतु | भवन्तौ / तौ | प्रेषयताम् | भवन्तः / ते | प्रेषयन्तु |
| म.पु. | त्वं | प्रेषय | युवां | प्रेषयतम् | यूयं | प्रेषयत |
| उ.प | अहं | प्रेषयानि | आवां | प्रेषयाव | वयं | प्रेषयाम |

4. उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु -

उदा॰ - भवान् / सः — क्रीड ति, क्रीड तु | भवन्तौ / तौ — क्रीड तः, क्रीड ताम् | भवन्तः / ते — क्रीड न्ति, क्रीड न्तु

| | | | | | |
|---|---|---|---|---|---|
| नमति | ______ | नमतः | ______ | नमन्ति | ______ |
| रक्षति | ______ | रक्षतः | ______ | रक्षन्ति | ______ |
| भ्रमति | ______ | भ्रमतः | ______ | भ्रमन्ति | ______ |

उदा॰ - त्वं — स्मर सि, स्मर – | युवां — स्मर थः, स्मर तम् | यूयं — स्मर थ, स्मर त

| | | | | | |
|---|---|---|---|---|---|
| त्यजसि | ______ | त्यजथः | ______ | त्यजथ | ______ |
| स्पृशसि | ______ | स्पृशथः | ______ | स्पृशथ | ______ |
| कूजसि | ______ | कूजथः | ______ | कूजथ | ______ |

उदा॰ - अहं — हसा मि, हसा नि | आवां — हसा वः, हसा व | वयं — हसा मः, हसा म

| | | | | | |
|---|---|---|---|---|---|
| पचामि | ______ | पचावः | ______ | पचामः | ______ |
| तरामि | ______ | तरावः | ______ | तरामः | ______ |
| भवामि | ______ | भवावः | ______ | भवामः | ______ |

www.thearyasamaj.org

5. पूर्वतनकोष्ठकानुगुणं २० क्रियापदानि चित्वा वाक्यानि रचयन्तु -

१. त्वं वद । २. ................................ ।

३. ............................... । ४. ................................ ।

५. ............................... । ६. ................................ ।

७. ............................... । ८. ................................ ।

९. ............................... । १०. ................................ ।

११. ............................... । १२. ................................ ।

१३. ............................... । १४. ................................ ।

१५. ............................... । १६. ................................ ।

१७. ............................... । १८. ................................ ।

१९. ............................... । २०. ................................ ।

6. 'कुरु / मा कुरु' इति उपयुज्य १५ वाक्यानि लिखन्तु –

यथा - सत्कार्यं कुरु । चौर्यं मा कुरु ।

१ ---------------------- २ ---------------------- ३ ----------------------

४ ---------------------- ५ ---------------------- ६ ----------------------

७ ---------------------- ८ ---------------------- ९ ----------------------

१० ---------------------- ११ ---------------------- १२ ----------------------

१३ ---------------------- १४ ---------------------- १५ ----------------------

7. भवतां गृहे कश्चन अतिथिः आगतवान् इति चिन्तयन्तु । भवान्तः तस्मै किं किं निवेदयिष्यन्ति इति विचिन्त्य १० वाक्यानि लिखन्तु –

१. महोदय ! आगच्छतु २. ------------------------------

३. ------------------------------ ४. ------------------------------

५. ------------------------------ ६. ------------------------------

७. ------------------------------ ८. ------------------------------

९. ------------------------------ १०. ------------------------------

www.thearyasamaj.org

# शरीरावयवाः १४

पठन्तु, अवगच्छन्तु च -




**अभ्यासः**

1. अधोलिखितान् वर्णान् उपयुज्य शरीरावयवानां १० नामानि लिखन्तु –

| | | | | | |
|---|---|---|---|---|---|
| क | का | ट | न | भ्रू | स् |
| ख | ज | टि | ज | : | ध |
| ना | ल | ला | त्र | र | न् |
| सि | भु | पो | ने | द | के |
| पा | उ | ऊ | म् | खः | शा |

१. ....................................... ।
२. ....................................... ।
३. ....................................... ।
४. ....................................... ।
५. ....................................... ।
६. ....................................... ।
७. ....................................... ।
८. ....................................... ।
९. ....................................... ।
१०. ....................................... ।

www.thearyasamaj.org

# १५ सङ्ख्याः

उच्चैः पठन्तु, जानन्तु च -

| | | | | |
|---|---|---|---|---|
| १ एकम् | २१ एकविंशतिः | ४१ एकचत्वारिंशत् | ६१ एकषष्टिः | ८१ एकाशीतिः |
| २ द्वे | २२ द्वाविंशतिः | ४२ द्विचत्वारिंशत् | ६२ द्विषष्टिः | ८२ द्व्यशीतिः |
| ३ त्रीणि | २३ त्रयोविंशतिः | ४३ त्रिचत्वारिंशत् | ६३ त्रिषष्टिः | ८३ त्र्यशीतिः |
| ४ चत्वारि | २४ चतुर्विंशतिः | ४४ चतुश्चत्वारिंशत् | ६४ चतुःषष्टिः | ८४ चतुरशीतिः |
| ५ पञ्च | २५ पञ्चविंशतिः | ४५ पञ्चचत्वारिंशत् | ६५ पञ्चषष्टिः | ८५ पञ्चाशीतिः |
| ६ षट् | २६ षड्विंशतिः | ४६ षट्चत्वारिंशत् | ६६ षट्षष्टिः | ८६ षडशीतिः |
| ७ सप्त | २७ सप्तविंशतिः | ४७ सप्तचत्वारिंशत् | ६७ सप्तषष्टिः | ८७ सप्ताशीतिः |
| ८ अष्ट | २८ अष्टाविंशतिः | ४८ अष्टचत्वारिंशत् | ६८ अष्टषष्टिः | ८८ अष्टाशीतिः |
| ९ नव | २९ नवविंशतिः | ४९ नवचत्वारिंशत् | ६९ नवषष्टिः | ८९ नवाशीतिः |
| १० दश | ३० त्रिंशत् | ५० पञ्चाशत् | ७० सप्ततिः | ९० नवतिः |
| ११ एकादश | ३१ एकत्रिंशत् | ५१ एकपञ्चाशत् | ७१ एकसप्ततिः | ९१ एकनवतिः |
| १२ द्वादश | ३२ द्वात्रिंशत् | ५२ द्विपञ्चाशत् | ७२ द्विसप्ततिः | ९२ द्विनवतिः |
| १३ त्रयोदश | ३३ त्रयस्त्रिंशत् | ५३ त्रिपञ्चाशत् | ७३ त्रिसप्ततिः | ९३ त्रिनवतिः |
| १४ चतुर्दश | ३४ चतुस्त्रिंशत् | ५४ चतुष्पञ्चाशत् | ७४ चतुस्सप्ततिः | ९४ चतुर्नवतिः |
| १५ पञ्चदश | ३५ पञ्चत्रिंशत् | ५५ पञ्चपञ्चाशत् | ७५ पञ्चसप्ततिः | ९५ पञ्चनवतिः |
| १६ षोडश | ३६ षट्त्रिंशत् | ५६ षट्पञ्चाशत् | ७६ षट्सप्ततिः | ९६ षण्णवतिः |
| १७ सप्तदश | ३७ सप्तत्रिंशत् | ५७ सप्तपञ्चाशत् | ७७ सप्तसप्ततिः | ९७ सप्तनवतिः |
| १८ अष्टादश | ३८ अष्टात्रिंशत् | ५८ अष्टपञ्चाशत् | ७८ अष्टसप्ततिः | ९८ अष्टनवतिः |
| १९ नवदश | ३९ नवत्रिंशत् | ५९ नवपञ्चाशत् | ७९ नवसप्ततिः | ९९ नवनवतिः |
| २० विंशतिः | ४० चत्वारिंशत् | ६० षष्टिः | ८० अशीतिः | १०० शतम् |

## अभ्यासः

1. 'कति सन्ति' इति लिखन्तु –

यथा (२) द्वौ हस्तौ ।

(१) .................... शिरः ।
(१) .................... नासिका ।
(२) .................... चित्रे ।
(१०) .................... अङ्गुल्यः ।
(१) .................... मुखम् ।
(२) .................... नेत्रे ।

(२६) .................... दिवसाः ।
(२८) .................... करवस्त्राणि ।
(३२) .................... दन्ताः ।
(३३) .................... स्तम्भाः ।
(३४) .................... सोपानानि ।
(३८) .................... ग्रन्थाः ।
(४२) .................... लेखन्यः ।

www.thearyasamaj.org

| | |
|---|---|
| (१) ....................पत्रिका । | (४४) ......................घटाः । |
| (३) ..................फलानि । | (४८) ..................चमसाः । |
| (४) ..................व्यञ्जनानि । | (५४) ..................चषकाः । |
| (८) ................पर्णानि । | (६४) ................इष्टिकाः । |
| (५) ...............पाञ्चालिकाः । | (७२) ...............नारङ्गफलानि । |
| (७४) ...............पनसफलानि । | (७८) ...............जम्बीराणि । |
| (८०) ...............छात्राः । | (८१) ...............स्थालिकाः । |
| (८२) ...............छायाचित्राणि । | (८३) ...............दर्पणाः । |
| (५०) ...............शिक्षिकाः । | (८४) ...............दीपाः । |
| (८६) ...............द्रोण्यः । | (७०) ...............व्याघ्राः । |
| (८८) ...............वानराः । | (१०) ...............पिपीलिकाः । |
| (९४) ...............विद्युद्दीपाः । | (१२) ...............लोकयानानि । |

*पठित्वा अवगच्छन्तु -*

## *एकतः परार्धपर्यन्तं सङ्ख्याः*

| | |
|---|---|
| १ | एकम् |
| १० | दश |
| १०० | शतम् |
| १००० | सहस्रम् |
| १०००० | अयुतम् |
| १००००० | लक्षम् |
| १०००००० | नियुतम् |
| १००००००० | कोटिः |
| १०००००००० | अर्बुदम् |
| १००००००००० | वृन्दम् |
| १०००००००००० | खर्वः |
| १००००००००००० | निखर्वः |
| १०००००००००००० | शङ्खः |
| १००००००००००००० | पद्मः |
| १०००००००००००००० | सागरः |
| १००००००००००००००० | अन्त्यम् |
| १०००००००००००००००० | मध्यम् |
| १००००००००००००००००० | परार्धम् |

श्लोकं पठन्तु, स्मरन्तु च -

एकं दश शतं चैव सहस्रमयुतं तथा ।
लक्षं च नियुतं चैव कोटिरर्बुदमेव च ।।

वृन्दं खर्वो निखर्वश्च शङ्खः पद्मश्च सागरः ।
अन्त्यं मध्यं परार्धं च दशवृद्ध्या यथाक्रमम् ।।

www.thearyasamaj.org

# १८ कः समयः ?



त्रिवादनम्
(३.००)



सपादपञ्चवादनम्
(५.१५)



सार्धत्रिवादनम्
(३.३०)



पादोनषड्वादनम्
(६.४५)



पञ्चाधिकदशवादनम्
(१०.०५)



दशोनदशवादनम्
(९.५०)



पञ्चोनदशवादनम्
(९.५५)



सार्धनववादनम्
(९.३०)

**अभ्यासः**

1. समयम् अक्षरैः लिखन्तु –

१.०० एकवादनम्
२.३० ..........................
३.४५ ..........................
४.०० ..........................
२.०० ..........................
२.१५ ..........................
३.३० ..........................
४.४५ ..........................
५.३० ..........................
८.०० ..........................

६.०० ..........................
६.४५ ..........................
७.४५ ..........................
९.१५ ..........................
१०.०० ..........................
१०.१५ ..........................
११.०० ..........................
११.१५ ..........................
१२.०० ..........................
१२.३० ..........................

www.thearyasamaj.org

| | |
|---|---|
| ६.०५ पञ्चाधिकषड्वादनम् | ७.१० .............................. |
| ५.५५ पञ्चोनषड्वादनम् | ६.५० .............................. |
| ८.५५ .............................. | ५.४० .............................. |
| १०.१० .............................. | ६.२० .............................. |
| १२.०५ .............................. | ६.२५ .............................. |
| ११.०५ .............................. | ८.३५ .............................. |

## 2. समयम् अङ्कैः लिखन्तु -

| | | | |
|---|---|---|---|
| द्विवादनम् | २.०० | पादोनचतुर्वादनम् | ................ |
| सपादसप्तवादनम् | ................ | पादोन-अष्टवादनम् | ................ |
| पादोनषड्वादनम् | ................ | सपादद्वादशवादनम् | ................ |
| सार्धनववादनम् | ................ | सार्ध-अष्टवादनम् | ................ |
| दशवादनम् | ................ | सपाद-अष्टवादनम् | ................ |
| सपाददशवादनम् | ................ | सार्धद्वादशवादनम् | ................ |
| सार्धदशवादनम् | ................ | पादोन-एकवादनम् | ................ |
| पादोनदशवादनम् | ................ | द्विवादनम् | ................ |

## विशेषसूचना

समयविषये प्रश्नः    कः समयः ?

| | | | |
|---|---|---|---|
| किं समीचीनम् ? | (✔) | किम् असमीचीनम् ? | (✗) |
| द्विवादनम् | (✔) | द्वे वादनम् | (✗) |
| एकं वादनम् | (.......) | एकवादनम् | (✔) |
| चत्वारि वादनम् | (.......) | चतुर्वादनम् | (.......) |
| त्रिवादनम् | (.......) | त्रीणि वादनम् | (.......) |

www.thearyasamaj.org

# १७

## *क्रियापदस्य विभज्य प्रयोगः*

एतानि वाक्यानि सावधानतया पठन्तु, अवगच्छन्तु च –

(१) अध्यापकः चित्रं प्रदर्शयति =
अध्यापकः चित्रस्य *प्रदर्शनं करोति।*

(२) छात्राः व्याख्यानं शृण्वन्ति =
छात्राः व्याख्यानस्य *श्रवणं कुर्वन्ति।*

(३) वयं निर्बलान् न उपहसामः =
वयं निर्बलानाम् *उपहासं न कुर्मः।*

एवमेव

| | | | | |
|---|---|---|---|---|
| [देवम्] | अलङ्करोमि | = | अलङ्करणं करोमि। | [देवस्य] |
| [कक्ष्यां] | प्रविशन्ति | = | प्रवेशं कुर्वन्ति। | [कक्ष्यायाः] |
| [कार्यं] | निर्वहसि | = | निर्वहणं करोषि। | [कार्यस्य] |
| [सूचनां] | उद्घोषयति | = | उद्घोषणं करोति। | [सूचनायाः] |
| [व्यवस्थां] | परिशीलयति | = | परिशीलनं करोति। | [व्यवस्थायाः] |

### अभ्यासः

1. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयन्तु –

अर्जनं, उद्घाटनं, सत्कारं, आह्वानं, प्रक्षालनं, प्रतिष्ठापनं, अनुवादं

| | | | | |
|---|---|---|---|---|
| (रहस्यम्) | * उद्घाटयति – | ................. | करोति। | (रहस्यस्य) |
| (सज्जनं) | * सत्करोति – | ................. | करोति। | (सज्जनस्य) |
| (वस्त्राणि) | * प्रक्षालयन्ति – | ................. | कुर्वन्ति। | (वस्त्राणाम्) |
| (मूर्तिं) | * प्रतिष्ठापयति – | ................. | करोति। | (मूर्तेः) |
| (धनम्) | * अर्जयामि – | ................. | करोमि। | (धनस्य) |
| (पाठम्) | * अनुवदामः – | ................. | कुर्मः। | (पाठस्य) |
| (मित्रम्) | * आह्वयसि – | ................. | करोषि। | (मित्रस्य) |

www.thearyasamaj.org

## अवधेयम्

| शिक्षकः | छात्रान् | परिष्करोति । |
|---|---|---|
| (कर्तृपदम् – प्रथमाविभक्तिः) | (कर्मपदम् – द्वितीयाविभक्तिः) | (क्रियापदम्) |
| ↓ | ↓ | ↙ ↘ |
| शिक्षकः | छात्राणां | परिष्करणं करोति । |
| (कर्तृपदम् – प्रथमाविभक्तिः) | (कर्मपदम् – षष्ठीविभक्तिः) | (क्रियापदं विभज्य लिखितम्) |

* विभज्य - क्रियापदस्य विभागं कृत्वा

यथा - आकर्षति - आकर्षणं करोति ।

निवेदयति - निवेदनं करोति ।

2. अधः लिखितानि वाक्यानि उदाहरणानुगुणं परिवर्त्य लिखन्तु –

१. (ग्रन्थः) ग्रन्थस्य पठनम् अकरोत् ।
२. (समस्या) .............................. परिहारं करोमि ।
३. (विद्यालयः) ........................... उद्घाटनं कुर्मः ।
४. (मित्रं) .............................. आह्वानं करोति ।
५. (चित्रं) .............................. मण्डनं करोति ।
६. (प्रस्तावम्) ......................... उपस्थापनं करोमि ।
७. (मुखं) ............................. अलङ्करणं करोषि ।
८. (पाठः) ............................ परिशोधनं कुर्मः ।
९. (श्लोकः) .......................... अनुवादं करोमि ।
१०. (विज्ञानप्रदर्शिनी) .................. आयोजनं करोति ।

## अवधेयम्

अनुसरति ← क्रियापदम्

↙ ↘

अनुसरणं करोति ← क्रियापदस्य विभजनम्

www.thearyasamaj.org

3. क्रियापदानि विभज्य लिखन्तु ।

| क्रियापदानि | क्रियापदानां विभजनम् |
|---|---|
| १. अनुकुर्वन्ति | अनुकरणं कुर्वन्ति । |
| २. पिबति | पानं |
| ३. लालयति | .................................. |
| ४. पठामि | .................................. |
| ५. गच्छामः | .................................. |
| ६. गायसि | गानं .............................. |
| ७. धावथः | .................................. |
| ८. आच्छादयति | .................................. |
| ९. मण्डयति | .................................. |
| १०. विवृणोति | .................................. |
| ११. सङ्गृह्णाति | .................................. |
| १२. प्रक्षालयति | .................................. |
| १३. अनुपालयामः | .................................. |
| १४. सम्मार्जयन्ति | .................................. |
| १५. परिभ्रमति | .................................. |
| १६. प्रक्षालयति | .................................. |
| १७. पालयथ | .................................. |
| १८. अन्वेषयामः | .................................. |
| १९. गच्छति | .................................. |

www.thearyasamaj.org

## 4. उदाहरणानुगुणं वाक्यानि रचयन्तु –

| | |
|---|---|
| उदाहरणम् – गमनं करोमि । | अहं गच्छामि । |
| १. आच्छादनं कुर्वन्ति । | ते ................................ |
| २. परिहरणं करोति । | सा ................................ |
| ३. अन्वेषणं करोषि । | ......................अन्वेषयसि । |
| ४. चिन्तनं कुर्मः । | ................................ |
| ५. लालनं कुरुतः । | ................................ |
| ६. नमनं कुर्वः । | ................................ |
| ७. पठनं कुर्मः । | ................................ |
| ८. भ्रमणं करोमि । | ................................ |
| ९. अनुसरणं कुरुथ । | ................................ |

## 5. उदाहरणानुसारं वाक्यानि रचयन्तु –

| | | |
|---|---|---|
| उदा॰ १. वाचनं करोमि । | (पाठः) | अहं पाठस्य वाचनं करोमि । |
| २. स्मरणं करोति । | (अहम्) | कः मम स्मरणं करोति ? |
| १. मार्जनं करोति । | (कृष्णफलकम्) | ................................ |
| २. लेखनं कुर्मः । | (इतिहासः) | ................................ |
| ३. पूजनं कुर्वन्ति । | (देवाः) | ................................ |
| ४. धारणं करोषि । | (वस्त्रम्) | ................................ |
| ५. अर्जनं करोति । | (ज्ञानम्) | ................................ |
| ६. आह्वानं कुर्वन्ति । | (अतिथिः) | ................................ |
| ७. प्रक्षालनं करोति । | (यानानि) | ................................ |
| ८. उद्घोषणं करोमि । | (योजनाः) | ................................ |
| ९. उद्घाटनं करोषि । | (कार्यक्रमाः) | ................................ |
| १०. प्रदर्शनं कुर्वन्ति । | (प्रतिभा) | ................................ |

www.thearyasamaj.org

# १८ सप्तमीविभक्तिः

उच्चैः पठन्तु, अवगच्छन्तु च –



नर्तकी मञ्चे नृत्यति ।

बालः पर्यङ्के निद्राति ।
छात्राः विद्यालये पठन्ति ।
धनं वित्तकोषे भवति ।
युवकः कटे योगासनं करोति ।



शिशुः प्रेङ्खायाम् अस्ति ।

भगिनी पाकशालायां पचति ।
माता स्थालिकायां भोजनं परिवेषयति ।
जनाः वाटिकायां भ्रमन्ति ।
अध्यक्षः सभायां भाषणं करोति ।



नौका नद्यां चलति ।

औषधं कूप्याम् अस्ति ।
वस्तूनि प्रदर्शिन्यां सन्ति ।
राज्यपालः राजधान्यां तिष्ठति ।



देवः मन्दिरे अस्ति ।

मीनाः जले तरन्ति ।
प्राणिनः वने विहरन्ति ।
पशवः वने भवन्ति ।



फलानि कण्डोलयोः सन्ति ।

वेदना कर्णयोः अस्ति ।
पुष्पाणि हस्तयोः सन्ति ।
दण्डः स्तम्भयोः अस्ति ।



पुस्तकानि निधानिकयोः सन्ति ।

आभूषणानि पेटिकयोः सन्ति ।
पुष्पाणि लतयोः विकसन्ति ।
गीतानि ध्वनिमुद्रिकयोः सन्ति ।

www.thearyasamaj.org



जलं द्रोण्योः पूरयति ।

अङ्गुलीयके अङ्गुल्योः स्तः ।
तैलं दर्व्योः अस्ति ।
मशी पुनःपूरण्योः अस्ति ।
मीनाः नद्योः सन्ति ।



जनाः मार्गेषु गच्छन्ति ।

फलानि वृक्षेषु सन्ति ।
पायसं चषकेषु अस्ति ।
आपणिकाः आपणेषु विक्रयणं कुर्वन्ति ।
श्लोकाः ग्रन्थेषु सन्ति ।



चित्राणि पुस्तकेषु सन्ति ।

कर्मकराः यन्त्रागारेषु कार्यं कुर्वन्ति ।
माधुर्यं फलेषु भवति ।
बालः सोपानेषु गच्छति ।



चक्राणि यानयोः सन्ति ।

अश्रूणि नेत्रयोः सन्ति ।
अलङ्कारः द्वारयोः अस्ति ।
सङ्ग्रहः सङ्गणकयोः अस्ति ।
नेता निर्वाचनयोः जयति ।




वार्ताः पत्रिकासु सन्ति ।

कागदानि सञ्चिकासु सन्ति ।
पक्षिणः शाखासु उपविशन्ति ।
सिंहाः गुहासु वसन्ति ।



जलं कूपीषु अस्ति ।

जनाः वीथीषु सञ्चरन्ति ।
चर्चा गोष्ठीषु प्रचलति ।
कमलानि वापीषु विकसन्ति ।

www.thearyasamaj.org

सप्तमीविभक्तिरूपाणि

1. उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु -

## एकवचनरूपाणि

**अकारान्तपुंलिङ्गशब्दाः**

उदा० - हस्तः - हस्ते ।
स्यूतः - .............. ।
आपणः - ........... ।
प्रकोष्ठः - ........... ।

**अकारान्तनपुंसकलिङ्गशब्दाः**

गृहम् - गृहे ।
मुखम् - ........... ।
उद्यानम् - .......... ।
नगरम् - ........... ।

**आकारान्तस्त्रीलिङ्गशब्दाः**

उदा० - पेटिका - पेटिकायाम् ।
पत्रिका - ............. ।
सञ्चिका - ............ ।
पाकशाला - .......... ।

**ईकारान्तस्त्रीलिङ्गशब्दाः**

घटी - घट्याम् ।
लेखनी - ........... ।
द्रोणी - ............ ।
वीथी - ............ ।

**उकारान्तपुंलिङ्गशब्दाः**

उदा० - गुरुः - गुरौ ।
वटुः - .......... ।
तरुः - .......... ।

**इकारान्तपुंलिङ्गशब्दाः**

अग्निः - अग्नौ ।
निधिः - .......... ।
राशिः ............ ।

**ऋकारान्तपुंलिङ्गशब्दाः**

उदा० - भ्राता - भ्रातरि ।
कर्ता - .......... ।
नेता - .......... ।

**उकारान्तनपुंसकलिङ्गशब्दाः**

वस्तु - वस्तुनि ।
अश्रु - .......... ।
श्मश्रु - .......... ।

**ऋकारान्तस्त्रीलिङ्गशब्दाः**

माता - मातरि ।

**इकारान्तस्त्रीलिङ्गशब्दाः**

व्यक्तिः - व्यक्त्याम् ।
सृष्टिः - .......... ।

**उकारान्तस्त्रीलिङ्गशब्दाः**

धेनुः - धेन्वाम् ।
चञ्चुः - .......... ।
रज्जुः - .......... ।

**ऊकारान्तस्त्रीलिङ्गशब्दाः**

वधूः - वध्वाम् ।

www.thearyasamaj.org

2. उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु -

## द्विवचनरूपाणि

| अकारान्तपुंलिङ्गशब्दाः | अकारान्तनपुंसकलिङ्गशब्दाः |
|---|---|
| हस्तौ - हस्तयोः । | नेत्रे - नेत्रयोः । |
| कर्णौ - .......... । | छत्रे - .......... । |
| पादौ - .......... । | छिद्रे - .......... । |
| **आकारान्तस्त्रीलिङ्गशब्दाः** | **ईकारान्तस्त्रीलिङ्गशब्दाः** |
| निधानिके - निधानिकयोः । | कूप्यौ - कूप्योः । |
| गन्धवर्तिके - ............. । | सख्यौ - ............... । |
| सान्द्रमुद्रिके - ............. । | अङ्कन्यौ - ............. । |
| **उकारान्तपुंलिङ्गशब्दाः** | **इकारान्तपुंलिङ्गशब्दाः** |
| बाहू - बाह्वोः । | राशी - राश्योः । |
| तन्तु - ............... । | गिरी - ............ । |
| इक्षू - ............... । | व्याधी - .......... । |
| **ऋकारान्तपुंलिङ्गशब्दाः** | **अकारान्तनपुंसकलिङ्गशब्दाः** |
| पितरौ- पित्रोः । | वस्तुनी - वस्तुनोः । |
| कार्यकर्तारौ - ........... । | अश्रुणी - ............. । |
| अभियन्तारौ - ............. । | श्मश्रुणी - ............ । |
| **ऋकारान्तस्त्रीलिङ्गशब्दाः** | **इकारान्तस्त्रीलिङ्गशब्दाः** |
| मातरौ- मात्रोः । | पङ्क्ती - पङ्क्त्योः । |
| | कृती - ............... । |
| | तिथी - ............... । |
| **उकारान्तस्त्रीलिङ्गशब्दाः** | **ईकारान्तस्त्रीलिङ्गशब्दाः** |
| धेनू - धेन्वोः । | |
| चञ्चू - .......... । | वध्वौ- वध्वोः । |
| रज्जू - .......... । | |

www.thearyasamaj.org

3. उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु -

**बहुवचनरूपाणि**

| अकारान्तपुंलिङ्गशब्दाः | अकारान्तनपुंसकलिङ्गशब्दाः |
|---|---|
| कटाः - कटेषु । | क्षेत्राणि - क्षेत्रेषु । |
| ग्रामाः - .......... । | सस्यानि - .......... । |
| मेघाः - ............ । | मन्दिराणि - ........... । |

| आकारान्तस्त्रीलिङ्गशब्दाः | ईकारान्तस्त्रीलिङ्गशब्दाः |
|---|---|
| मालाः - मालासु । | राजधान्यः - राजधानीषु । |
| पत्रिकाः - ............ । | गोष्ठ्यः - .............. । |
| कन्दराः - .......... । | चालन्यः - ............. । |

| इकारान्तपुंलिङ्गशब्दाः | उकारान्तपुंलिङ्गशब्दाः |
|---|---|
| ध्वनयः - ध्वनिषु । | तरवः - तरुषु । |
| बिन्दवः - ......... । | वेणवः - ......... । |
| निधयः - ............ । | शिशवः - ........... । |

| ऋकारान्तपुंलिङ्गशब्दाः | उकारान्तनपुंसकलिङ्गशब्दाः |
|---|---|
| जेतारः - जेतृषु । | वस्तूनि - वस्तुषु । |
| वक्तारः - ........... । | अश्रूणि - ........... । |
| प्रष्टारः - ............ । | श्मश्रूणि - ........... । |

| ऋकारान्तस्त्रीलिङ्गशब्दाः | इकारान्तस्त्रीलिङ्गशब्दाः |
|---|---|
| मातरः - मातृषु । | मूर्तयः - मूर्तिषु । |
| | पद्धतयः - ............ । |
| | श्रुतयः - ............. । |

| उकारान्तस्त्रीलिङ्गशब्दाः | ऊकारान्तस्त्रीलिङ्गशब्दाः |
|---|---|
| धेनवः - धेनुषु । | |
| चञ्चवः - ............... । | वध्वः - वधूषु । |
| रज्जवः - .............. । | |

www.thearyasamaj.org

4. आवरणे विद्यमानस्य शब्दस्य सप्तमीविभक्तिरूपेण रिक्तस्थानानि पूरयन्तु -

| | | | |
|---|---|---|---|
| १. संन्यासी | (कुट्टिमः) | कुट्टिमे | कटं प्रसारयति । |
| २. जनाः | (ललाटः) | ..................... | तिलकं धरन्ति । |
| ३. गृहिणी | (उलूखलम्) | ..................... | उपस्करं कुट्टयति । |
| ४. सर्वे उत्सवसमये | (देहली) | ..................... | रङ्गवल्लीं रचयन्ति । |
| ५. गङ्गोत्री | (गिरिः) | ..................... | अस्ति । |
| ६. सर्पः | (पादौ) | ..................... | दशति । |
| ७. छात्राः | (पङ्क्तिः) | ..................... | नृत्यन्ति । |
| ८. जलं | (भूमिः) | ..................... | स्रवति । |
| ९. बाला | (मुष्टिः) | ..................... | नाणके स्थापयति । |
| १०. धान्यं | (छदिः) | ..................... | शुष्यति । |
| ११. वेङ्कटेशः | (तिरुपतिः) | ..................... | अस्ति । |
| १२. हंसाः | (वापी) | ..................... | तरन्ति । |
| १३. रसः | (इक्षुः) | ..................... | भवति । |
| १४. कथाः | (पुराणानि) | ..................... | सन्ति । |
| १५. सौन्दर्यं | (मूर्तिः) | ..................... | अस्ति । |
| १६. वैज्ञानिकांशाः | (शास्त्राणि) | ..................... | उल्लिखिताः सन्ति । |
| १७. सिंहाः | (गुहाः) | ..................... | वसन्ति । |
| १८. जगन्नाथमन्दिरं | (पुरी) | ..................... | अस्ति । |
| १९. धावकस्य | (जानुनी) | ..................... | व्रणः अभवत् । |
| २०. वानराः | (वृक्षाः) | ..................... | उत्पतन्ति । |
| २१. पक्षिणः | (शाखाः) | ..................... | उपविशन्ति । |
| २२. विमानानि | (गगनम्) | ..................... | सञ्चरन्ति । |
| २३. कृषकाः | (क्षेत्राणि) | ..................... | कर्षन्ति । |
| २४. सेवकः जलं | (पात्राणि) | ..................... | पातयति । |
| २५. बालकः | (पाणिः) | ..................... | चुटति । |
| २६. सैनिकाः | (पर्वताः) | ..................... | गच्छन्ति । |

www.thearyasamaj.org

### 5. कोष्ठकसाहाय्येन उदाहरणानुगुणं वाक्यानि रचयन्तु -

| | | |
|---|---|---|
| कोलाहलः | दीपः | गच्छति |
| प्रकाशः | आकाशः | भवति |
| शय्या | मेला | उपविशति |
| विमानम् | पर्यङ्कः | |
| भ्रमरः | नीडः | |
| व्याधिः | वृक्षः | |
| मनुष्यः | वीथी | |
| पक्षी | शरीरम् | |
| वानरः | पुष्पम् | |

उदा॰ - कोलाहलः मेलायां भवति ।

१. ............ ............ ............
२. ............ ............ ............
३. ............ ............ ............
४. ............ ............ ............
५. ............ ............ ............
६. ............ ............ ............
७. ............ ............ ............
८. ............ ............ ............
९. ............ ............ ............

### 6. एतेषु जलं 'कुत्र भवति / कुत्र न भवति' इति लिखन्तु -

चषकः, अग्निः, घटः, लेखनी, कूपः, वस्त्रम्, मेघः, आकाशः, तडागः, उत्पीठिका, समुद्रः, वापी, द्रोणी, नलिका, भूमिः, घटी, कावेरी, पात्रम्, दधि, भाण्डम्

उदा॰ - जलं चषके भवति । जलम् अग्नौ न भवति ।

१. ---------- ---------- ---------- २. ---------- ---------- ----------
३. ---------- ---------- ---------- ४. ---------- ---------- ----------
५. ---------- ---------- ---------- ६. ---------- ---------- ----------
७. ---------- ---------- ---------- ८. ---------- ---------- ----------
९. ---------- ---------- ---------- १०. ---------- ---------- ----------
११. ---------- ---------- ---------- १२. ---------- ---------- ----------
१३. ---------- ---------- ---------- १४. ---------- ---------- ----------
१५. ---------- ---------- ---------- १६. ---------- ---------- ----------
१७. ---------- ---------- ---------- १८. ---------- ---------- ----------
१९. ---------- दधनि ---------- २०. ---------- ---------- ----------

www.thearyasamaj.org

7. कोष्ठकसाहाय्येन उदाहरणानुगुणं वाक्यानि रचयन्तु -

| | | |
|---|---|---|
| कन्दुके | स्यूतौ | |
| कङ्कणे | हस्तौ | स्तः |
| नूपुरे | पादौ | |
| कर्णाभरणे | कर्णौ | |
| अश्रु | नेत्रे | अस्ति |
| जनाः | वाटिके | |
| चित्राणि | शाटिके | |
| कागदानि | सञ्चिके | सन्ति |
| आभूषणानि | पेटिके | |

उदा॰ - कन्दुके स्यूतयोः स्तः ।

.................................... ।

.................................... ।

.................................... ।

उदा॰ - जनाः वाटिकयोः सन्ति ।

.................................... ।

.................................... ।

.................................... ।

.................................... ।

8. उदाहरणानुगुणं वाक्यानि रचयन्तु -




उदा॰ - सर्पः बिलेषु सञ्चरति ।

१. ....................................

२. ....................................

३. ....................................

४. ....................................

५. ....................................

६. ....................................

७. ....................................

८. ....................................

www.thearyasamaj.org

9. उदाहरणानुगुणम् एतैः पदैः वाक्यानि रचयन्तु -




१. जनाः आपणेषु उपविशन्ति ।
२. जनाः मार्गेषु भ्रमन्ति ।
३. ...............................
४. ...............................
५. ...............................
६. ...............................
७. ...............................
८. ...............................
९. ...............................
१०. ...............................
११. ...............................
१२. ...............................

10. भवान् समग्रे भारते भ्रमणं कृतवान् इति चिन्तयतु । किं कुत्र दृष्टवान् इति २० वाक्यानि लिखन्तु - (महिला चेत् दृष्टवती इति लिखतु ।)

उदा० - अहं देहल्यां संसद्भवनम् दृष्टवान् ।

१. ...............................
२. ...............................
३. ...............................
४. ...............................
५. ...............................
६ ...............................
७. ...............................
८. ...............................
९. ...............................
१०. ...............................
११. ...............................
१२. ...............................
१३. ...............................
१४. ...............................
१५. ...............................
१६. ...............................
१७. ...............................
१८. ...............................
१९. ...............................
२०. ...............................

www.thearyasamaj.org

11. भवतां गृहे शिशुः अस्ति । सः सर्वाणि वस्तूनि इतस्ततः स्थापितवान् इति चिन्तयन्तु । अधुना किं कुत्र स्थापनीयम् इति १२ वाक्यानि लिखन्तु -

यथा - लवणम् उत्पीठिकायां स्थापयतु ।

१. ............................................................ ।

२. ............................................................ ।

३. ............................................................ ।

४. ............................................................ ।

५. ............................................................ ।

६. ............................................................ ।

७. ............................................................ ।

८. ............................................................ ।

९. ............................................................ ।

१०. ............................................................ ।

११. ............................................................ ।

१२. ............................................................ ।

## सप्तमीविभक्तिः - विशेषप्रयोगाः

*विषयरूपः आधारः*

1. उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु -

१. सर्वेषां संस्कृते प्रीतिः ।

२. तस्य .............. अभिरुचिः ।

३. मम .............. स्नेहः ।

४. एतस्य .............. आदरः ।

५. अस्माकं .............. भक्तिः ।

६. कस्य .............. आसक्तिः ?

संस्कृतम्
रुचिः
भगिनी
शिक्षकः
देवः
सदाचरणम्

www.thearyasamaj.org

एतानि सप्तमीविभक्तिरूपाणि उच्चैः पठन्तु–

| | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| आपणः | | आपणे | आपणयोः | आपणेषु |
| वाहनम् | | वाहने | वाहनयोः | वाहनेषु |
| पत्रिका | | पत्रिकायाम् | पत्रिकयोः | पत्रिकासु |
| राजधानी | | राजधान्याम् | राजधान्योः | राजधानीषु |
| एतत् | पुंलिङ्गे, नपुंसकलिङ्गे च | एतस्मिन् | एतयोः | एतेषु |
| | स्त्रीलिङ्गे | एतस्याम् | एतयोः | एतासु |
| तत् | पुंलिङ्गे, नपुंसकलिङ्गे च | तस्मिन् | तयोः | तेषु |
| | स्त्रीलिङ्गे | तस्याम् | तयोः | तासु |
| किम् | पुंलिङ्गे, नपुंसकलिङ्गे च | कस्मिन् | कयोः | केषु |
| | स्त्रीलङ्गे | कस्याम् | कयोः | कासु |
| भवत् | पुंलिङ्गे | भवति | भवतोः | भवत्सु |
| | स्त्रीलिङ्गे | भवत्याम् | भवत्योः | भवतीषु |
| सर्व | पुंलिङ्गे, नपुंसकलिङ्गे च | सर्वस्मिन् | सर्वयोः | सर्वेषु |
| सर्वा | स्त्रीलिङ्गे | सर्वस्याम् | सर्वयोः | सर्वासु |
| अस्मद् | त्रिषु लिङ्गेषु | मयि | आवयोः | अस्मासु |
| युष्मद् | त्रिषु लिङ्गेषु | त्वयि | युवयोः | युष्मासु |

www.thearyasamaj.org

1. उदाहरणानुगुणं वाक्यानि रचयन्तु -

*प्रीतिः, स्नेहः, भक्तिः, आदरः, विनयः, नम्रता – इत्यादीनां प्रयोगाः*

| | | | |
|---|---|---|---|
| | एषः | विनयं | |
| | सः | आदरं | |
| | भवान् | प्रीतिं | |
| | त्वम् | वात्सल्यं | |
| | कः | प्रेम | |
| | भवती | स्नेहं | |
| | सा | नम्रतां | प्रदर्शयति |
| नरेन्द्रः | अहम् | श्रद्धां | |
| | ते | शङ्कां | करोति |
| | भवन्तः | मत्रीं | |
| | एते | सौजन्यं | प्रकटयति |
| | ताः | गौरवं | |
| | भवत्यः | आदरं | |
| | एताः | भक्तिं | |
| | यूयम् | कृपां | |
| | वयम् | विश्वासं | |

उदा० - नरेन्द्रः एतस्मिन् विनयं प्रदर्शयति ।

,, .......... .......... ..........
,, .......... .......... ..........
,, .......... .......... ..........
,, .......... .......... ..........
,, .......... .......... ..........
,, .......... .......... ..........
,, .......... .......... ..........
,, .......... .......... ..........
,, .......... .......... ..........
,, .......... .......... ..........
,, .......... .......... ..........
,, .......... .......... ..........
,, .......... .......... ..........
,, .......... .......... ..........

2. उदाहरणानुगुणं वाक्यानि रचयन्तु -

*अङ्के ग्रहणम्, ताडनम्*

उदा० - १. शत्रुः तं (कण्ठः) कण्ठे गृह्णाति ।

२. सः भवन्तं (वक्षःस्थलम्) .............................. प्रहरति ।

३. शिक्षकः एतं (कपोलः) .............................. ताडयति ।

४. शिशुः मातरं (केशाः) .............................. गृह्णाति ।

५. पिता कं (मस्तकं) .............................. ताडयति ?

६. भवान् मां (पादौ) .............................. किमर्थं प्रहरति ?

७. योधः शत्रुं (उदरम्) .............................. ताडयति ।

८. आरक्षकः चोरं (कण्ठः) .............................. गृह्णाति ।

www.thearyasamaj.org

## अवधेयम्

☛ यस्मिन् अङ्गे ग्रहणं, ताडनं, प्रहरणम् इत्यादिकं भवति, तस्य अङ्गस्य सप्तमीविभक्तिः भवति ।

3. उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु -

*निपुणकुशालादीनां प्रयोगः*

१. जगन्नाथः व्यवहारे कुशलः ।
२. सः .............. अग्रेसरः ।
३. एषा .............. समर्था ।
४. कुमारः .............. शूरः ।
५. भवान् .............. सरलः ।
६. सः .............. पण्डितः ।
७. भवती .............. चतुरा ।
८. शिक्षिका .............. समर्था ।
९. सा .............. निपुणा ।

व्यवहारः
क्रीडा
पाककार्यम्
रणम्
जीवनम्
सर्वविषयः
भाषणम्
श्लोकोच्चारणम्
चित्रकला

## अवधेयम्

☛ यदा जनेषु निपुणता, कुशलता सामर्थ्यम् – इत्यादिकं प्रकटयामः, तदा यस्मिन् सः गुणः अस्ति तस्य सप्तमीविभक्तिः भवति ।

एतान् श्लोकान् उच्चैः पठन्तु -

कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती ।
करमूले सदा गौरी प्रभाते करदर्शनम् ।।

(लक्ष्मीः कराग्रे वसति । सरस्वती करमध्ये वसति । गौरी करमूले वसति । अतः प्रभाते करदर्शनं करणीयम् ।)

शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।
सज्जना न हि सर्वत्र चन्दनं न वने वने ।।

(सर्वेषु पर्वतेषु माणिक्यं न भवति । सर्वेषु गजेषु मौक्तिकं न भवति । सज्जनाः सर्वत्र न भवन्ति । सर्वेषु वनेषु चन्दनवृक्षाः न भवन्ति ।)

www.thearyasamaj.org

मातृवत् परदारेषु परद्रव्येषु लोष्टवत् ।
आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः ।।

(यः जनः परपत्नीं मातरम् इव पश्यति, अन्येषां धनं लोष्टमिव तुच्छं मन्यते, सर्वानपि जीवान् आत्मवत् पश्यति, सः एव पण्डितः ।

उदये सविता रक्तः रक्तश्चास्तमने तथा ।
सम्पत्तौ च विपत्तौ च महताम् एकरूपता ।।

(सूर्यः उदयकाले अस्तमनकाले च रक्तवर्णः एव भवति । एवमेव सम्पत्काले, आपत्काले च महापुरुषाः समानाः तिष्ठन्ति ।)

शतेषु जायते शूरः सहस्त्रेषु च पण्डितः ।
वक्ता दशसहस्त्रेषु दाता भवति वा न वा ।।

(शतजनेषु एकः शूरः भवेत् । सहस्त्रजनेषु एकः पण्डितः भवेत् । दशसहस्त्रजनेषु एकः उत्तमः वक्ता भवेत् । किन्तु तावत्सु अपि जनेषु दानशीलः जनः एकः भवेत्, न भवेत् वा ।)

4. श्लोकेषु सप्तम्यन्तपदानि चित्वा उदाहरणानुगुणं लिखन्तु –

| | | |
|---|---|---|
| कराग्रे | .................... | .................. |
| .................. | .................... | .................. |
| .................. | .................... | .................. |
| .................. | .................... | .................. |
| .................. | .................... | .................. |

5. श्लोकान् पठित्वा एतेषां प्रश्नानाम् उत्तरं वदन्तु –

१. सरस्वती कुत्र वसति ? ............................................ ।
२. कदा करदर्शनं कर्तव्यम् ? ............................................ ।
३. चन्दनं सामान्यतः कुत्र भवति ? ............................................ ।
४. पण्डितः कुत्र आत्मवत् पश्यति ? ............................................ ।
५. कतिजनेषु पण्डितः भवति ? ............................................ ।

www.thearyasamaj.org

# १९ कदा

पश्यन्तु, उच्चैः पठन्तु, अवगच्छन्तु च –



बालिका प्रातः पाठं पठति ।

एषा बालिका कदा पाठं पठति ?
एषा बालिका प्रातः पाठं पठति ।

बालकः कदा पाठं पठति ?
बालकः प्रातः पाठं पठति ।



बालकः अपि प्रातः पाठं पठति।

एतत् सम्भाषणम् उच्चैः पठन्तु –

*श्यामला* – सुधीर ! भवान् प्रातः कदा उत्तिष्ठति ?
*सुधीरः* – महोदये ! अहं प्रातः पञ्चवादने उत्तिष्ठामि ।
*श्यामला* – प्रातः भ्रमणाय कदा गच्छति ?
*सुधीरः* – प्रातः भ्रमणाय सार्धपञ्चवादने गच्छामि ।
*श्यामला* – विद्यालयं कदा गच्छति ?
*सुधीरः* – विद्यालयं पादोनसप्तवादने गच्छामि ।
*श्यामला* – भवतः विद्यालये क्रीडोत्सवः कदा अस्ति ?
*सुधीरः* – मम विद्यालये क्रीडोत्सवः 'अगस्त'मासे अस्ति ।
*श्यामला* – भवतः सङ्गीतकक्ष्या कदा भवति ?
*सुधीरः* – मम सङ्गीतकक्ष्या मङ्गलवासरे भवति ।
*श्यामला* – अहं भवतः विद्यालयम् आगन्तुम् इच्छामि । कदा आगच्छेयम् ?
*सुधीरः* – भवत्याः आगमनस्य सदा स्वागतम् अस्ति । परन्तु अग्रिमे सप्ताहे गुरुवासरे अस्माकं विद्यालये संस्कृतशिबिरस्य उद्घाटनम् अस्ति । अहम् एव छात्रसंयोजकः । कृपया तदा आगच्छतु ।
*श्यामला* – शोभनम् । तदैव आगमिष्यामि । गच्छावः । पुनः मिलावः ।

www.thearyasamaj.org

## अभ्यासः

1. 'कदा' इति प्रयोगद्वारा प्रश्ननिर्माणं कुर्वन्तु –

१. अस्माकं विद्यालये रविवासरे सङ्गीतकार्यक्रमः अस्ति ।

........................................................................ ?

२. वयं प्रतिदिनं संस्कृतसम्भाषणस्य अभ्यासं कुर्मः ।

........................................................................ ?

३. जनाः प्रातःकाले सायङ्काले च मन्दिरं गच्छन्ति ।

........................................................................ ?

४. बालाः सायङ्काले षड्वादने क्रीडाक्षेत्रे क्रीडन्ति ।

........................................................................ ?

५. प्रायः जनाः प्रातःकाले अष्टवादने कार्यालयं गच्छन्ति ।

........................................................................ ?

६. ते जून्मासे संस्कृतसम्भाषणार्थं संवादशालां गमिष्यन्ति ।

........................................................................ ?

७. ताः बालिकाः प्रतिदिनं प्रातः योगासनं कुर्वन्ति ।

........................................................................ ?

८. अहं गृहात् नववादने प्रस्थितवान् ।

........................................................................ ?

९. मम यानं ह्यः एव आगतम् ।

........................................................................ ?

१०. भवतः यानं श्वः प्राप्स्यति ।

........................................................................ ?

११. कर्मशीलाः सदा कार्ये संलग्नाः भवन्ति ।

........................................................................ ?

१२. सुधीरः तदा गमिष्यति यदा भवान् आगमिष्यति ।

........................................................................ ?

१३. श्यामला तदा आगमिष्यति यदा माता अपि आगमिष्यति ।

........................................................................ ?

www.thearyasamaj.org

# २०

अद्य / श्वः / परश्वः / प्रपरश्वः
ह्यः / परह्यः / प्रपरह्यः

## उच्चैः पठन्तु, जानन्तु च –

| | | | |
|---|---|---|---|
| **अद्य** सोमवासरः । | सोमवासरः | **ह्यः** रविवासरः । | रविवासरः |
| **श्वः** मङ्गलवासरः । | मङ्गलवासरः | **परह्यः** शनिवासरः । | शनिवासरः |
| **परश्वः** बुधवासरः । | बुधवासरः | **प्रपरह्यः** शुक्रवासरः । | शुक्रवासरः |
| **प्रपरश्वः** गुरुवासरः । | गुरुवासरः | | |

## अभ्यासः

### 1. रिक्तस्थानानि पूरयन्तु –

१. अद्य बुधवासरः अस्ति ।
२. ह्यः ........................ आसीत् ।
३. अद्य गुरुवासरः ...................... ।
४. ह्यः बुधवासरः ...................... ।
५. ..................... शुक्रवासरः अस्ति ।
६. ..................... गुरुवासरः आसीत् ।
७. अद्य शनिवासरः अस्ति ।
८. ह्यः ......................... आसीत् ।

अद्य → अस्ति
ह्यः → आसीत्

इदानीम्

## उच्चैः पठन्तु –

१. पूर्वम् अहं बालः आसम्, इदानीं युवकः अस्मि ।
२. इदानीं कः समयः ? इदानीम् एकवादनम् अस्ति ।
३. दिवाकरः प्रातः गृहे आसीत्, इदानीं विद्यालये अस्ति ।
४. सुदेशः पूर्वं केरले आसीत्, इदानीं काश्मीरे अस्ति ।
५. सरला प्रातः कार्यालयं गतवती, इदानीं सा नाट्यगृहं गच्छति ।
६. पूर्वं कन्दुकं सुधाकरस्य हस्ते आसीत्, इदानीं मम हस्ते अस्ति, पश्चात् सुरेन्द्रस्य हस्ते भविष्यति ।



www.thearyasamaj.org

1. कोष्ठकस्य साहाय्येन अष्ट वाक्यानि रचयन्तु –

| | | |
|---|---|---|
| सः / ते<br>का / काः<br>अहम् / वयम्<br>भवान् / भवन्तः | इदानीम् | गीतं शृणोति ?<br>कुत्र गमिष्यन्ति ?<br>भोजनं करोमि ।<br>प्रश्नं पृच्छामः ।<br>वृक्षं स्पृशन्ति ?<br>सरोवरे तरति ।<br>कथां कथयन्ति । |

१. ..................................................................
२. ..................................................................
३. ..................................................................
४. ..................................................................
५. ..................................................................
६. ..................................................................
७. ..................................................................
८. ..................................................................

2. उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु –

उदा० – १. प्रातः विद्यालये आसम्, इदानीम् उद्याने अस्मि ।
२. ........................ कार्यालये आसम्, ........................ गृहे अस्मि ।
३. पूर्वम् एषः बालः आसीत्, ........................ युवकः अस्ति ।
४. ................ ते वने अभ्रमन्, ........................ सभागारे नाटकं पश्यन्ति ।
५. वयं तान् अगणयाम, .................................. तेभ्यः फलानि यच्छामः ।
६. ................ ताः कथाम् अलिखन्, ................ ताः कथायाः पठनं कुर्वन्ति ।

3. 'इदानीम्' इति अव्ययस्य प्रयोगं कृत्वा पञ्च वाक्यानि रचयन्तु –

१. .................................................................. ।
२. .................................................................. ।
३. .................................................................. ।
४. .................................................................. ।
५. .................................................................. ।

www.thearyasamaj.org

# २१ भूतकालः

उच्चैः पठन्तु -

*अस्धातुः*



बालकः

१ एषः बालकः अस्ति,
पूर्वम् एषः शिशुः आसीत् ।



शिशुः



युवकः

२. एषः युवकः अस्ति,
पूर्वम् एषः बालकः आसीत् ।



बालकः



युवती

३. एषा युवती अस्ति,
पूर्वम् एषा बालिका आसीत् ।



बालिका



वृद्धा

४. एषा वृद्धा अस्ति,
पूर्वम् एषा युवती आसीत् ।



युवती

अस्धातोः रूपाणि

| | वर्तमानकाले | | | भूतकाले | | |
|---|---|---|---|---|---|---|
| | ए.व. | द्वि.व. | ब.व. | ए.व. | द्वि.व. | ब.व. |
| प्र.पु. | अस्ति | स्तः | सन्ति | आसीत् | आस्ताम् | आसन् |
| म.पु. | असि | स्थः | स्थ | आसीः | आस्तम् | आस्त |
| उ.पु. | अस्मि | स्वः | स्मः | आसम् | आस्व | आस्म |

www.thearyasamaj.org

## अभ्यासः

1. उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु -

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र. पु. | सः बालकः आसीत् । | तौ बालकौ ....... । | ते बालकाः .......... । |
| म.पु. | त्वं बालकः आसीः । | युवां बालकौ......... । | यूयं बालकाः ......... । |
| उ. पु. | अहं बालकः ........ । | आवां .............. । | वयम् ....... ....... । |

पठन्तु अवगच्छन्तु च -

क्तवतु

| वर्तमानकाले | | भूतकाले (क्तवतु) |
|---|---|---|
| १. | एकः बालकः अस्ति । | एकः बालकः *आसीत्* । |
| | सः उपवनं गच्छति । | सः उपवनं गतवान् । |
| | तस्य स्नेहिताः अपि सन्ति । | तस्य स्नेहिताः अपि *आसन्* । |
| | उपवने ते एकं वानरं पश्यन्ति । | उपवने ते एकं वानरं दृष्टवन्तः । |
| | सः वानरः पिपासितः अस्ति । | सः वानरः पिपासितः *आसीत्* । |
| | स्नेहिताः जलकूपीं तत्र स्थापयन्ति । | स्नेहिताः जलकूपीं तत्र स्थापितवन्तः । |
| | वानरः शीघ्रं शीघ्रं जलं पिबति । | वानरः शीघ्रं शीघ्रं जलं पीतवान् । |
| | वानरः अन्यत्र गच्छति । | वानरः अन्यत्र गतवान् । |
| २. | एका बालिका अस्ति । | एका बलिका *आसीत्* । |
| | सा बालकेन्द्रे संस्कृतं पठति । | सा बालकेन्द्रे संस्कृतं पठितवती । |
| | सा मधुरं गायति । | सा मधुरं गीतवती । |
| | सा प्रतियोगितायां पुरस्कारं प्राप्नोति । | सा प्रतियोगितायां पुरस्कारं प्राप्तवती । |
| | सा प्रसन्ना भवति । | सा प्रसन्ना *अभवत्* । |
| | सा श्लोकं लिखति । | सा श्लोकं लिखितवती । |
| ३. | त्वं भारतमातुः गीतं गायसि । | त्वं भारतमातुः गीतं गीतवान् । |
| | युवां सर्वदा सत्यं वदथः । | युवां सर्वदा सत्यम् उदितवन्तौ । |
| | यूयं कुत्र भ्रमथ ? | यूयं कुत्र भ्रमितवन्तः ? |
| | अहं कथां लिखामि । | अहं कथां लिखितवान् । |
| | आवां प्रश्नं पृच्छावः । | आवां प्रश्नं पृष्टवन्तौ । |
| | वयं पुस्तकानि नयामः । | वयं पुस्तकानि नीतवन्तः । |

www.thearyasamaj.org

## अभ्यासः

1. उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु –

क्तवतुप्रत्ययान्तं रूपं पुंलिङ्गे

| लट्लकाररूपम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पठति | पठितवान् | पठितवन्तौ | पठितवन्तः |
| चलति | चलितवान् | चलितवन्तौ | चलितवन्तः |
| नमति | नतवान् | .............. | .............. |
| गच्छति | गतवान् | .............. | .............. |
| हसति | हसितवान् | .............. | .............. |
| वदति | उदितवान् | .............. | .............. |
| खादति | .............. | .............. | खादितवन्तः |
| क्रीडति | .............. | क्रीडितवन्तौ | .............. |
| लिखति | लिखितवान् | .............. | .............. |
| पतति | .............. | .............. | पतितवन्तः |
| पश्यति | .............. | दृष्टवन्तौ | .............. |
| शृणोति | .............. | श्रुतवन्तौ | .............. |
| नयति | .............. | नीतवन्तौ | .............. |
| तिष्ठति | स्थितवान् | .............. | .............. |
| करोति | .............. | .............. | कृतवन्तः |
| पिबति | .............. | पीतवन्तौ | .............. |
| कथयति | कथितवान् | .............. | .............. |
| पृच्छति | .............. | पृष्टवन्तौ | .............. |
| गायति | .............. | .............. | गीतवतन्तः |
| कूजति | कूजितवान् | .............. | .............. |
| गर्जति | .............. | गर्जितवन्तौ | .............. |
| भ्रमति | .............. | .............. | भ्रमितवन्तः |

www.thearyasamaj.org

2. उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु –

क्तवतुप्रत्ययान्तं रूपं स्त्रीलिङ्गे

| लट्लकाररूपम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पठति | पठितवती | पठितवत्यौ | पठितवत्यः |
| चलति | चलितवती | चलितवत्यौ | चलितवत्यः |
| नमति | नतवती | .............. | .............. |
| गच्छति | गतवती | .............. | .............. |
| हसति | हसितवती | .............. | .............. |
| वदति | उदितवती | .............. | .............. |
| खादति | .............. | .............. | खादितवत्यः |
| क्रीडति | .............. | .............. | क्रीडितवत्यः |
| लिखति | .............. | .............. | लिखितवत्यः |
| पतति | .............. | .............. | पतितवत्यः |
| पश्यति | .............. | दृष्टवत्यौ | .............. |
| श्रृणोति | .............. | श्रुतवत्यौ | .............. |
| नयति | .............. | नीतवत्यौ | .............. |
| तिष्ठति | स्थितवती | .............. | .............. |
| करोति | कृतवती | .............. | .............. |
| पिबति | .............. | पीतवत्यौ | .............. |
| कथयति | कथितवती | .............. | .............. |
| पृच्छति | .............. | पृष्टवत्यौ | .............. |
| गायति | .............. | .............. | गीतवत्यः |
| कूजति | कूजितवती | .............. | .............. |
| गर्जति | .............. | गर्जितवत्यौ | .............. |

3. ह्यः भवान् / भवती 'किं किं कृतवान् / कृतवती' इति पञ्चवाक्येषु लिखन्तु –

१. अहं ह्यः एकं संस्कृतगीतम् लिखितवान् ।

२. ..............................................................

३. ..............................................................

४. ..............................................................

५. ..............................................................

www.thearyasamaj.org

4. रिक्तस्थानानि क्तवतुप्रत्ययान्तरूपैः पूरयन्तु –

१. अहं संस्कृतभारत्याः कार्यालयं गतवान् । (गम्)
२. त्वं तत्र कदा ................................ ? (गम्)
३. वयं संस्कृतकथां ............................ । (श्रु)
४. ते गीतानि ................................ । (गी)
५. यूयम् अभ्यासदर्शिनीं कदा ...................... ? (क्री)
६. आवां संस्कृतेन एव पत्रं ...................... । (लिख्)
७. चिकित्सकः उत्तमौषधिं ........................। (दा)
८. अध्यापकः संस्कृतेन एव ...................... । (पठ्)
९. रेल्याने यात्रिणः बहु वार्तालापं ............... । (कृ)
१०. युवाम् अत्र ................................ । (आ + गम्)
११. ताः अध्यापिकाः उत्सवे संस्कृतगीतानि .......... । (गी)
१२. ते बालिके फलानि एव ........................ । (खाद्)

उच्चैः पठन्तु, जानन्तु च –

*लङ्लकारः*

| वर्तमानकालः (लट्लकारः) | भूतकालः (लङ्लकारः) |
|---|---|
| १. गणेशः पठति । | गणेशः अपठत् । |
| २. श्यामः विज्ञानप्रदर्शिनीं पश्यति । | श्यामः विज्ञानप्रदर्शिनीम् अपश्यत् । |
| ३. वयं संस्कृतशिबिरं गच्छामः । | वयं संस्कृतशिबिरम् अगच्छाम । |
| ४. ताः गृहं गच्छन्ति । | ताः गृहम् अगच्छन् । |
| ५. यूयं सम्भाषणसन्देशं पश्यथ । | यूयं सम्भाषणसन्देशम् अपश्यत । |

www.thearyasamaj.org

उच्चैः पठन्तु, लिखन्तु च -

| | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| चल् | प्रथमः पुरुषः | अचलत् | अचलताम् | अचलन् |
| | मध्यमः पुरुषः | अचलः | अचलतम् | अचलत |
| | उत्तमः पुरुषः | अचलम् | अचलाव | अचलाम |
| अस् | प्रथमः पुरुषः | आसीत् | आस्ताम् | आसन् |
| | मध्यमः पुरुषः | आसीः | आस्तम् | आस्त |
| | उत्तमः पुरुषः | आसम् | आस्व | आस्म |
| स्था | प्रथमः पुरुषः | अतिष्ठत् | अतिष्ठताम् | अतिष्ठन् |
| | मध्यमः पुरुषः | अतिष्ठः | अतिष्ठतम् | अतिष्ठत |
| | उत्तमः पुरुषः | अतिष्ठम् | अतिष्ठाव | अतिष्ठाम |
| इष् | प्रथमः पुरुषः | ऐच्छत् | ऐच्छताम् | ऐच्छन् |
| | मध्यमः पुरुषः | ऐच्छः | ऐच्छतम् | ऐच्छत |
| | उत्तमः पुरुषः | ऐच्छम् | ऐच्छाव | ऐच्छाम् |

## अभ्यासः

1. वाक्यानि रचयन्तु, अभ्यासं च कुर्वन्तु -

| प्रथमपुरुषः | | |
|---|---|---|
| एकवचनम् | द्विवचनम् | बहुवचनम् |
| सः, सा, भवान्, भवती | तौ, ते, भवन्तौ, भवत्यौ | ते, ताः, भवन्तः, भवत्यः |
| अपठत् / अचलत् <br> अगच्छत् / आगच्छत् | अपठताम् / अचलताम् <br> अगच्छताम् / आगच्छताम् | अपठन् / अचलन् <br> अगच्छन् / आगच्छन् |

www.thearyasamaj.org

| मध्यमपुरुषः | | |
|---|---|---|
| एकवचनम् | त्वम् - | अपठः / अचलः / अगच्छः / आगच्छः ....... |
| द्विवचनम् | युवाम् - | अपठतम् / अचलतम् / अगच्छतम् / आगच्छतम् ....... |
| बहुवचनम् | यूयम् - | अपठत / अचलत / अगच्छत / आगच्छत .......... |

| उत्तमपुरुषः | |
|---|---|
| एकवचनम् | अहम् - अपठम् / अचलम् / अगच्छम् / आगच्छम् ....... |
| द्विवचनम् | आवाम् - अपठाव / अचलाव / अगच्छाव / आगच्छव ....... |
| बहुवचनम् | वयम् - अपठाम / अचलाम / अगच्छाम / आगच्छाम ......... |

2. उदाहरणानुसारं धातूनां रूपाणि लिखन्तु –

| धातुः | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| पठ् | (प्र.पु) | अपठत् | अपठताम् | अपठन् |
| नम् | (प्र.पु) | अनमत् | .......... | .......... |
| हस् | (म.पु) | .......... | अहसतम् | .......... |
| खाद् | (उ.पु) | .......... | .......... | अखादाम |
| वद् | (प्र.पु) | .......... | अवदताम् | .......... |
| क्रीड् | (म.पु) | अक्रीडः | .......... | .......... |
| भ्रम् | (उ.पु) | .......... | .......... | .......... |
| आ + गम् | (प्र.पु) | .......... | .......... | आगच्छन् |
| नृत् | (म.पु) | अनृत्यः | .......... | .......... |
| चल् | (उ.पु) | .......... | अचलाव | .......... |
| पत् | (प्र.पु) | .......... | .......... | .......... |
| लिख् | (म.पु) | .......... | .......... | .......... |
| दृश् | (उ.पु) | अपश्यम् | .......... | .......... |

www.thearyasamaj.org

| धातुः | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| गी | (उ.पु) | .......... | अगायाव | .......... |
| गम् | (प्र.पु) | .......... | .......... | .......... |
| पा | (म.पु) | .......... | .......... | .......... |
| श्रु | (उ.पु) | .......... | .......... | अश्रृणुम |
| नी | (प्र.पु) | .......... | .......... | .......... |
| प्रच्छ | (म.पु) | .......... | .......... | .......... |
| भू | (उ.पु) | .......... | .......... | .......... |
| कथ् | (प्र.पु) | .......... | .......... | .......... |
| स्था | (म.पु) | .......... | .......... | .......... |

स्म

एतत् सम्भाषणम् उच्चैः पठन्तु, अवगच्छन्तु च -

आचार्यः - भोः छात्राः ! अद्य भवन्तः किं ज्ञातुम् इच्छन्ति ?

छात्राः - श्रीमन् ! अद्य वयं श्रीकृष्णस्य विषये ज्ञातुम् इच्छामः ।

आचार्यः - उत्तमम् । भवन्तः प्रश्नान् पृच्छन्तु, अहम् उत्तरं वदामि ।

राजेशः - श्रीकृष्णः बाल्ये कीदृशः आसीत् ? सः किं किं करोति स्म ?

आचार्यः - प्रियच्छात्राः ! श्रृण्वन्तु । श्रीकृष्णः बाल्ये अतीव चञ्चलः आसीत् । सः बहु क्रीडति स्म, प्रतिदिनं वनं गच्छति स्म, धेनूः चारयति स्म ।

ममता - सः अन्यत् किम् इच्छति स्म ?

आचार्यः - कृष्णः नवनीतं बहु इच्छति स्म । सः प्रतिदिनं नवनीतं खादति स्म ।

रजनीशः - श्रीमन् ! मम माता वदति यत् श्रीकृष्णः मृत्तिकाम् अपि खादति स्म ।

आचार्यः: - सत्यं भोः । सः मृत्तिकाम् अपि खादति स्म, किन्तु तदा माता यशोदा कृष्णं तर्जयति स्म ।

गीताञ्जलिः - तस्य विषये अन्यः कोऽपि विशेषः ?

आचार्यः - एकः मुख्यः अंशः नाम सः सर्वदा वेणुं वादयति स्म । तस्य वेणुवादनं श्रुत्वा सर्वे मोहिताः भवन्ति स्म, अतः तस्य एकं नाम मोहनः इति अपि अस्ति । अस्तु, अद्य पर्याप्तम् । श्वः पुनः नूतनं विषयं ज्ञास्यामः ।

www.thearyasamaj.org

## अभ्यासः

1. उपरितनं सम्भाषणं पठित्वा प्रश्नानाम् उत्तराणि लिखन्तु -

१. श्रीकृष्णः प्रतिदिनं कुत्र गच्छति स्म ? ........................................।

२. कृष्णः काः चारयति स्म ? ........................................।

३. सः प्रतिदिनं किं खादति स्म ? ........................................।

४. कृष्णः किं वादयति स्म ? ........................................।

५. माता किमर्थं तर्जयति स्म ? ........................................।

६. कृष्णः किम् अपि खादति स्म ? ........................................।

2. उदाहरणानुगुणं पुरतः विद्यमानं धातुं पठित्वा वाक्यानि रचयन्तु -

| | |
|---|---|
| १. अर्जुनः धनुर्विद्यां जानाति स्म । | (ज्ञा) |
| २. भीमः बहु ........................................। | (खाद्) |
| ३. दुर्योधनः ईर्ष्यां ........................................। | (कृ) |
| ४. कृष्णः लीलां ........................................। | (दर्श) |
| ५. भीष्मः कौरवाणां पक्षतः ..............................। | (युध्) |
| ६. शकुनिः सर्वदा कूटं ..............................। | (रच्) |
| ७. कौरवाः पाण्डवान् न ..............................। | (इच्छ्) |
| ७. युधिष्ठिरः सत्यं ........................................। | (वद्) |

3. उदाहरणं दृष्ट्वा रिक्तस्थानानि पूरयन्तु -

| | | |
|---|---|---|
| १. बालकः पठति स्म | बालकौ पठतः स्म । | बालकाः पठन्ति स्म । |
| २. शिशुः खेलति स्म । | ........................ | ........................ । |
| ३. मुनिः जपति स्म । | ........................ | ........................ । |
| ४. वधूः समाचारं पठति स्म । | ........................ | ........................ । |
| ५. अहं ध्यायामि स्म । | ........................ | ........................ । |
| ६. भवान् अटति स्म । | ........................ | ........................ । |
| ७. एषः पाठं स्मरति स्म । | ........................ | ........................ । |
| ८. भवती विषयं चिन्तयति स्म । | ........................ | ........................ । |

www.thearyasamaj.org

# प्राणादपि संस्कृतिः श्रेष्ठा २२

पूर्वं श्रीहर्षः भारतस्य चक्रवर्ती आसीत् । तस्मिन् काले 'ह्यूयन्त्साङ्गः' नाम चीनादेशीयः यात्री भारतम् आगतवान् । सः भारते अनेकेषु स्थलेषु अटितवान् । जनानां व्यवहारं ज्ञातवान् । भारतीयसंस्कृतिम् अवगतवान् । विविधान् धर्मग्रन्थान् विविधानि ऐतिहासिकवस्तूनि च सङ्गृहीतवान् ।

सः स्वदेशगमनतः पूर्वं हर्षचक्रवर्तिनं दृष्टवान् । तं स्वानुभवं निवेदितवान् । तस्मै कृतज्ञतां समर्पितवान् । हर्षः अपि तं सम्मानितवान् । तस्मै अनेकान् उपहारान् दत्तवान् । तस्य प्रयाणाय नौकां व्यवस्थापितवान् । रक्षणार्थं विंशतियोधान् अपि प्रेषितवान् ।

प्रयाणारम्भसमये हर्षः योधान् उद्दिश्य उक्तवान् - ''भोः भटाः ! एतस्यां नौकायां विविधाः भारतीयधर्मग्रन्थाः सन्ति । अनेकानि ऐतिहासिकवस्तूनि च सन्ति । एतानि भारतीयसंस्कृतेः प्रतीकानि, अमूल्यानि च । अतः एतेषां ग्रन्थानां, वस्तूनां च रक्षणं भवतां कर्तव्यम्'' इति ।

ततः सर्वे नौकायाम् उपविष्टवन्तः । नाविकाः नौकां चालितवन्तः । अनेकदिनपर्यन्तं ते सुखेन प्रयाणं कृतवन्तः । एकस्मिन् दिने ते समुद्रे अकस्मात् उत्पन्नस्य चण्डमारुतस्य प्रभावम् अनुभूतवन्तः । नौका दोलायमाना अभवत् । सर्वे अपायशङ्कां प्राप्तवन्तः ।

भीतः प्रधाननाविकः उक्तवान् - ''भोः, नौकायाः भारः अधिकः अस्ति । झटिति एतानि पुस्तकानि, ऐतिहासिकवस्तूनि च समुद्रे क्षिपन्तु । स्वप्राणान् रक्षन्तु'' इति ।

तदा योधनाविकः उक्तवान् - ''योधाः ! एषः अस्माकम् अग्निपरीक्षाकालः । धर्मग्रन्थानाम्, ऐतिहासिकवस्तूनां, तद्द्वारा भारतीयसंस्कृतेः च रक्षणम् अस्माकम् आद्यं कर्तव्यम् । तदर्थं सर्वे सज्जाः भवन्तु । प्राणसमर्पणेनापि कर्तव्यं पालनीयम्'' इति ।

नायकस्य वचनं श्रुत्वा सर्वे योधाः झटिति एकैकशः तृणमिव स्वशरीरम् एव समुद्रे क्षिप्तवन्तः । संस्कृतेः रक्षणार्थं स्वप्राणान् एव समर्पितवन्तः ।

अत्याश्चर्यकरम् एतत् दृश्यं दृष्ट्वा ह्यूयन्त्साङ्गः नेत्राभ्याम् अश्रूणि स्रावितवान् ।

## अभ्यासः

I. एतेषां प्रश्नानाम् उत्तरम् एकवाक्येन लिखन्तु -

१. ह्यूयन्त्साङ्गः कानि कानि सङ्गृहीतवान् ? ..............................

२. स्वदेशगमनतः पूर्वं ह्यूयन्त्साङ्गः किं कृतवान् ? ..............................

३. योधनाविकः किम् उक्तवान् ? ..............................

४. ह्यूयन्त्साङ्गः भारते किं किं कृतवान् ? ..............................

५. भीतः प्रधाननाविकः किम् उक्तवान् ? ..............................

६. नायकस्य वचनं श्रुत्वा सर्वे किं कृतवन्तः ? ..............................

www.thearyasamaj.org

## 2. एतेषाम् उत्तराणां प्रश्ननिर्माणं कुर्वन्तु -

१. पूर्वं श्रीहर्षः भारतस्य चक्रवर्ती आसीत् । ..................

२. ह्यूयन्त्साङ्गः भारतम् आगतवान् । ..................

३. सः जनानां व्यवहारं दृष्टवान् । ..................

४. तस्मै कृतज्ञतां समर्पितवान् । ..................

५. नौकायाः भारः अधिकः अस्ति । ..................

६. ततः सर्वे नौकायाम् उपविष्टाः । ..................

७. हर्षः योधान् उद्दिश्य उक्तवान् । ..................

८. सः ऐतिहासिकवस्तूनि सङ्गृहीतवान् । ..................

९. अनेकदिनपर्यन्तं ते सुखेन प्रयाणं कृतवन्तः । ..................

१०. योधाः संस्कृतेः रक्षणार्थं स्वप्राणान् समर्पितवन्तः । ..................

## 3. परस्परं मेलयन्तु -

| | | अत्याश्चर्यकरम् | दृश्यम् |
|---|---|---|---|
| अत्याश्चर्यकरम् | दिने | | |
| श्रीहर्षः | कर्तव्यम् | .......... | .......... |
| ह्यूयन्त्साङ्गः | दोलायमाना | .......... | .......... |
| नाविकः | ऐतिहासिकवस्तूनि | .......... | .......... |
| विंशतिः | चक्रवर्ती | .......... | .......... |
| अमूल्यानि | दृश्यम् | .......... | .......... |
| संस्कृतिरक्षणम् | भीतः | .......... | .......... |
| नौका | योधाः | .......... | .......... |
| एकस्मिन् | चीनादेशीयः | .......... | .......... |

## 4. एतेषां विरुद्धार्थकशब्दाः पाठे प्रयुक्ताः सन्ति । तान् चित्वा लिखन्तु -

| | |
|---|---|
| १. नाशनम् - .................. | २. परम् - .................. |
| ३. मन्दम् - .................. | ४. दुःखेन - .................. |
| ५. अन्ते - .................. | ६. निन्दितवान् - .................. |
| ७. तुच्छानि - .................. | ८. स्थिरा - .................. |

www.thearyasamaj.org

5. समानार्थकं शब्दं चित्वा लिखन्तु -

१. योधाः - महाराजाः, सैनिकाः, यात्रिकाः, जनाः - .........

२. अपायः - अपूपम्, वायुवेगः, आपत्, सुखम् - .........

३. पूर्वम् - पुरा, पूर्णतया, गर्वः, इदानीम् - .........

४. झटिति - मन्दम्, समुद्रे, तृणम्, शीघ्रम् - .........

५. उपहारः - क्रीडनकम्, पारितोषिकम् - .........

६. समुद्रः - तरङ्गः, विशालः, रत्नाकरः, लवणजलम् - .........

७. शरीरम् - नेत्रम्, तृणम्, गात्रम्, शरः - .........

८. नेत्रम् - मुखम्, नयनम्, पात्रम्, इन्द्रियम् - .........

९. नायकः - प्रमुखः, राजनीतिज्ञः, सैनिकः, सेवकः - .........

१०. मारुतः - नौका, समुद्रः अग्निः, वायुः - .........

6. शुद्धवाक्यानां पुरतः ✓ चिह्नं लिखन्तु -

१. संस्कृतेः रक्षणार्थं सर्वे स्वप्राणान् एव समर्पितवन्तः । [ ]

२. ह्यूयन्त्साङ्गः भारते बहून् जनान् सङ्गृहीतवान् । [ ]

३. भटाः समुद्रे पतितुं भयम् अनूभूतवन्तः । [ ]

४. सर्वे अग्नौ स्वशरीरं पातितवन्तः । [ ]

५. श्रीहर्षः स्वानुभवं निवेदितवान्, कृतज्ञतां च समर्पितवान् । [ ]

६. समुद्रमध्ये ह्यूयन्त्साङ्गः सर्वान् 'समुद्रे पतन्तु' इति उक्तवान् । [ ]

७. चीनायात्रिकः भारतीयानां व्यवहारं भारतीयसंस्कृतिं च अवगतवान् । [ ]

८. नाविकस्य वचनं श्रुत्वा सर्वे स्वप्राणान् रक्षितवन्तः । [ ]

www.thearyasamaj.org

# २३ उपसर्गाः

पश्यन्तु, उच्चैः पठन्तु च -



पुरुषः गच्छति ।



पुरुषः आगच्छति ।
(आ + गच्छति)



युवकः धावति । बालकः अनुधावति ।
(अनु + धावति)

१. माता आपणात् आगच्छति ।

२. बालकाः देवं प्रणमन्ति ।

३. शिष्याः आज्ञां परिपालयन्ति ।

४. सेवकः जलम् आनयति ।

५. दुष्यन्तः शकुन्तलां विस्मरति ।

६. पिता प्रातः गृहतः निर्गच्छति ।

७. देवः कष्टं परिहरति ।

८. पुत्री मातरम् अनुकरोति ।

९. रजकः वस्त्राणि प्रक्षालयति ।

१०. शिवालये घण्टा निनदति ।

www.thearyasamaj.org

उच्चैः पठन्तु, जानन्तु च -

| उपसर्गः | धातुः | क्रियापदम् | उपसर्गसहितम् |
|---|---|---|---|
| आ | गम् | गच्छति | आगच्छति |
| आ | नी | नयति | आनयति |
| उत् | स्था | तिष्ठति | उत्तिष्ठति |
| उत् | पत् | पतति | उत्पतति |
| अनु | सृ | सरति | अनुसरति |
| अनु | वद् | वदति | अनुवदति |
| अनु | धा | धावति | अनुधावति |
| अनु | कृ | करोति | अनुकरोति |
| वि | लिख् | लिखति | विलिखति |
| वि | हृ | हरति | विहरति |
| वि | स्मृ | स्मरति | विस्मरति |
| नि | क्षिप् | क्षिपति | निक्षिपति |
| प्र | हृ | हरति | प्रहरति |
| प्र | क्षाल् | क्षालयति | प्रक्षालयति |
| परि | पाल् | पालयति | परिपालयति |
| परि | प्रच्छ् | पृच्छति | परिपृच्छति |
| अव | गम् | गच्छति | अवगच्छति |
| अव | नम् | नमति | अवनमति |
| अधि | वस् | वसति | अधिवसति |
| उप | कृ | करोति | उपकरोति |
| सम् | ग्रह् | गृह्णाति | सङ्गृह्णाति |
| सम् | हृ | हरति | संहरति |
| निस् | सृ | सरति | निस्सरति |
| परा | भू | भवति | पराभवति |
| अप | कृ | करोति | अपकरोति |
| अभि | ज्ञा | जानाति | अभिजानाति |

www.thearyasamaj.org

## अभ्यासः

1. उपसर्गं क्रियापदं च योजयित्वा लिखन्तु -

| उपसर्गः | क्रियापदम् | उपसर्गसहितम् |
|---|---|---|
| वि | लिखति | विलिखति |
| प्र | पठति | ............ |
| अनु | गच्छति | ............ |
| सम् | हरति | ............ |
| प्र | नमति | प्रणमति |
| सम् | तुष्यति | ............ |
| परि | त्यजति | ............ |
| आ | नयति | ............ |
| परि | हरति | ............ |
| प्र | भवति | प्रभवति |
| अनु | वदति | ............ |
| वि | तरति | ............ |
| अव | गच्छति | ............ |
| नि | क्षिपति | निक्षिपति |
| उप | करोति | ............ |
| उत् | पतति | ............ |
| निस् | सरति | ............ |
| अधि | वसति | अधिवसति |
| अनु | सरति | ............ |
| अव | नमति | अवनमति |
| सम् | गृह्णाति | ............ |

## अवधेयम्

1. क) उपसर्गाः द्वाविंशतिः सन्ति । ते च -

प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आ,
नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप ।

www.thearyasamaj.org

ख) अलम्, बहिस्, अन्तर् – इत्यादयः उपसर्गतुल्याः एव भवन्ति ।

यथा - अलम् + करोति – अलङ्करोति

बहिस् + करोति – बहिष्करोति

अन्तर् + भवति - अन्तर्भवति ।

ग) स्वी, उष्णी, सज्जी – इत्यादयः अपि उपसर्गतुल्याः सन्ति ।

यथा – स्वी + करोति – स्वीकरोति

उष्णी + करोति – उष्णीकरोति

सज्जी + करोति – सज्जीकरोति

## 2. उपसर्गनियमाः

अ) उपसर्गः धातोः पूर्वं भवति ।

यथा – आ + गच्छति -'â आगच्छति ।

आ) उपसर्गेण कदाचित् धातोः अर्थः परिवर्तते ।

यथा - स्मरति - विस्मरति

गच्छति - आगच्छति

इ) कदाचित् उपसर्गः धातोः अर्थस्य पोषणं करोति ।

यथा - शोभते - सुशोभते

लिखति – विलिखति

ई) कदाचित् धातोः पूर्वं द्वित्राः उपसर्गाः अपि भवन्ति ।

यथा – प्रति + आ + गच्छति – प्रत्यागच्छति

निर् + आ + करोति – निराकरोति

सम् + उत् + आ + हरति – समुदाहरति

वि + अव + स्थापयति – व्यवस्थापयति

उ) उपसर्गकारणतः कदाचित् परस्मैपदिधातुः आत्मनेपदिरूपम्, आत्मनेपदिधातुः परस्मैपदिरूपं च प्राप्नोति ।

यथा - अ) वि + जयति (परस्मैपदी) – विजयते (आत्मनेपदी)

प्र + तिष्ठति (परस्मैपदी) – प्रतिष्ठते (आत्मनेपदी)

वि + क्रीणाति (परस्मैपदी) – विक्रीणीते (आत्मनेपदी)

आ) वि + रमते (आत्मनेपदी) - विरमति (परस्मैपदी)

www.thearyasamaj.org

## अभ्यासः

1. उदाहरणानुगुणम् उपसर्गसहितवाक्यानि रचयन्तु –

उदा॰ – छात्रः गृहम् आगच्छति । (आ + गम्)

१. भक्तः देवं ............................। (प्र + नम्)
२. प्रधानमन्त्री विदेशात् ..................। (प्रति + आ + गम्)
३. सैनिकाः शत्रून् .......................। (सम् + हृ)
४. माता पुत्रान् ..........................। (परि + पाल्)
५. एषः वस्त्रं ..........................। (प्र + क्षाल्)
६. गुरवः छात्रान् ........................। (परि + प्रच्छ)
७. विष्णुः क्षीरसागरम् ....................। (अधि + वस्)
८. कवि काव्यं .........................। (वि + लिख)
९. वानरः वारं वारं ....................। (उत् + पत्)
१०. सा सखीम् ..........................। (उप + हस्)
११. सः पाठ .......... ...............। (वि + स्मृ)
१२. बालिके चित्रणि .....................। (सम् + ग्रह्)
१३. हिन्दुः धर्मम् .........................। (अनु + सृ)
१४. गङ्गा हिमालयात् ......................। (निस् + सृ)
१५. वृक्षः सर्वान् .........................। (उप् + कृ)

उच्चैः पठन्तु, जानन्तु च –

| उपसर्गसहितक्रियाः | लङ्रूपाणि | क्तवतुप्रत्ययान्तरूपाणि पुंलिङ्गे |
|---|---|---|
| आगच्छति | आ + अगच्छत् - आगच्छत् | आ + गतवान् - आगतवान् |
| आनयति | आ + अनयत् - आनयत् | आ + नीतवान् - आनीतवान् |
| प्रतिवदति | प्रति + अवदत् - प्रत्यवदत् | प्रति + उदितवान् - प्रत्युदितवान् |
| निराकरोति | निर् + आ + अकरोत् - निराकरोत् | निर् + आ + कृतवान् - निराकृतवान् |
| अनुकरोति | अनु + अकरोत् - अन्वकरोत् | अनु + कृतवान् - अनुकृतवान् |
| प्रविशति | प्र + अविशत् - प्राविशत् | प्र + विष्टवान् - प्रविष्टवान् |
| विलिखति | वि + अलिखत् - व्यलिखत् | वि + लिखितवान् - विलिखितवान् |
| परिहरति | परि + अहरत् - पर्यहरत् | परि + हृतवान् - परिहृतवान् |
| अवगच्छति | अव + अगच्छत् - अवागच्छत् | अव + गतवान् - अवगतवान् |

www.thearyasamaj.org

2. उदाहरणं दृष्ट्वा रिक्तस्थानं पूरयन्तु -

| | लङ्‌रूपाणि | क्तवतुरूपाणि पुंलिङ्गे |
|---|---|---|
| आहरति | आ + अहरत् - आहरत् | आ + हृतवान् - आहृतवान् |
| आगच्छति | ............... - ............... | ............... - ............... |
| उत्तिष्ठति | उत् + अतिष्ठत् - उदतिष्ठत् | उत् + स्थितवान् - उत्थितवान् |
| अनुगच्छति | अनु + अगच्छत् - अन्वगच्छत् | ............... - ............... |
| अनुसरति | ............... - ............... | ............... - ............... |
| प्रहरति | प्र + अहरत् - प्राहरत् | प्र + हृतवान् - प्रहृतवान् |
| प्रक्षालयति | ............... - ............... | ............... - ............... |
| विहरति | ............... - ............... | ............... - ............... |
| परित्यजति | ........... - पर्यत्यजत् | ............... - ............... |
| निक्षिपति | ........... - न्यक्षिपत् | ............... - ............... |

3. उपसर्गयुक्तैः लङ्लकाररूपैः वाक्यानि पूरयन्तु -

१. युवकाः ग्रामात् आगच्छन् । (आ + गम्)
२. शिशुः मातरम् ............ ..................। (अनु + सृ)
३. भगिनी पुस्तकानि कपाटिकायाम् ...............। (नि + क्षिप्)
४. अहं लेखं ..................................। (वि + लिख्)
५. वयं नियमान् ..................................। (परि+ पाल्)
६. दुष्यन्तः शकुन्तलां ...........................। (वि + स्मृ)
७. जनाः देवम् ..................................। (अव + नम्)
८. शिक्षकः छात्रस्य समस्यां .......................। (परि + हृ)

4. उपसर्गयुक्तैः क्तवतुप्रत्ययान्तरूपैः (पुंलिङ्गे) वाक्यानि पूरयन्तु -

१. बालकः ज्येष्ठान् अनुकृतवान् । (अनु + कृ)
२. वानराः वृक्षात् ..................................। (नि + पत्)
३. अभियन्ता अनुत्तमं निर्माणं .......................। (निर् + आ + कृ)
४. ते प्रातःकाले शीघ्रम् ..........................। (उत् + स्था)
५. भीमः दुर्योधनं गदया ...........................। (प्र + हृ)
६. हनूमान् हिमालयात् औषधम् ......................। (आ + नी)
७. बालिका विषयम् ..............................। (अव + गम्)

www.thearyasamaj.org

# २४ द्वितीयाविभक्तिः

पश्यन्तु, उच्चैः पठन्तु च –







| | | |
|---|---|---|
| छात्रः अस्ति । | ग्रन्थः अस्ति । | छात्रः ग्रन्थं पठति । |
| युवकः – | कविता | युवकः कवितां लिखति । |
| बालिका – | लेखनी | बालिका लेखनीं क्रीणाति । |

१. शिक्षकः विद्यालयं गच्छति ।
२. युवकः घटीं पश्यति ।
३. महिला मन्दिरं गच्छति ।
४. एषः भगवद्गीतां स्मरति ।
५. सा श्लोकं जानाति ।
६. अहं रोटिकां खादामि ।
७. शिशुः दुग्धं पिबति ।
८. पर्यटकः नगरीं पश्यति ।
९. बालिका गुरुं पृच्छति ।
१०. भक्तः गणपतिम् अर्चति ।

एतानि रूपाणि उच्चैः पठन्तु –

| प्रथमाविभक्तिः | द्वितीयाविभक्तिः | | |
|---|---|---|---|
| | एकवचनम् | द्विवचनम् | बहुवचनम् |
| बालकः | बालकम् | बालकौ | बालकान् |
| बालिका | बालिकाम् | बालिके | बालिकाः |
| लेखनी | लेखनीम् | लेखन्यौ | लेखनीः |
| पुस्तकम् | पुस्तकम् | पुस्तके | पुस्तकानि |

## अभ्यासः

1. कोष्ठकाधारेण द्वितीयाविभक्तिं प्रयुज्य वाक्यानि पूरयन्तु –



www.thearyasamaj.org

| | | |
|---|---|---|
| क - छात्रः पाठं पठति । | छात्रः पाठौ .......... । | छात्रः पाठान् पठति । |
| ख - सम्पादकौ..........प्रेषयतः । | ..................... । | सम्पादकौ.............। |
| ग - वयं...............क्रीणीमः । | ..................... । | .....................। |
| घ - ........................ । | ..................... । | .....................। |

एतानि रूपाणि उच्चैः पठन्तु -

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| सैनिकः | सैनिकम् | सैनिकौ | सैनिकान् |
| मयूरः | मयूरम् | मयूरौ | मयूरान् |
| कविः | कविम् | कवी | कवीन् |
| ऋषिः | ऋषिम् | ऋषी | ऋषीन् |
| उपाधिः | उपाधिम् | उपाधी | उपाधीन् |
| शिशुः | शिशुम् | शिशू | शिशून् |
| गुरुः | गुरुम् | गुरू | गुरून् |
| पिता | पितरम् | पितरौ | पितॄन् |
| भ्राता | भ्रातरम् | भ्रातरौ | भ्रातॄन् |
| नेता | नेतारम् | नेतारौ | नेतॄन् |
| अधिवक्ता | अधिवक्तारम् | अधिवक्तारौ | अधिवक्तॄन् |
| महिला | महिलाम् | महिले | महिलाः |
| मापिका | मापिकाम् | मापिके | मापिकाः |
| मतिः | मतिम् | मती | मतीः |
| मूर्तिः | मूर्तिम् | मूर्ती | मूर्तीः |
| भगिनी | भगिनीम् | भगिन्यौ | भगिनीः |
| द्रोणी | द्रोणीम् | द्रोण्यौ | द्रोणीः |
| धेनुः | धेनुम् | धेनू | धेनूः |
| रज्जुः | रज्जुम् | रज्जू | रज्जूः |
| फलम् | फलम् | फले | फलानि |
| भवनम् | भवनम् | भवने | भवनानि |
| दधि | दधि | दधिनी | दधीनि |

www.thearyasamaj.org

2. उदाहरणं दृष्ट्वा रिक्तस्थानं पूरयन्तु -

**द्वितीयाविभक्तिः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| सौचिकः | सौचिकम् | सौचिकौ | सौचिकान् |
| दण्डदीपः | ............ | ............ | ............ |
| मुनिः | मुनिम् | मुनी | मुनीन् |
| राष्ट्रपतिः | ............ | ............ | ............ |
| अतिथिः | ............ | ............ | ............ |
| वेणुः | वेणुम् | वेणू | वेणून् |
| शत्रुः | ............ | ............ | ............ |
| पशुः | ............ | ............ | ............ |
| हिन्दुः | ............ | ............ | ............ |
| ज्ञाता | ज्ञातारम् | ज्ञातारौ | ज्ञातॄन् |
| अभियन्ता | ............ | ............ | ............ |
| भर्ता | ............ | ............ | ............ |
| हर्ता | ............ | ............ | ............ |
| शाटिका | शाटिकाम् | शाटिके | शाटिकाः |
| परिचारिका | ............ | ............ | ............ |
| जतुका | ............ | ............ | ............ |
| नीतिः | नीतिम् | नीती | नीतीः |
| तिथिः | ............ | ............ | ............ |
| मुष्टिः | ............ | ............ | ............ |
| पद्धतिः | ............ | ............ | ............ |
| अङ्कनी | अङ्कनीम् | अङ्कन्यौ | अङ्कनीः |
| कर्तरी | ............ | ............ | ............ |
| वाणी | ............ | ............ | ............ |
| नर्तकी | ............ | ............ | ............ |
| वारि | वारि | वारिणी | वारीणि |

www.thearyasamaj.org

3. उदाहरणं दृष्ट्वा रिक्तस्थानानि पूरयन्तु -

| | | | |
|---|---|---|---|
| १. पिता | (कार्यालयः) | कार्यालयं | गच्छति । |
| २. माता | (मयूरौ) | .................... | पश्यति । |
| ३. कुम्भकाराः | (घटाः) | .................... | निर्मान्ति । |
| ४. छात्रा | (उपाधिः) | .................... | प्राप्नोति । |
| ५. जनाः | (ऋषयः) | .................... | पूजयन्ति । |
| ६. एताः | (गुरुः) | .................... | प्रणमन्ति । |
| ७. सः | (मूर्तिः) | .................... | निर्माति । |
| ८. एते | (घट्यौ) | .................... | क्रीणन्ति । |
| ९. बालकः | (माता) | .................... | पृच्छति । |
| १०. पत्रकारः | (वार्ताः) | .................... | प्रकाशयति । |

4. चित्रं दृष्ट्वा वाक्यानि लिखन्तु -

१. त्वं कथां लिखसि ।

२. युवां ............................।

३. ....................................।

४. अहं ..............................।

५. ....................................।

६. ....................................।

| त्वम् | युवाम् | यूयम् |
|---|---|---|
| ↓ | ↓ | ↓ |
| (कथा) | (कविते) | (समाचाराः) |
| ↓ | ↓ | ↓ |
| लिखसि | लिखथः | लिखथ |
| लिखामि | लिखावः | लिखामः |
| ↑ | ↑ | ↑ |
| (गीते) | (पत्राणि) | (कादम्बरी) |
| ↑ | ↑ | ↑ |
| अहम् | आवाम् | वयम् |

5.

कोष्ठकम्

| | | | | |
|---|---|---|---|---|
| १. सिंहाः | २. काव्यानि | ३. माले | ४. भवनानि | ५. देव्यः |
| ६. स्तुतिः | ७. रज्जुः | ८. त्रुटिः | ९. संस्कृतिः | १०. मूर्तयः |
| ११. वेणवः | १२. कवयः | १३. नेतारौ | १४. अध्येतारः | १५. घट्यः |
| १६. पुत्र्यः | १७. दिनदर्शिनी | १८. नियमाः | १९. बिलम् | २०. क्रीडनकानि |
| २१. गीतानि | २२. तैलम् | २३. द्विचक्रिका | २४. मृगाः | २५. भगवद्गीता |

www.thearyasamaj.org

कोष्ठके विद्यमानानां शब्दानां द्वितीयाविभक्तिरूपैः रिक्तस्थानानि रचयन्तु -

१. जनाः सिंहान् पश्यन्ति ।
२. ते ................................ पठन्ति ।
३. भगिनी ................................ रचयति ।
४. कर्मकराः ................................ निर्मान्ति ।
५. त्वं ................................ पूजयसि ।
६. युवत्यः ................................ कुर्वन्ति ।
७. आपणिकः ................................ ददाति ।
८. शिक्षकौ ................................ पश्यतः ।
९. वयं ................................ जानीमः ।
१०. हिन्दवः ................................ पूजयन्ति ।
११. सङ्गीतज्ञाः ................................ वादयन्ति ।
१२. अहं ................................ जानामि ।
१३. पत्रकाराः ................................ पृच्छन्ति ।
१४. भवन्तः ................................ पृच्छन्तु ।
१५. युवकौ ................................ क्रीणीतः ।
१६. मातरः ................................ आह्वयन्ति ।
१७. सर्वे ................................ पश्यन्ति ।
१८. वयं ................................ पालयामः ।
१९. सर्पाः ................................ प्रविशन्ति ।
२०. शिशवः ................................ इच्छन्ति ।
२१. आवां ................................ श्रृणुवः ।
२२. चालकः याने ................................ पूरयन्ति ।
२३. बालिका ................................ चालयति ।
२४. सिंहाः ................................ भक्षयन्ति ।
२५. श्रीकृष्णः ................................ अवदत् ।

www.thearyasamaj.org

## सर्वनामशब्दानां द्वितीयाविभक्तिप्रयोगः

उच्चैः पठन्तु, जानन्तु च -

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| (सः) ↓ तम् | (सा) ↓ ताम् | (एषः) ↓ एतम् | (एषा) ↓ एताम् | (अहम्) ↓ माम् | (भवान्) ↓ भवन्तम् | (भवती) ↓ भवतीम् | (त्वम्) ↓ त्वाम् |
| (तौ) ↓ तौ | (ते) ↓ ते | (एतौ) ↓ एतौ | (एते) ↓ एते | (आवां) ↓ आवाम् | (भवन्तौ) ↓ भवन्तौ | (भवत्यौ) ↓ भवत्यौ | (युवाम्) ↓ युवाम् |
| (ते) ↓ तान् | (ताः) ↓ ताः | (एते) ↓ एतान् | (एताः) ↓ एताः | वयम् ↓ अस्मान् | (भवन्तः) ↓ भवतः | (भवत्यः) ↓ भवतीः | (यूयम्) ↓ युष्मान् |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| (तत्) ↓ तत् | (एतत्) ↓ एतत् | (कः) ↓ कम् | (का) ↓ काम् | (किम्) ↓ किम् | (सर्वः) ↓ सर्वम् | (सर्वा) ↓ सर्वाम् | (सर्वम्) ↓ सर्वम् |
| (ते) ↓ ते | (एते) ↓ एते | (कौ) ↓ कौ | (के) ↓ के | (के) ↓ के | (सर्वौ) ↓ सर्वौ | (सर्वे) ↓ सर्वे | (सर्वे) ↓ सर्वे |
| (तानि) ↓ तानि | (एतानि) ↓ एतानि | (के) ↓ कान् | (काः) ↓ काः | (कानि) ↓ कानि | (सर्वे) ↓ सर्वान् | (सर्वाः) ↓ सर्वाः | (सर्वाणि) ↓ सर्वाणि |

एतानि वाक्यानि उच्चैः पठन्तु -

१. अध्यापकः तं पृच्छति ।
२. पिता ताम् आह्वयति ।
३. बालकः एतां पश्यति ।
४. भगिनी मां प्रेषयति ।
५. सः भवन्तम् इच्छति ।
६. रामः भवतीं दृष्टवान् ।
७. एषा तौ जानाति ।
८. वयम् एताः कथाः पठामः ।
९. भ्राता कं वदति ?
१०. कपिः तानि फलानि खादति ।
११. जनाः काः नगरीः पश्यन्ति ?
१२. अहं त्वां पृच्छामि ।
१३. सतीशः ते पेटिके नयति ।
१४. धर्मः अस्मान् रक्षति ।
१५. कः युवां पालयति ?
१६. देवः युष्मान् रक्षतु ।

www.thearyasamaj.org

## अभ्यासः

1. उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु -

| प्रथमा | द्वितीया | प्रथमा | द्वितीया | प्रथमा | द्वितीया |
|---|---|---|---|---|---|
| सः | तम् | अहम् | ............ | त्वम् | ............ |
| सा | ............ | भवत्यः | ............ | एषा | ............ |
| कौ | ............ | युवाम् | ............ | यूयम् | ............ |
| तानि | ............ | ते (स्त्री.) | ............ | ते (पु.) | ............ |

2. कोष्ठकस्थां सङ्ख्यां दृष्ट्वा वाक्येषु द्वितीयाविभक्तिं योजयन्तु -

प्रथमाविभक्तिः

| | | | | |
|---|---|---|---|---|
| १ भवान् | ८ वयम् | ११ एते(स्त्री.) | ३ तानि | ६ का |
| ४ सर्वाणि | १५ युवाम् | २ भवती | १४ यूयम् | १० सर्वा |
| १३ एताः | ५ भवन्तौ | ९ सर्वः | ७ के (पु.) | १२ एतौ |

१. युवकः भवन्तं प्रेषयति ।
२. माता ................ आह्वयति ।
३. बालकाः ........ पुस्तकानि क्रीणन्ति ।
४. कपयः ........ फलानि खादन्ति ।
५. अहं .................. न विस्मरामि ।
६. एषः .................. अवदत् ?
७. कवयः ............ ग्रन्थान् इच्छन्ति ।
८. देवः अस्मान् रक्षति ।
९. सः ............... गुडं खादिष्यति ।
१०. भवान् ......... व्यवस्थां करोतु ।
११. कुक्कुरः ............ रोटिके अखादत् ।
१२. जनकः ............... पालयति ।
१३. यूयम् .............. सम्यक् जानीथ ।
१४. वयं .................. पश्यामः ।
१५. अधिवक्ता ................ पृच्छति ।

एतानि वाक्यानि पठन्तु –

१. भक्तः देवं ध्यायति । प्रश्नः – भक्तः कं ध्यायति ?
२. महिलाः मालां रचयन्ति । प्रश्नः – महिलाः कां रचयन्ति ?
३. सेवकः द्वारम् उद्घाटयति । प्रश्नः – सेवकः किम् उद्घाटयति ?
४. ऋषिः देवौ अर्चति । प्रश्नः – ऋषिः कौ अर्चति ?

www.thearyasamaj.org

५. छात्रः लेखन्यौ प्राप्नोति । — प्र० – छात्रः के प्राप्नोति ?
६. त्वं फले खादसि । — प्र० – त्वं के खादसि ?
७. कुम्भकारः घटान् निर्माति । — प्र० – कुम्भकारः कान् निर्माति ?
८. शिक्षकः बालिकाः पृच्छति । — प्र० – शिक्षकः काः पृच्छति ?
९. ते पुस्तकानि ददति । — प्र० – ते कानि ददति ?

3. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुर्वन्तु -

| | |
|---|---|
| १. दुष्यन्तः <u>शकुन्तलां</u> विस्मरति । | प्रश्नः – ................................ । |
| २. वयं <u>बन्धून्</u> स्मरामः । | प्र० – ................................ । |
| ३. कपयः <u>फलानि</u> खादन्ति । | प्र० – ................................ । |
| ४. महिला <u>शाटिके</u> क्रीणाति । | प्र० – ................................ । |
| ५. भवान् <u>भोजनं</u> परिवेषयति । | प्र० – ................................ । |
| ६. शिक्षकः <u>तं</u> बोधयति । | प्र० – शिक्षकः कं बोधयति ? |
| ७. तौ <u>इक्षू</u> खादतः । | प्र० – ................................ । |
| ८. भवत्यः <u>कथाः</u> चिन्तयन्ति । | प्र० – ................................ । |

## अवधेयम्

उपरितनवाक्येषु कर्मणः वचनानुगुणं प्रश्नाः दत्ताः सन्ति ।
किन्तु सामान्यव्यवहारे एवं प्रयोगाः दृश्यन्ते ।
यथा – किं खादति ? किं रचयति ? किं निर्माति ? किं ददाति ?
किं प्राप्नोति ? कुत्र गच्छति ?

एतं श्लोकम् उच्चैः पठन्तु -

रामं स्कन्दं हनूमन्तं वैनतेयं वृकोदरम् ।
शयने यः स्मरेन्नित्यं दुःस्वप्नस्तस्य नश्यति ।।

(यः शयनसमये रामं, कार्त्तिकेयं, हनूमन्तं, गरुडं, भीमं च स्मरति,
तस्य दुःस्वप्नाः न भवन्ति ।)

www.thearyasamaj.org

## उभयतः, परितः, विना– इत्यादीनां योगे द्वितीया

पश्यन्तु पठन्तु च –



नदीम् उभयतः गृहाणि सन्ति ।



उटजं परितः वृक्षाः सन्ति ।



छात्राः कोलाहलं विना पठन्ति ।

एतानि वाक्यानि पठन्तु –

१. मार्गम् उभयतः वृक्षाः भवन्ति ।
२. उत्पीठिकाम् उभयतः आसन्दाः सन्ति ।
३. शर्करां परितः पिपीलिकाः आगच्छन्ति ।
४. दीपं परितः प्रकाशः अस्ति ।
५. आचार्यं परितः शिष्याः सन्ति ।
६. जलं विना जीवनं न सम्भवति ।
७. सैनिकान् विना देशरक्षणं न भवति ।
८. महाराजम् उभयतः सैनिकाः चलन्ति ।
९. भवन्तं परितः के सन्ति ?
१०. मां विना भगिनी विद्यालयं न गच्छति ।

I. उदाहरणानुगुणं वाक्यानि पूरयन्तु –

१. ऋषिम् उभयतः नागरिकाः सन्ति । (ऋषिः)
२. ..................... परितः गृहाणि सन्ति । (कार्यालयः)
३.................... विना प्रकाशः न भवति । (भानुः)
४................. परितः महिलाः उपविशन्ति । (वधूः)
५. त्वां परितः बालाः सन्ति । (त्वम् ) ।
६. ..................... विना मित्रं न क्रीडति । (एषः)
७. भगिनी ........... विना भोजनं न करोति । (अवलेहं)
८. ................... परितः जनाः तिष्ठन्ति । (ऐन्द्रजालिकः)
९. .............. उभयतः श्रोतारः उपविशन्ति । (कविः)
१०.......................उभयतः नेत्रे स्तः । (नासिका)

www.thearyasamaj.org

## II. कोष्ठके दत्तानां शब्दानाम् आधारेण वाक्यानि रचयन्तु –

१. कार्यालयम् उभयतः मार्गाः सन्ति ।
२. ........................................।
३. ........................................।
४. ........................................।
५. ........................................।

| | | |
|---|---|---|
| कार्यालयः | | मार्गाः |
| नेतारः | | जनाः |
| नदी | उभयतः | सस्यानि |
| माता | | बालाः |
| जिह्वा | | दन्ताः |

६. .............. परितः ..................।
७........................................।
८. ........................................।
९. ........................................।
१०. ........................................।

| | | |
|---|---|---|
| शिशुः | | क्रीडनकानि |
| जनाः | | आरक्षकाः |
| क्रीडाङ्गणं | परितः | दर्शकाः |
| देवालयाः | | पुष्पाणि |
| अवकरः | | मक्षिकाः |

११. ............... विना मीनाः न जीवन्ति ।
१२. ....................जीवितुं न शक्यते ।
१३. ........................... न पठन्ति ।
१४. ........................... न शोभते ।
१५. ...........................न शोभते ।

| | | |
|---|---|---|
| जलम् | | मीनाः |
| वायुः | | प्राणिनः |
| अनुशासनम् | विना | छात्राः |
| लेखनी | | छात्रः |
| पुष्पाणि | | उद्यानम् |

## III. चित्रं दृष्ट्वा उभयतः, परितः च उपयुज्य वाक्यानि लिखन्तु –


लेखनी - अङ्कन्यौ

यथा - १. लेखनीम् उभयतः अङ्कन्यौ स्तः ।


फलं - पुष्पाणि

२. ....................................... ।


सञ्चिका - मापिके

३. ....................................... ।


गुडः - पिपीलिकाः

४. ....................................... ।


तालः - कुञ्चिके

५. ....................................... ।

www.thearyasamaj.org

# २८ गीतोपदेशप्रसङ्गः



महाभारतयुद्धं निश्चितम् आसीत् । युद्धं कर्तुम् इच्छन्तः कौरवाः पाण्डवाश्च कुरुक्षेत्रे युद्धभूमौ समवेताः अभवन् । आचार्यः भीष्मः कौरवाणां सेनापतिः आसीत् । द्रुपदपुत्रः धृष्टद्युम्नः पाण्डवानां सेनापतिः आसीत् । असङ्ख्याः क्षत्रियाः तत्र सम्मिलिताः आसन् । भीष्मः सिंहनादं कृत्वा शङ्खनादं कृतवान् । ततः सैनिकाः शङ्खान्, भेरीः, पणवान्, आनकान्, गोमुखान् च वादितवन्तः । पाण्डवाः अपि शङ्खनादं कृतवन्तः । अर्जुनः स्वस्य रथस्य सारथिं श्रीकृष्णम् उक्तवान् - ''अच्युत ! सेनयोः मध्ये मम रथं स्थापय । अत्र युद्धार्थम् उपस्थितान् सर्वान् अहं द्रष्टुम् इच्छामि'' इति ।

श्रीकृष्णः सेनयोः मध्ये रथं स्थापयित्वा उक्तवान् - ''पार्थ ! अत्र समवेतान् सर्वान् कुरून् पश्य'' इति ।

अर्जुनः तत्र पितॄन्, पितामहान्, आचार्यान्, मातुलान्, भ्रातॄन्, पुत्रान्, पौत्रान्, सखीन्, श्वशुरान्, सुहृदश्च दृष्टवान् । उपस्थितान् तान् सर्वान् बन्धून् दृष्ट्वा अर्जुनः परमं विषादं प्राप्तवान् । सः ''कृष्ण ! एते सर्वे मम बान्धवाः । एतान् अहं मारयितुं न इच्छामि । अहं युद्धं न करोमि'' इति उक्त्वा बाणं धनुः च विसृज्य रथे उपविष्टवान् ।

तदा श्रीकृष्णः तस्य अज्ञाननिवारणार्थं गीतोपदेशं कृतवान् । सः उक्तवान् - ''अर्जुन ! त्वम् अचिन्तनीयान् विषयान् मा चिन्तय । पण्डिताः गतासून्, अगतासून् च न अनुशोचन्ति । त्वमपि शोकं मा कुरु । एतान् सर्वान् अहमेव पूर्वं मारितवान् अस्मि । त्वं निमित्तमात्रं भव । कर्मकरणे केवलं तव अधिकारः, न तु फले । अतः त्वं फलविषये मा चिन्तय । कर्म कुरु'' इति ।

ततः श्रीकृष्णः अर्जुनाय विश्वरूपं दर्शितवान् । अर्जुनः दिव्यं चक्षुः प्राप्य श्रीकृष्णस्य देहे सर्वान् देवान् भूतविशेषसमूहान् ऋषीन् ब्रह्माणम् ईश्वरं च दृष्टवान् ।

विश्वरूपदर्शनेन अर्जुनस्य मोहः नष्टः । सः ज्ञानं प्राप्तवान् । ''भगवन् ! मम सन्देहः नष्टः । अहं तव वचनं करिष्यामि'' इति उक्तवान् । युद्धं कर्तुं सः सन्नद्धः अभवत् ।

www.thearyasamaj.org

## अभ्यासः

1. एतेषां प्रश्नानाम् उत्तरं लिखन्तु -

१. के युद्धभूमौ समवेताः ?

........................................................................ ।

२. पाण्डवानां सेनापतिः कः आसीत् ?

........................................................................ ।

३. युद्धे कति क्षत्रियाः उपस्थिताः आसन् ?

........................................................................ ।

४. धृष्टद्युम्नः कस्य पुत्रः ?

........................................................................ ।

५. कः शङ्खनादं कृतवान् ?

........................................................................ ।

६. कृष्णः अर्जुनं किम् उक्तवान् ?

........................................................................ ।

७. सर्वान् कः पूर्वमेव मारितवान् ?

........................................................................ ।

८. कृष्णः किमर्थं गीतोपदेशं कृतवान् ?

........................................................................ ।

९. सैनिकाः कान् वादितवन्तः ?

........................................................................ ।

१०. अर्जुनस्य मोहः कथं नष्टः ?

........................................................................ ।

११. श्रीकृष्णः अर्जुनाय किं दर्शितवान् ?

........................................................................ ।

१२. अर्जुनः किमर्थं कौरवान् मारयितुं न इच्छति ?

........................................................................ ।

१३. अर्जुनः कान् दृष्टवान् ?

........................................................................ ।

१४. अर्जुनः कृष्णं रथं सेनयोः मध्ये स्थापयितुं किमर्थम् उक्तवान् ?

........................................................................ ।

www.thearyasamaj.org

2. एतेषां शब्दानां विभक्तिं, वचनं च लिखन्तु -

१. पाण्डवानाम् - षष्ठीविभक्तिः बहुवचनम् ।
२. सेनयोः - ..........
३. युद्धभूमौ - ..........
४. विषयान् - ..........
५. विश्वरूपदर्शनेन - ..........
६. कौरवाणाम् - ..........
७. अर्जुनाय - ..........
८. भगवान् - ..........
९. रथे - ..........
१०. पितॄन् - ..........

3. एतान् शब्दान् पठित्वा एतेषु भूतकालार्थकानां शब्दानां पुरतः ✓ चिह्नं कुर्वन्तु –

| | | | | |
|---|---|---|---|---|
| उक्तवान् | ✓ आसन् | कृतवन्तः | कुरु | दुष्टम् |
| स्थापय | आसीत् | चिन्तय | प्राप्तवान् | कृत्वा |
| इच्छामि | कृतवान् | दर्शितवान् | उपविष्टवान् | स्थापयित्वा |
| पश्य | करोमि | अनुशोचति | अस्मि | विसृज्य |
| वादितवन्तः | अभवत् | मारितवान् | भव | उक्त्वा |

4. पाठं पठित्वा एतान् विभक्त्यन्तान् शब्दान् चित्वा लिखन्तु -

| | | | | | |
|---|---|---|---|---|---|
| द्वितीयान्ताः - | शङ्खान् | | | | |
| | | | | | |
| षष्ठ्यन्ताः - | कौरवाणाम् | | | | |
| | | | | | |
| सप्तम्यान्ताः - | कुरुक्षेत्रे | | | | |
| | | | | | |

www.thearyasamaj.org

# २६ भविष्यत्कालः

लृट्लकारः

एतत् सम्भाषणम् उच्चैः पठन्तु –




धीरः – सुरेश ! नमो नमः ।

सुरेशः – नमो नमः । धीर ! अद्य कः वासरः अस्ति ?

धीरः – अद्य शनिवासरः अस्ति ।

सुरेशः – अहो ! अद्य शनिवासरः अस्ति, तदा तु श्वः रविवासरः भविष्यति ।

धीरः – आम् । अद्य शनिवासरः अस्ति, श्वः रविवासरः भविष्यति ।

सुरेशः – अधुना अहं विद्यालयं गच्छामि । पठामि च ।

धीरः – भवान् श्वः विद्यालयं न गमिष्यति । गृहे एव पठिष्यति । एवं खलु ?

सुरेशः – आम् । श्वः अहं गृहे पठिष्यामि । सायङ्काले मित्रैः सह क्रीडिष्यामि ।

एतानि वाक्यानि उच्चैः पठन्तु, अवगच्छन्तु च –

१. अद्य सोमवासरः अस्ति । श्वः मङ्गलवासरः भविष्यति ।

२. श्वः अहं संस्कृतं पठितुं संस्कृतशिबिरं गमिष्यामि ।

३. अग्रिमे मासे अहं संस्कृतस्य परीक्षां लेखिष्यामि ।

४. अग्रिमे वर्षे अहं संस्कृतभारत्याः विस्तारकः भविष्यामि ।

५. अद्य अहं मौखिकम् अभ्यासं करोमि, श्वः लेखनस्य अभ्यासं करिष्यामि ।

६. त्वम् अद्य सायङ्काले किं करिष्यसि ?

७. सा अपि श्वः संस्कृतपाठं पठिष्यति ।

८. ते अत्र कदा आगमिष्यन्ति, पठिष्यन्ति च ?

९. ताः श्वः स्वविद्यालये संस्कृत-विज्ञानप्रदर्शिनीं द्रक्ष्यन्ति ।

१०. तौ 'प्राइड् आफ् इण्डिया' पुस्तकं स्वीकरिष्यतः ।

www.thearyasamaj.org

उच्चैः पठन्तु, जानन्तु च -

चल्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | चलिष्यति | चलिष्यतः | चलिष्यन्ति |
| मध्यमपुरुषः | चलिष्यसि | चलिष्यथः | चलिष्यथ |
| उत्तमपुरुषः | चलिष्यामि | चलिष्यावः | चलिष्यामः |

गम्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| मध्यमपुरुषः | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| उत्तमपुरुषः | गमिष्यामि | गमिष्यावः | गमिष्यामः |

दृश्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | द्रक्ष्यति | द्रक्ष्यतः | द्रक्ष्यन्ति |
| मध्यमपुरुषः | द्रक्ष्यसि | द्रक्ष्यथः | द्रक्ष्यथ |
| उत्तमपुरुषः | द्रक्ष्यामि | द्रक्ष्यावः | द्रक्ष्यामः |

कृ

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करिष्यति | करिष्यतः | करिष्यन्ति |
| मध्यमपुरुषः | करिष्यसि | करिष्यथः | करिष्यथ |
| उत्तमपुरुषः | करिष्यामि | करिष्यावः | करिष्यामः |

## कानिचन विशेषरूपाणि

| | | |
|---|---|---|
| दा - दास्यति | प्रच्छ - प्रक्ष्यति | इष् - एषिष्यति |
| ज्ञा - ज्ञास्यति | शक् - शक्ष्यति | क्री - क्रेष्यति |
| श्रु - श्रोष्यति | उत् + स्था – उत्थास्यति | नी - नेष्यति |
| लिख् - लेखिष्यति | ग्रह - ग्रहीष्यति | नम् - नंस्यति |
| मिल् - मेलिष्यति | उप - विश – उपवेक्ष्यति | नृत् - नर्तिष्यति |

www.thearyasamaj.org

## अभ्यासः

I. उदाहरणम् अनुसृत्य भविष्यत्काले रूपाणि लिखन्तु –

| धातुः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पठ् (प्र.पु) | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| चल् (प्र.पु) | ........ | .......... | चलिष्यन्ति |
| गम् (म.पु) | ....... | .......... | गमिष्यथ |
| क्रीड् (उ.पु) | क्रीडिष्यामि | .......... | .......... |
| खाद् (प्र.पु) | ........ | खादिष्यतः | .......... |
| धाव् (म.पु) | ......... | ........ | धाविष्यथ |
| नम् (उ.पु) | नंस्यामि | ....... | ......... |
| धृ (प्र.पु) | ........ | धरिष्यतः | ......... |
| हृ (म.पु) | ......... | ......... | हरिष्यथ |
| स्मृ (उ.पु) | स्मरिष्यामि | ........... | ......... |
| वद् (प्र. पु) | ......... | वदिष्यतः | ........ |
| प्रच्छ (म.पु) | ......... | .......... | प्रक्ष्यथ |
| दृश् (उ.प्र) | ........ | .......... | द्रक्ष्यामः |
| नी (प्र.पु) | नेष्यति | ......... | ......... |
| मिल् (म.पु) | ......... | मेलिष्यथः | ......... |
| पा (उ.पु) | .......... | ........ | पास्यामः |
| क्षाल् (प्र.पु) | ........... | क्षालयिष्यतः | ......... |
| रुद् (म.पु) | रोदिष्यसि | ......... | ......... |
| वद् (उ.पु) | ........ | ....... | वदिष्यामः |
| भू (प्र.पु) | ......... | ............ | भविष्यन्ति |
| कृ (उ.पु) | करिष्यामि | .............. | .......... |
| स्था (उ.पु) | ............... | स्थास्यावः | .......... |
| स्थाप् (प्र.पु) | स्थापयिष्यति | ........... | .......... |
| नृत् (म.पु) | ............ | .............. | नर्तिष्यथ |
| तृ (उ.पु) | ........... | तरिष्यावः | .......... |

www.thearyasamaj.org

I. एतेषु वाक्येषु लट्लकाररूपाणां स्थाने लृट्लकाररूपाणि प्रयुज्य वाक्यानि पुनः लिखन्तु -

| लट् | लृट् |
|---|---|
| १. ते फलरसं पिबन्ति । | ते फलरसं पास्यति । |
| २. वयं श्लोकं लिखामः । | ................................... |
| ३. ताः तत्र पश्यन्ति । | ................................... |
| ४. ते कुत्र पश्यतः ? | ................................... |
| ५. आवां कथां शृणुवः । | ................................... |
| ६. सः कदा आगच्छति ? | ................................... |
| ७. तौ नमतः । | ................................... |
| ८. सा वार्तां शृणोति । | ................................... |
| ९. त्वं जलं पिबसि । | ................................... |
| १०. यूयम् अपि जलं पिबथ । | ................................... |
| ११. यूयम् आगच्छथ । | ................................... |
| १२. वयम् अभ्यासपुस्तकं पठामः । | ................................... |
| १३. आवां तत्र तिष्ठावः । | ................................... |
| १४. वयम् अपि तत्र पश्यामः । | ................................... |
| १५. बालाः प्रश्नं पृच्छन्ति । | ................................... |
| १६. युवां कार्यं कुरुथः । | ................................... |
| १७. ताः सम्भाषणसोपानं क्रीणन्ति । | ................................... |
| १८. ते अपि सम्भाषणसोपानं क्रीणीतः । | ................................... |
| १९. ते कदा नृत्यतः ? | ................................... |
| २०. ते पुस्तकम् इच्छन्ति । | ................................... |

www.thearyasamaj.org

2. उदाहरणानुसारं प्रश्नस्य उत्तरं लिखन्तु – "भवान् / भवती श्वः ........"

| | |
|---|---|
| १. किं खादिष्यति ? | अहं श्वः पूरिकां खादिष्यामि । |
| २. प्रातः कदा उत्थास्यति ? | ................................ |
| ३. कुत्र गमिष्यति ? | ................................ |
| ४. मध्याह्ने कुत्र गमिष्यति ? | ................................ |
| ५. सायङ्काले किं करिष्यति ? | ................................ |
| ६. गृहं कदा आगमिष्यति ? | ................................ |
| ७. भोजनं कदा भविष्यति? | ................................ |
| ८. अल्पाहारे किं पास्यति ? | ................................ |
| ९. किं सायङ्काले किञ्चित् क्रेष्यति ? | ................................ |
| १०. किं सङ्गीतं श्रोष्यति ? | ................................ |

3. उदाहरणानुसारं वदन्तु लिखन्तु च -

१. यदि अद्य सोमवासरः – श्वः कः वासरः भविष्यति ?
उत्तरम् - यदि अद्य सोमवासरः तर्हि श्वः मङ्गलवासरः भविष्यति ।

२. यदि भवान् / भवती / अद्य गणितं पठति तर्हि संस्कृतं कदा पठिष्यति ?
उत्तरम् - ........................................................

३. यदि तव भ्राता अद्य न आगतः तर्हि कदा आगमिष्यति ?
उत्तरम् - ........................................................

४. यदि त्वम् अधुना न क्रीडसि तर्हि कदा क्रीडिष्यसि ?
उत्तरम् - ........................................................

५. यदि ताः अद्य न वदन्ति तर्हि कदा वदिष्यन्ति ?
उत्तरम् - ........................................................

६. यदि भवन्तः / भवत्यः अत्र न पश्यन्ति तर्हि कुत्र द्रक्ष्यन्ति ?
उत्तरम् - ........................................................

www.thearyasamaj.org

# २७ तदा किं किं भविष्यति ?

*लृट्लकारः*

*(सीतायाः अन्वेषणार्थम् आञ्जनेयः समुद्रलङ्घनं कृत्वा लङ्काम् आगतवान् । तत्र सर्वेषु भवनेषु सीतायाः अन्वेषणं कृतवान् । परन्तु सीतां न दृष्टवान् । तदा निराशतया सः एवं चिन्तयति ।)*

यदि अहं सीताम् अदृष्ट्वा एव किष्किन्धां गमिष्यामि तर्हि कः पुरुषार्थः साधितः भविष्यति ? सुग्रीवः तदा मां किं वा वदिष्यति ? अन्ये वानराः अपि किं वा वदिष्यन्ति ? अहम् अपि 'सीता न लब्धा' इति कथं रामं वदिष्यामि ? यदि अहं तथा वदिष्यामि तदा रामः प्राणान् त्यक्ष्यति । तदा लक्ष्मणः अपि मरिष्यति । तां वार्तां श्रुत्वा भरतः शत्रुघ्नः च प्राणान् त्यक्ष्यतः । ततः पुत्रशोकेन कौसल्या सुमित्रा कैकेयी चापि मरिष्यन्ति । रामस्य मरणं ज्ञात्वा सुग्रीवः प्राणान् न धरिष्यति । ततः तस्य पत्नी रुमा, वालिपत्नी तारा च प्राणान् न धरिष्यतः । तत्पश्चात् कुमारः अङ्गदः मरणं प्राप्स्यति । तदा तस्य प्रियाः वानराः दुःखेन मुष्टिभिः मस्तकान् ताडयिष्यन्ति । प्राणत्यागं च करिष्यन्ति । केऽपि वानराः ततः क्रीडासुखं न अनुभविष्यन्ति । ते शिलाग्रेभ्यः अधः पतिष्यन्ति, विषं वा पास्यन्ति, उपवासव्रतं वा आचरिष्यन्ति । एवं सम्पूर्णः रघुवंशः वानरवंशश्च विनङ्क्ष्यतः ।

अतः अहं सीताम् अदृष्ट्वा इतः किष्किन्धां न गमिष्यामि । यतः अहं सुग्रीवं द्रष्टुं न शक्ष्यामि । अहम् अत्रैव वानप्रस्थव्रतं ग्रहीष्यामि । ततः चितां प्रवेक्ष्यामि । अथवा जलं प्रवेक्ष्यामि । तदा मम शरीरं मृगाः काकाः वा भक्षयिष्यन्ति । अथवा अहं तापसः भविष्यामि । अत्रैव जीविष्यामि । नैव प्रतिगमिष्यामि ।

*(एवं बहुविधं चिन्तनं कृत्वा अन्ते आञ्जनेयः 'अहम् अशोकवने अन्वेषणं न कृतवान् । तत्रापि करोमि' इति निश्चयं कृत्वा अशोकवनं गच्छति । तत्र सीतां पश्यति ।)*

www.thearyasamaj.org

## अभ्यासः

### 1. एतेषां प्रश्नानाम् उत्तरं लिखन्तु -

१. पुत्रशोकेन काः मरिष्यन्ति ? ------------------------------
२. वानराः दुःखेन किं करिष्यन्ति ? ------------------------------
३. आञ्जनेयः किमर्थं लङ्कां गतवान् ? ------------------------------
४. रुमा कस्य पत्नी ? ------------------------------
५. रामस्य वंशः कः ? ------------------------------
६. अन्ते आञ्जनेयः किं करोति ? ------------------------------

### 2. एतेषाम् उत्तरवाक्यानां प्रश्ननिर्माणं कुर्वन्तु -

१. आञ्जनेयः अशोकवने सीतां पश्यति ।

...................................................................... ।

२. वार्तां श्रुत्वा भरतः, शत्रुघ्नः च प्राणान् त्यक्ष्यतः ।

...................................................................... ।

३. वानराः मुष्टिभिः मस्तकान् ताडयिष्यन्ति ।

...................................................................... ।

४. वानराः क्रीडासुखं न अनुभविष्यन्ति ।

...................................................................... ।

५. आञ्जनेयः सर्वेषु भवनेषु सीतायाः अन्वेषणं कृतवान् ।

...................................................................... ।

### 3. वर्तमानरूपाणि लिखन्तु -

१. यदि अहं सीताम् अदृष्ट्वा एव गमिष्यामि तर्हि कः पुरुषार्थः साधितः भविष्यति ?

------------------------------------------------------------

२. सुग्रीवः तदा मां किं वा वदिष्यति ?

------------------------------------------------------------

३. रामस्य मरणं श्रुत्वा सुग्रीवः प्राणान् न धरिष्यति ?

------------------------------------------------------------

४. यदि अहं तथा वदिष्यामि तदा रामः प्राणान् त्यक्ष्यति ।

------------------------------------------------------------

www.thearyasamaj.org

५. तत्पश्चात् कुमारः अङ्गदः मरणं प्राप्स्यति ।

..........................................................................................

६. केऽपि वानराः क्रीडासुखं न अनुभविष्यन्ति ।

..........................................................................................

७. तदा वानराः दुःखेन मुष्टिभिः मस्तकान् ताडयिष्यन्ति, प्राणत्यागं च करिष्यन्ति ।

..........................................................................................

८. वानराः शिलाग्रेभ्यः अधः पतिष्यन्ति, विषं वा पास्यन्ति, उपवासं वा आचरिष्यन्ति ।

..........................................................................................

९. अहं सुग्रीवं द्रष्टुं न शक्ष्यामि, अत्रैव वानप्रस्थव्रतं ग्रहीष्यामि ।

..........................................................................................

१०. ततः चितां प्रवेक्ष्यामि, अथवा अत्रैव जीविष्यामि, नैव प्रतिगमिष्यामि ।

..........................................................................................

## 4. एतेषु वर्तमानकाल–भूतकाल–भविष्यत्कालक्रियापदरूपाणि पृथक् लिखन्तु -

(आगतवान्, विनङ्क्ष्यतः, दृष्टवान्, करोमि, वदिष्यामि, चिन्तयामि, गमिष्यामि, पश्यामि, कृतवान्, जीविष्यामि, मरिष्यामि, गच्छामि, वक्ष्यामि, शक्ष्यामि, ग्रहीष्यति, भवति)

वर्तमानकालरूपाणि - ..........................................................................................

..........................................................................................

भूतकालरूपाणि - ..........................................................................................

..........................................................................................

भविष्यत्कालरूपाणि - ..........................................................................................

..........................................................................................

## 5. पाठे विद्यमानानि वाक्यानि परिशील्य अत्र रिक्तस्थानानि पूरयन्तु -

१. आञ्जनेयः ................................ कृत्वा लङ्काम् आगतवान् ।
२. यदि अहं तथा वदिष्यामि तदा रामः ...................... त्यक्ष्यति ।
३. तां ...................... श्रुत्वा भरतः शत्रुघ्नः च प्राणान् त्यक्ष्यतः ।
४. तत्पश्चात् ................................ अङ्गदः मरणं प्राप्यन्ति ।
५. ते .................. अधः पतिष्यन्ति ............... वा पास्यन्ति ।

www.thearyasamaj.org

# पञ्चमीविभक्तिः २८

पठन्तु अवगच्छन्तु च -



वृक्षात् फलानि पतन्ति ।



बालः वाहनात् अवतरति ।



नलिकायाः जलम् आगच्छति ।



महिला नद्याः जलम् आनयति ।

एतानि वाक्यानि उच्चैः पठन्तु -

१. मन्त्री विदेशात् आगच्छति ।
२. वृष्टिजलम् आकाशात् पतति ।
३. वानरः वनात् आगच्छति ।
४. शब्दः वाहनात् आगच्छति ।
५. यात्रिकः नौकायाः अवतरति ।
६. पुष्पं लतायाः पतति ।
७. तैलं कूप्याः स्रवति ।
८. अङ्गुलीयकम् अङ्गुल्याः पतति ।
९. पर्वतेभ्यः नद्यः प्रवहन्ति ।
१०. मन्दिरेभ्यः भक्ताः आगच्छन्ति ।
११. फलेभ्यः बीजानि प्राप्नुमः ।
१२. सा नदीभ्यः जलम् आनयति ।
१३. कार्यालये दूरवाणीभ्यः शब्दः भवति ।
१४. पुत्राः जननीभ्यः स्नेहं प्राप्नुवन्ति ।
१५. सम्मेलने सर्वराजधानीभ्यः जनाः आगताः ।
१६. नेत्राभ्याम् अश्रूणि पतन्ति ।
१७. सा हस्ताभ्यां कङ्कणानि निष्कासयति ।
१८. सूर्यपुत्रः कर्णः कर्णाभ्यां कुण्डलं निष्कास्य ददाति ।

## अवधेयम्

| पञ्चमीविभक्तिः | | | |
|---|---|---|---|
| घटः | घटात् | घटाभ्याम् | घटेभ्यः |
| फलम् | फलात् | फलाभ्याम् | फलेभ्यः |
| पेटिका | पेटिकायाः | पेटिकाभ्याम् | पेटिकाभ्यः |
| लेखनी | लेखन्याः | लेखनीभ्याम् | लेखनीभ्यः |

www.thearyasamaj.org

उच्चैः पठन्तु, जानन्तु च -

१. हिमगिरेः गङ्गा प्रवहति ।

२. अम्बा पाणिभ्यां कङ्कणानि निष्कासयति ।

३. गिरिभ्यः नद्यः प्रवहन्ति ।

४. इक्षोः शर्करां निर्मान्ति ।

५. रामः बाहुभ्याम् आभरणानि अपसारितवान् ।

६. शिष्याः गुरुभ्यः पठन्ति ।

७. भरतः भ्रातुः पादुकां स्वीकृतवान् ।

८. सुपुत्रः मातापितृभ्याम् आशीर्वादं प्राप्नोति ।

९. गायकः श्रोतृभ्यां प्रशंसां प्राप्तवान् ।

१०. दध्नः नवनीतं भवति ।

११. माता मधुनः पिपीलिकां निवारयति ।

१२. देवः दुर्गत्याः अस्मान् रक्षति ।

१३. काकस्य चञ्च्वाः अपूपं पतति ।

१४. धेनुभ्यः क्षीरं प्राप्नुवन्ति जनाः ।

१५. सः मातुः अनुग्रहं प्राप्नोति ।

१६. सर्वे मातृभ्यः आशीर्वादं प्राप्नुवन्ति ।

एतानि रूपणि उच्चैः पठन्तु –

| पञ्चमीविभक्तिः | | | |
|---|---|---|---|
| वृक्षः | वृक्षात् | वृक्षाभ्याम् | वृक्षेभ्यः |
| कपिः | कपेः | कपिभ्याम् | कपिभ्यः |
| गुरुः | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| कर्ता | कर्तुः | कर्तृभ्याम् | कर्तृभ्यः |
| लता | लतायाः | लताभ्याम् | लताभ्यः |
| मतिः | मत्याः / मतेः | मतिभ्याम् | मतिभ्यः |
| नदी | नद्याः | नदीभ्याम् | नदीभ्यः |
| धेनुः | धेन्वाः / धेनोः | धेनुभ्याम् | धेनुभ्यः |
| वधूः | वध्वाः | वधूभ्याम् | वधूभ्यः |
| माता | मातुः | मातृभ्याम् | मातृभ्यः |
| वनम् | वनात् | वनाभ्याम् | वनेभ्यः |
| वारि | वारिणः | वारिभ्याम् | वारिभ्यः |
| मधु | मधुनः | मधुभ्याम् | मधुभ्यः |

www.thearyasamaj.org

## अभ्यासः

1. पञ्चमीविभक्तिरूपाणि लिखन्तु -

| | | | | | |
|---|---|---|---|---|---|
| देशात् | ---------- | ---------- | यतेः | ---------- | ---------- |
| ---------- | कोशाभ्याम् | ---------- | ---------- | ---------- | अतिथिभ्यः |
| ---------- | ---------- | विद्यालयेभ्यः | ---------- | ---------- | साधुभ्यः |
| ---------- | गुहाभ्याम् | ---------- | वस्तुनः | ---------- | ---------- |
| स्थालिकायाः | ---------- | ---------- | ---------- | ---------- | नेतृभ्यः |
| ---------- | वीथीभ्याम् | ---------- | ---------- | मातृभ्याम् | ---------- |
| ---------- | ---------- | घटीभ्यः | सूक्तेः | ---------- | ---------- |
| दर्व्याः | ---------- | ---------- | ---------- | संस्कृतिभ्याम् | ---------- |
| राज्यात् | ---------- | ---------- | ---------- | ---------- | धेनुभ्यः |

2. कोष्ठकस्थानां शब्दानां साहाय्येन उदाहरणानुगुणं वाक्यानि रचयन्तु -

| | | |
|---|---|---|
| अश्वः | ग्रामः | |
| कङ्कणम् | हस्तः | |
| हारः | कण्ठः | |
| वृष्टिः | आकाशः | |
| यात्रिकः | भोजनशाला | पतति |
| नदी | गिरिः | आगच्छति |
| जलम् | द्रोणी | प्रवहति |
| भक्तः | काशी | |
| क्षीरम् | धेनुः | |
| प्रकाशः | भानुः | |
| तैलम् | वाहनम् | |
| नदी | शिखरम् | |

उदा - अश्वः ग्रामात् आगच्छति ।

------------------------------

------------------------------

------------------------------

------------------------------

------------------------------

------------------------------

------------------------------

------------------------------

------------------------------

------------------------------

------------------------------

------------------------------

------------------------------

www.thearyasamaj.org

3. चित्रं दृष्ट्वा बालकः कस्मात् किं स्वीकरोति इति लिखन्तु -

उदा० - बालकः मित्रात् वाहनं स्वीकरोति ।




4. यात्रिकः कुतः कुत्र गच्छतीति लिखन्तु -




उदा - यात्रिकः गृहात् हरिद्वारं गच्छति ।

5. वाक्यस्य पुरतः स्थितान् शब्दान् दृष्ट्वा तेषु उचितं शब्दं रिक्तस्थाने लिखन्तु -

| | |
|---|---|
| १. .................... जनाः भारतदेशं प्रति आगच्छन्ति । | वृक्षात् |
| २. पक्षिणः ................ सरोवरं प्रति गच्छन्ति । | विष्णोः |
| ३. .................... महान् वृक्षः उद्भवति । | वीथ्याः |
| ४. तस्याः ................ रथयात्रा चलति । | सवितुः |
| ५. पुष्पं ................ पतति । | दूरात् |
| ६. .................... पर्णानि पतन्ति । | अग्नेः |
| ७. कर्णः ................ कुण्डलानि निष्कास्य दत्तवान् । | लताभ्यः |
| ८. .................... ज्वालाः प्रचण्डाः उद्भवन्ति । | बीजात् |
| ९. भक्तः ................ वरं प्राप्नोति । | कर्णाभ्याम् |
| १०. .................... प्रकाशः आगच्छति । | विदेशात् |

www.thearyasamaj.org



एतत् सम्भाषणं उच्चैः पठन्तु –

रमेशः – सुरेश ! अद्य भवान् प्रातः कुत्र गतवान् ? अष्टवादनात् आरभ्य अहं भवतः गृहे एव आसम् ।

सुरेशः – ह्यः मम मातुलः आगतवान् । सः माम् इतः जन्तुशालां नीतवान् ।

रमेशः – जन्तुशालायां सिहं दृष्टवान् वा ?

सुरेशः – आम् भोः ! परन्तु सिंहः पञ्जरात् बहिः एव भ्रमति । वयं याने उपविश्य तं दृष्टवन्तः ।

तत्र एकः आरक्षकः एकं मृगं सिंहात् रक्षितवान् । मम तु सिंहात् अत्यन्तं भीतिः ।

रमेशः – कदा ततः गृहम् आगतवान् ?

सुरेशः – नववादनात् द्विवादनपर्यन्तम् अहं जन्तुशालायाम् एव आसम् । द्विवादने जन्तुशालायाः बहिः आगतवान् । चतुर्वादने गृहं प्राप्तवान् । पञ्चवादनात् परम् अहं मम गृहे एव आसम् ।

## अवधेयम्

*आरभ्य–बहिः–रक्षति–परम्–भयम् – इत्येतेषां प्रयोगे पञ्चमीविभक्तिः भवति ।*

### अभ्यासः

1. आवरणे दत्तानां शब्दानां पञ्चमीविभक्तिरूपैः रिक्तस्थानानि पूरयन्तु –

| | |
|---|---|
| १. .................... बहिः नदी प्रवहति । | (नगरम्) |
| २. .................... बहिः बालाः क्रीडन्ति । | (प्रकोष्ठः) |
| ३. .................... बहिः वृक्षाः सन्ति । | (गृहम्) |
| ४. .................... बहिः मार्गाः सन्ति । | (वाटिका) |
| ५. .................... आरभ्य मन्दिरम् उद्घाटितं भवति । | (पञ्चवादनम्) |
| ६. .................... आरभ्य एव कृष्णः बहु चटुलः आसीत् । | (बाल्यकालः) |
| ७. .................... आरभ्य ज्येष्ठमासपर्यन्तम् उत्तरायणं भवति । | (पौषमासः) |
| ८. सः प्रतिदिनं .................... आरभ्य रात्रिपर्यन्तं गीताभ्यासं करोति । | (सायङ्कलः) |
| ९. देवः सज्जनान् .................... रक्षति । | (दुष्टाः) |
| १०. आरक्षकाः देशं .................... रक्षन्ति । | (चोराः) |
| ११. सैनिकाः .................... राष्ट्रं रक्षन्ति । | (शत्रवः) |

www.thearyasamaj.org

१२. हे देव ! मां .......रक्ष। (सङ्कटानि)

१३. .......परं वैशाखमासः भवति। (चैत्रम्)

१४. ....... परं रविवासरः भवति। (शनिवासरः)

१५. ....... परं फलं प्राप्नुवन्ति जनाः। (परिश्रमः)

१६. ....... परं भवान् किं करिष्यति ? (संस्कृतपाठनम्)

१७. मूषकस्य ....... भीतिः भवति। (बिडालः)

१८. भीरुः तु ....... अपि बिभेति। (अल्पम्)

१९. ........ अपि मा भीः इति विवेकानन्दः गर्जितवान्। (किम्)

२०. उत्तमः जनाः ........ बिभ्यति। (अधर्मः)

उच्चैः पठन्तु -

| | पञ्चमीविभक्तिः | | |
|---|---|---|---|
| तद्शब्दः पुंलिङ्गे नपुंसकलिङ्गे च | तस्मात् | ताभ्याम् | तेभ्यः |
| तद्शब्दः स्त्रीलिङ्गे | तस्याः | ताभ्याम् | ताभ्यः |
| एतद्शब्दः पुंलिङ्गे नपुंसकलिङ्गे च | एतस्मात् | एताभ्याम् | एतेभ्यः |
| एतद्शब्दः स्त्रीलिङ्गे | एतस्याः | एताभ्याम् | एताभ्यः |
| किंशब्दः पुंलिङ्गे नपुंसकलिङ्गे च | कस्मात् | काभ्याम् | केभ्यः |
| किंशब्दः स्त्रीलिङ्गे | कस्याः | काभ्याम् | काभ्यः |
| सर्वशब्दः पुंलिङ्गे नपुंसकलिङ्गे च | सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः |
| सर्वशब्दः स्त्रीलिङ्गे | सर्वस्याः | सर्वाभ्याम् | सर्वाभ्यः |

www.thearyasamaj.org

एतान् श्लोकान् उच्चैः पठन्तु –

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम् ।।

(विद्या नराय विनयगुणं ददाति, तेन सः नरः अर्हतां प्राप्नोति ।
ततः धनं प्राप्नोति, धनेन धर्मकार्याणि कृत्वा सः पुण्यं प्राप्नोति ।)

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ।।

(सर्वे अपि जीवाः अन्नस्य कारणेन एव जन्म प्राप्य जीवनं कर्तुं शक्नुवन्ति । अन्नं तु वृष्टिकारणेन भवति । यज्ञः, दानं सत्कार्याणि एव वृष्टेः उत्पादने कारणानि ।)

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्सञ्जायते कामः कामात् क्रोधोऽभिजायते ।।
क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ।।

(यदि मनुष्यः विषयान् पुनः पुनः चिन्तयति, तदा सः तेषु अधिकाम् आसक्तिं प्राप्नोति । तेन कारणेन मनसि इच्छा तीव्रा भवति । यदि सा इच्छा पूर्णा न भवति, तर्हि कोपः भवति । कोपस्य कारणतः तस्य सम्भ्रमः भवति, ततः ज्ञानं नष्टं भवति । ततः बुद्ध्या नष्टः सः नाशम् एव प्राप्नोति ।)

-------------------- -------------------- --------------------

-------------------- -------------------- --------------------

-------------------- -------------------- --------------------

-------------------- -------------------- --------------------

-------------------- -------------------- --------------------

-------------------- -------------------- --------------------

www.thearyasamaj.org

२९

# नगरदर्शनं कदा ?

तः - पर्यन्तम्

एतां विनोदकणिकां पठन्तु -



कश्चन ग्रामीणः नगरदर्शनार्थं महानगरं गतवान् । यदा बुभुक्षा जाता, तदा सः एकं भोजनालयं गत्वा पृष्टवान् - '' अत्र भोजनस्य अल्पाहारस्य च समयः कः ?'' इति ।

तदा भोजनालयस्वामी उक्तवान् - ''प्रातः सप्तवादनतः एकादशवादनपर्यन्तम् अल्पाहारः । मध्याह्ने द्वादशवादनतः त्रिवादनपर्यन्तं भोजनम्, सायं पञ्चवादनतः रात्रौ दशवादनपर्यन्तं रात्रिभोजनम्'' इति ।

एतस्य श्रवणानन्तरं सः ग्रामीणः पृष्टवान् - ''महाशय ! यदि एतावान् कालः अल्पाहारार्थं, मध्याह्ने भोजनार्थं, रात्रिभोजनार्थं च भवति तर्हि मम नगरदर्शनं कदा भविष्यति ?'' इति ।

## अभ्यासः

1. अत्र योगेशस्य दिनचर्या लिखिता अस्ति । तत् दृष्ट्वा वाक्यानि लिखतु -

| | | | | | |
|---|---|---|---|---|---|
| ६.०० - | ७.०० | योगासनम् | ५.०० | - ६.०० | क्रीडा |
| ७.१५ - | ८.१५ | गृहपाठः | ६.३० | - ७.३० | अध्ययनम् |
| १०.००- | ५.०० | विद्यालयः | १०.०० | - ५.०० | निद्रा |

www.thearyasamaj.org

१. योगेशः ६.०० तः ७.०० पर्यन्तं योगासनं करोति ।
२. योगेशः ................................................ गृहपाठं लिखति ।
३. .................................................... विद्यालये पठति ।
४. ............................................................ क्रीडति ।
५. .................................................... अध्ययनं करोति ।
६. ........................................................ निद्रां करोति ।

2. अत्र प्रधानमन्त्रिणः कार्यक्रमस्य विवरणम् अस्ति । तत् दृष्ट्वा सः कदा कुत्र तिष्ठति इति लिखन्तु -

| | | | | |
|---|---|---|---|---|
| जनवरी - | १ | - | ७ | मुम्बयी |
| " | ८ | - | १३ | चेन्नै |
| " | १४ | - | १७ | कोल्कत्ता |
| " | १८ | - | २० | जयपुरम् |
| " | २५ | - | ३० | देहली |

उदा० - १. जनवरी १ तः ७ पर्यन्तं प्रधानमन्त्री मुम्बयीनगरे तिष्ठति ।

२. ........................................................ ।
३. ........................................................ ।
४. ........................................................ ।
५. ........................................................ ।

## अवधेयम्

एतस्य एतादृशाः प्रयोगाः अपि भवन्ति ।
यथा - हिमालयतः कन्याकुमारीपर्यन्तं भारतम् अस्ति ।
आरम्भतः अन्तपर्यन्तं भगवद्गीतां पठतु ।

www.thearyasamaj.org

# ३०

*वारम् / अद्य आरभ्य*

रविः - मित्र ! अहं पाठं पठितवान्, किन्तु स्मरणं न भवति ?

कार्त्तिकेयः - भवान् कतिवारं पठितवान् ?

रविः - एकवारं पठितवान् ।

कार्त्तिकेयः - मित्र ! एकवारं न पर्याप्तम् । अद्य आरभ्य भवान् द्विवारं त्रिवारं वा पठतु ।

सन्तोषः - (प्रविश्य) हरिः ओम् । कार्त्तिकेयः अस्ति किम् ?

कार्त्तिकेयः - अहो ! सन्तोष ! स्वागतम् ।

सन्तोषः - किं भोः ! प्रातःकालात् आरभ्य बहुवारं भवते दूरभाषाम् अकरवं, किन्तु कोऽपि न स्वीकरोति ।

कार्त्तिकेयः - ह्यः आरभ्य एव दूरभाषा सम्यक् नास्ति । पञ्चवारं षड्वारं वा दूरभाषाकेन्द्राय सूचनां दत्तवान् अस्मि ।

रविः - अस्तु, अहं गच्छामि । श्वः आरभ्य परीक्षा भविष्यति ।

कार्त्तिकेयः - चायं स्वीकरोतु भोः ! भवान् प्रथमवारं मम गृहम् आगतवान् अस्ति ।

रविः - मास्तु भोः ! सप्ताहे एकवारं मङ्गलवासरे व्रतम् आचरामि । अतः इदानीं मन्दिरं गच्छामि ।

कार्त्तिकेयः - अस्तु, धन्यवादः, रवे ! पुनः मिलामः ।

## अभ्यासः

1. कोष्ठके दत्तानां शब्दानां सम्बन्धं कल्पयित्वा वाक्यानि रचयन्तु -

उदा० - दीपावली वर्षे एकवारं भवति ।

१. गुरुः छात्रान् .............................. पाठयति ।

२. भवान् .............................. पठिष्यति ।

३. वर्षे .................. वयं नवरात्रोत्सवम् आचरामः ।

४. शिशुः दिने .......................... दुग्धं पिबति ।

५. अहम् .............................. सत्यं वदामि ।

| |
|---|
| एकवारम् |
| बहुवारम् |
| कदा आरभ्य |
| एकवारम् |
| वारं वारम् |
| अद्य आरभ्य |

www.thearyasamaj.org

# ३१ शीघ्रं / मन्दं / सम्यक् / उच्चैः / शनैः

उच्चैः पठन्तु –



विमानं शीघ्रं गच्छति ।



द्विचक्रिका मन्दं गच्छति ।

सिंहः उच्चैः गर्जति ।





चटकः शनैः शब्दं करोति ।

गायिका सम्यक् गायति ।

बालिका सम्यक् पठति । एतत् भोजनम् उत्तमम् अस्ति ।

## अभ्यासः

1. एतेषु उचितशब्देन रिक्तस्थानानि पूरयन्तु –

शीघ्रम् / मन्दम् / सम्यक् / उच्चैः / शनैः

१. बालकः ............................ क्रीडति ।
२. शिशुः ............................ रोदिति ।
३. क्षेपणी ............................ गच्छति ।
४. पूजा चलति, कृपया ............................ वदतु ।
५. सः वृद्धः चेदपि ............................ चलति ।
६. कूर्मः ............................ गच्छति ।
७. सङ्कोचः मास्तु, ............................ भोजनं करोतु ।
८. न शृणोति, किञ्चित् ............................ वदतु ।
९. सा ............................ नृत्यं करोति ।
१०. एतत् नाटकं बहु ............................ अस्ति ।

## अवधेयम्

☛ एतादृशवाक्यानां प्रश्नकरणे 'कथम्' इत्यस्य अव्ययस्य प्रयोगः भवति ।
यथा – बालकः कथं क्रीडति ?

www.thearyasamaj.org

# ३२ 'क्त्वा'प्रत्ययान्तानि

उच्चैः पठन्तु, अवगच्छन्तु च -

माता - हरीश ! हरीश !
हरीशः - आम् ।
माता - भवान् किं करोति ?
हरीशः - अहं स्नानं करोमि ।
माता - भवान् शीघ्रं स्नात्वा आगच्छतु ।
हरीशः - किमर्थं शीघ्रम् ?
माता - गृहे शर्करा नास्ति । भवान् आपणं गत्वा शर्कराम् आनयतु ।
हरीशः - मातः! किं वस्त्रं धृत्वा गच्छामि ?
माता - स्वच्छं वस्त्रं धरतु । शीघ्रं द्विचक्रिकया गच्छतु ।
हरीशः - द्विचक्रिका सम्यक् नास्ति । अहं धावित्वा गच्छामि ।
माता - धावित्वा मास्तु, मन्दं चलित्वा गच्छतु । आपणे सर्षपतैलस्य मूल्यम् अपि पृष्ट्वा आगच्छतु ।
हरीशः - अस्तु गच्छामि । सर्वाणि कार्याणि कृत्वा आगच्छामि ।

एतानि रूपाणि उच्चैः पठन्तु -

| क्रियापदानि | क्त्वान्तानि | क्रियापदानि | क्त्वान्तानि |
|---|---|---|---|
| पठति | पठित्वा | क्रीणाति | क्रीत्वा |
| भ्रमति | भ्रमित्वा | नयति | नीत्वा |
| चलति | चलित्वा | जानाति | ज्ञात्वा |
| क्रीडति | क्रीडित्वा | दहति | दग्ध्वा |
| धावति | धावित्वा | पचति | पक्त्वा |
| खनति | खनित्वा | पश्यति | दृष्ट्वा |
| वदति | उदित्वा | पृच्छति | पृष्ट्वा |
| रचयति | रचयित्वा | कर्षति | कृष्ट्वा |
| तोलयति | तोलयित्वा | ध्यायति | ध्यात्वा |
| निन्दति | निन्दित्वा | ददाति | दत्त्वा |
| गायति | गीत्वा | ध्यायति | ध्यात्वा |
| स्मरति | स्मृत्वा | शृणोति | श्रुत्वा |

www.thearyasamaj.org

## अभ्यासः

1. उचितैः क्त्वान्तशब्दैः रिक्तस्थानानि पूरयन्तु -

| | | | | | |
|---|---|---|---|---|---|
| १. | गच्छति | गत्वा | ११. | कर्तयति | .......... |
| २. | तिष्ठति | .......... | १२. | चालयति | .......... |
| ३. | पश्यति | .......... | १३. | खादति | .......... |
| ४. | रचयति | .......... | १४. | चोरयति | .......... |
| ५. | नयति | .......... | १५. | त्यजति | .......... |
| ६. | गायति | .......... | १६. | पूरयति | .......... |
| ७. | नमति | .......... | १७. | वर्णयति | .......... |
| ८. | ददाति | .......... | १८. | कथयति | .......... |
| ९. | स्मरति | .......... | १९. | चलति | .......... |
| १०. | धावति | .......... | २०. | भक्षयति | .......... |

2. उदाहरणं दृष्ट्वा वाक्यानि रचयन्तु -

| | | | | |
|---|---|---|---|---|
| १. | रमेशः | पठनं | गच्छति | रमेशः पठित्वा गच्छति । |
| २. | बालिका | स्मरणं | लिखति | ................................ । |
| ३. | मुनिः | ध्यानं | वदति | ................................ । |
| ४. | सा | चिन्तनं | कार्यं कृतवती | ................................ । |
| ५. | वधूः | स्मरणम् | अरुदत् | ................................ । |
| ६. | शिशुः | धावन् | पतितवान् | ................................ । |
| ७. | सा मालां | रचनं | दास्यति | ................................ । |
| ८. | साधवः | स्थानं | ध्यायन्ति | ................................ |
| ९. | अहं | चलनं | मन्दिरं गमिष्यामि | ................................ । |
| १०. | एषः | अटनम् | आगतवान् | ................................ । |

www.thearyasamaj.org

3. उदाहरणं दृष्ट्वा वाक्यद्वयस्य योजनेन एकं वाक्यं लिखन्तु –

| | |
|---|---|
| १. बालकः स्नाति, विद्यालयं गच्छति । | बालकः स्नात्वा विद्यालयं गच्छति । |
| २. शिशुः दुग्धं पीतवान्, शयनं कृतवान् । | ..................................... । |
| ३. बालिका अलिखत्, शयितवती । | ........... लिखित्वा .................. । |
| ४. भ्रातरः पृच्छन्ति, कार्यं कुर्वन्ति । | ..................................... । |
| ५. पिता वस्त्रं धरति, कार्यालयं गच्छति । | ..................................... । |
| ६. अहं ग्रामं गमिष्यामि, भ्रमिष्यामि । | ..................................... । |
| ७. माता पाकम् अकरोत्, पर्यवेषयत् । | ..................................... । |
| ८. त्वं पाठं पठसि, परीक्षां लिखसि । | ..................................... । |
| ९. भवान् विषयं जानातु, भाषणं करोतु । | ..................................... । |
| १०. छात्राः कक्ष्यां गतवन्तः, पाठं पठितवन्तः । | ..................................... । |
| ११. क्रीडकाः कीडन्ति, जयं प्राप्नुवन्ति । | ..................................... । |
| १२. ऋषिः ध्यायति, हवनं करोति । | ..................................... । |
| १३. कपयः खादन्ति, क्रीडन्ति । | ..................................... । |
| १४. सः पठिष्यति, उत्तीर्णः भविष्यति । | ..................................... । |
| १५. बालिका गीतवती, पुरस्कारं प्राप्तवती । | ..................................... । |
| १६. आपणिकः तोलयति, ददाति । | ..................................... । |
| १७. बालकः खादति, क्रीडति । | ..................................... । |
| १८. भवान् गणयति, मूल्यं वदति । | ..................................... । |
| १९. हनूमान् सीताम् अपश्यत्, प्रसन्नः अभवत् । | ..................................... । |
| १०. यूयं गुरुं नमथ, अग्रे गच्छथ । | ..................................... । |

www.thearyasamaj.org

# अखण्डविश्वासः

३३

महाभारतयुद्धम् आरब्धम् आसीत्। भीष्मः कौरवाणां सेनापतिः **भूत्वा** अष्ट दिवसान् यावत् भयङ्करं युद्धं कृतवान्। पाण्डवाः तस्य पुरतः युद्धं कर्तुम् असमर्थाः चिन्तामग्नाः आसन्। तथापि भीष्मः पाण्डवेषु एकमपि न मारितवान् इति **मत्वा** दुर्योधनः खिन्नः आसीत्।



अतः सः भीष्मं **दृष्ट्वा** अवदत् – ''भोः पितामह ! मदपेक्षया पाण्डवाः एव भवतः प्रियाः। अतः भवान् युद्धेऽपि तैः सह क्रीडति। न कमपि मारयति'' इति।

एतत् **श्रुत्वा** भीष्मः दुःखितः जातः। झटिति सः प्रतिज्ञां कृतवान् यत् ''श्वः युद्धं **कृत्वा** अहम् अर्जुनं मारयिष्यामि। अथवा तेन पराजितः वा भविष्यामि'' इति।

भीष्मस्य प्रतिज्ञा सर्वैः ज्ञाता। तां **श्रुत्वा** पाण्डवपक्षे सर्वेऽपि वीराः चिन्तिताः अभवन्। श्रीकृष्णः अपि चिन्तावशात् रात्रौ निद्रां न प्राप्तवान्। 'भीष्मप्रतिज्ञां **ज्ञात्वा** अर्जुनः तु नितरां चिन्तितः स्यात्' इति **चिन्तयित्वा** सः तस्य सान्त्वनं कर्तुम् अर्जुनस्य सेनाशिबिरं गतवान्।

परन्तु श्रीकृष्णस्य महत् आश्चर्यं सञ्जातम्। यतः यदा सः **गत्वा** दृष्टवान् तदा तत्र अर्जुनः गाढनिद्रायां मग्नः आसीत्। सः अर्जुनम् उत्थाप्य पृष्टवान् – ''भोः पार्थ ! किं भवान् भीष्मस्य प्रतिज्ञां न श्रुतवान् ?'' इति।

''श्रुतवान्...'' – इति उक्तवान् अर्जुनः।

''तर्हि तां **श्रुत्वापि** कथं भवान् चिन्तितः नास्ति...? मृत्युभयात् उद्विग्नः अपि नास्ति... ?'' – इति श्रीकृष्णः पृष्टवान्।

अर्जुनः किञ्चित् **हसित्वा** शान्तस्वरेण उक्तवान् – ''भगवन् ! अहं सम्यक् जानामि यत् यः मम योगक्षेमस्य चिन्तां करोति सः जागरणं कुर्वन् अस्ति इति। एवं सति अहं किमर्थं चिन्तां **कृत्वा** दुःखितः भवामि...? स्वस्य भक्तस्य भीष्मप्रतिज्ञायाः रक्षणभारः भगवतः भवतः एव। मम का चिन्ता तत्र ? अतः एव अहं निश्चिन्ततया निद्रां कृतवान् अस्मि'' इति।

सत्यं खलु ! अर्जुनस्य एतादृशं दृढं विश्वासं **मत्वा** एव श्रीकृष्णः पार्थसारथिः अभवत् !

www.thearyasamaj.org

## अभ्यासः

1. एतस्मिन् पाठे प्रयुक्तानि क्त्वाप्रत्ययान्तानि रूपाणि चित्वा लिखन्तु -

यथा - भूत्वा ..........................................................

..........................................................

..........................................................

..........................................................

2. प्रतिवाक्यं वाक्यद्वयं कृत्वा लिखन्तु -

यथा - भीष्मः सेनापतिः भूत्वा युद्धं करोति ।

भीष्मः सेनापतिः भवति । युद्धं करोति ।

१. सः भीष्मं दृष्ट्वा अवदत् ।

.............................. .............................. ।

२. भीष्मः एतत् श्रुत्वा दुःखितः भवति ।

.............................. .............................. ।

३. श्वः युद्धं कृत्वा अर्जुनं मारयिष्यामि ।

.............................. .............................. ।

४. श्रीकृष्णः भीष्मप्रतिज्ञां ज्ञात्वा उपायं चिन्तयति ।

.............................. .............................. ।

५. श्रीकृष्णः शिबिरं गत्वा अर्जुनं दृष्टवान् ।

.............................. .............................. ।

६. अर्जुनः हसित्वा शान्तस्वरेण वदति ।

.............................. .............................. ।

७. अहं किमर्थं चिन्तां कृत्वा दुःखितः भवामि ।

.............................. .............................. ।

www.thearyasamaj.org

# ल्यप्-प्रत्ययान्तानि ३४

एतत् सम्भाषणम् उच्चैः पठन्तु -

बालकः - पितः ! सेवफलम् आवश्यकम् ।
प्रदीपः - अस्तु । (आपणिकं प्रति) भोः ! द्वे सेवफले ददातु ।
आपणिकः - स्वीकरोतु श्रीमन् ।
प्रदीपः - भोः! फलं नष्टम् अस्ति । एतत् परिवर्त्य अन्यत् ददातु ।
(आपणिकः ददाति)
बालकः - अहं फलं खादानि किम् ?
प्रदीपः - खादतु , किन्तु प्रक्षाल्य खादतु । प्रातः उत्थाय दन्तधावनम् अकरोत् वा ?
बालकः - आम्, अकरवम् ।
प्रदीपः - उत्तमम् । इदानीं भवान् शीघ्रं गृहं गत्वा स्यूतं स्वीकृत्य आगच्छतु । अहं भवन्तं विद्यालयं प्रापय्य कार्यालयं गमिष्यामि ।
(बालकः स्यूतं स्वीकृत्य आगच्छति ।)
प्रदीपः - पुत्र ! मध्याह्ने विद्यालयात् आगत्य, अल्पाहारं च समाप्य एकघण्टां यावत् उपविश्य पठतु ।
बालकः - अस्तु । तथैव करिष्यामि ।

## अवधेयम्

| | | | | | |
|---|---|---|---|---|---|
| गच्छति | → | गत्वा | स्मरति | → | स्मृत्वा |
| आगच्छति | → | आगत्य | विस्मरति | → | विस्मृत्य |
| नयति | → | नीत्वा | त्यजति | → | त्यक्त्वा |
| आनयति | → | आनीय | परित्यज्यति | → | परित्यज्य |
| गृह्णाति | → | गृहीत्वा | गच्छति | → | गत्वा |
| संगृह्णाति | → | संगृह्य | अवगच्छति | → | अवगत्य |

धातुः यदि उपसर्गसहितः भवति, तर्हि क्त्वाप्रत्ययस्य स्थाने ल्यप्प्रत्ययः भवति । आगत्य, विस्मृत्य, आनीय - इत्यादीनि ल्यप्प्रत्ययान्तानि अव्ययानि । ल्यबन्तानि इत्यपि तेषां नाम ।

www.thearyasamaj.org

उच्चैः पठन्तु, जानन्तु च -

| | क्त्वान्तरूपम् | उपसर्गसहितं क्रियापदम् | ल्यबन्तरूपम् |
|---|---|---|---|
| गच्छति | गत्वा | आगच्छति | आगत्य |
| नयति | नीत्वा | आनयति | आनीय |
| करोति | कृत्वा | उपकरोति | उपकृत्य |
| स्मरति | स्मृत्वा | विस्मरति | विस्मृत्य |
| लिखति | लिखित्वा | विलिखति | विलिख्य |
| क्रीणाति | क्रीत्वा | विक्रीणीते | विक्रीय |
| जानाति | ज्ञात्वा | विजानाति | विज्ञाय |
| स्थापयति | स्थापयित्वा | संस्थापयति | संस्थाप्य |
| प्रेषयति | प्रेषयित्वा | सम्प्रेषयति | सम्प्रेष्य |
| हरति | हृत्वा | संहरति | संहृत्य |
| नमति | नत्वा | प्रणमति | प्रणम्य |
| क्षालयति | क्षालयित्वा | प्रक्षालयति | प्रक्षाल्य |
| कर्षति | कृष्ट्वा | आकर्षति | आकृष्य |
| तिष्ठति | स्थित्वा | उत्तिष्ठति | उत्थाय |
| स्मरति | स्मृत्वा | संस्मरति | संस्मृत्य |
| भवति | भूत्वा | अनुभवति | अनुभूय |
| गच्छति | गत्वा | अनुगच्छति | अनुगत्य |
| नयति | नीत्वा | उन्नयति | उन्नीय |
| करोति | कृत्वा | निराकरोति | निराकृत्य |
| दिशति | दिष्ट्वा | निर्दिशति | निर्दिश्य |

www.thearyasamaj.org

## अभ्यासः

1. उदाहरणं दृष्ट्वा ल्यबन्तरूपाणि लिखन्तु -

| | | | |
|---|---|---|---|
| प्र +क्षालयति | प्रक्षाल्य | परि + वेषयति | .............. |
| आ + गच्छति | .............. | परि + त्यजति | .............. |
| प्र + नमति | .............. | अभि + नन्दति | अभिनन्द्य |
| परि + गणयति | परिगणय्य | आ + छादयति | आच्छाद्य |
| वि + गणयति | .............. | उप + हसति | .............. |
| निर् + गच्छति | .............. | उप + करोति | .............. |
| उत् + तिष्ठति | .............. | प्र + आप्नोति | प्राप्य |
| सम् + स्थापयति | .............. | उद् + धरति | उद्धृत्य |
| अनु + भवति | .............. | सम् + आप्नोति | .............. |
| सम् + हरति | .............. | वि + चारयति | विचार्य |

2. कोष्ठकात् शुद्धं ल्यबन्तरूपं चित्वा रिक्तस्थाने लिखन्तु -

१. विलिख्य
२. .......................... ।
३. .......................... ।
४. .......................... ।
५. .......................... ।
६. .......................... ।
७. .......................... ।
८. .......................... ।
९. .......................... ।
१०. .......................... ।
११. .......................... ।
१२. .......................... ।
१३. .......................... ।

| | |
|---|---|
| विलिख्य | विलिखित्वा |
| आनीत्वा | आनीय |
| सम्प्रेषयित्वा | सम्प्रेष्य |
| विज्ञाय | विज्ञात्वा |
| उद्धृत्वा | उद्धृत्य |
| समाप्य | समापयित्वा |
| विचार्य | विचारयित्वा |
| उद्घाट्य | उद्घाटयित्वा |
| प्रविष्ट्वा | प्रविश्य |
| आहूय | आहूत्वा |
| संहृत्वा | संहृत्य |
| परिवेष्य | परिवेषयित्वा |
| उत्थित्वा | उत्थाय |

www.thearyasamaj.org

### 3. कोष्ठकस्थानि ल्यबन्तरूपाणि उपयुज्य वाक्यानि रचयन्तु -

| | | |
|---|---|---|
| उदा - | १. नेतारः उपविश्य वार्तालापं कुर्वन्ति । | १. उपविश्य |
| | २. ........................................ । | २. प्रक्षाल्य |
| | ३. ........................................ । | ३. प्रविश्य |
| | ४. ........................................ । | ४. समाप्य |
| | ५. ........................................ । | ५. आनीय |
| | ६. ........................................ । | ६. विचार्य |
| | ७. ........................................ । | ७. परित्यज्य |
| | ८. ........................................ । | ८. आगत्य |
| | ९. ........................................ । | ९. अनुभूय |
| | १०. ........................................ । | १०. प्रणम्य |
| | ११. ........................................ । | ११. उन्नीय |
| | १२. ........................................ । | १२. विलिख्य |

### 4. उदाहरणानुगुणं ल्यबन्तरूपैः वाक्यानि योजयन्तु -

१. छात्रः विद्यालयं प्रविष्टवान्, पठितवान् । - छात्रः विद्यालयं प्रविश्य पुस्तकं पठितवान् ।

२. तौ आगमिष्यतः, भोजनं करिष्यतः - ----------------------------------------

३. साधवः उपविशन्ति, ध्यायन्ति । ----------------------------------------

४. त्वं पत्रं लिखसि, प्रेषयसि । ----------------------------------------

५. भवान् शारदां प्रणमतु, पठतु । ----------------------------------------

६. वृषभौ शटकम् आकर्षतः, अग्रे नयतः । ----------------------------------------

७. भ्राता पुस्तकम् आनयत्, पाठम् अपठत् । ----------------------------------------

८. सर्वे हस्तान् प्रक्षालयन्तु, भोजनं कुर्वन्तु । ----------------------------------------

९. हनूमान् पर्वतम् उन्नीतवान्, आनीतवान् । ----------------------------------------

१०. दुष्यन्तः शकुन्तलां संस्मरति, प्रसन्नः भवति । ----------------------------------------

www.thearyasamaj.org



च / अपि / एव / इति / यत्

1. पश्यन्तु, उच्चैः पठन्तु च –



प्रश्नः – चित्रे किं किम् अस्ति ?

उत्तरम् – चित्रे सञ्चिका, मापिका, लेखनी फलं च सन्ति ।

प्रश्नः – कन्याकुमारीं के के गमिष्यन्ति ?

उत्तरम् – कन्याकुमारीं छात्राः अध्यापकाः प्रधानाचार्याः च गमिष्यन्ति ।

प्रश्नाः – किं प्रधानाचार्यः अपि गमिष्यति ?

उत्तरम् – आम् । सः न केवलं गमिष्यति, अपि तु सः एव अस्मान् नेष्यति ।

प्रश्नः – एवम् ! सः एव युष्मान् नेष्यति ?

उत्तरम् – आम्, सः एव अस्मान् नेष्यति ।

2. उच्चैः पठन्तु –

रमा पठति । नूतनः पठति । गिरिः पठति ।
रमा नूतनः गिरिः च पठन्ति ।

- अत्र शिशवः बालाः युवकाः युवत्यः ज्येष्ठाः च सन्ति ।
- प्रयागे गङ्गा यमुना सरस्वती च इति तिस्त्रः नद्यः मिलन्ति ।
- अस्माकं परीक्षा सोमवासरे मङ्गलवासरे च अस्ति ।
- विमलायाः विमलेशस्य च कक्ष्या कुत्र प्रचलति ?
- इदं जलं राजेशाय कल्पनायै, रमायै च यच्छतु ।

## अवधेयम्

☛ 'च' इति अव्ययस्य प्रयोगः समुच्चयः इत्यर्थे भवति ।

☛ 'च' इति अव्ययस्य योजनम् अन्ते भवति ।

यथा – आम्रं सेवफलं च ।

– माता पिता बालाः च गच्छन्ति ।

www.thearyasamaj.org

उच्चैः पठन्तु -

अपि

- केवलं ते न, वयम् अपि गमिष्यामः ।
- केवलं बालाः न, युवकाः अपि धाविष्यन्ति ।
- ज्येष्ठाः अपि फलानि अखादन् ।
- किं भवान् अपि पित्रा सह आगमिष्यति ?
- मम पुस्तकम् अपि अत्र अस्ति ।
- जनकस्य अपि लेखनी उत्पीठिकायाः उपरि अस्ति ।
- जलं मह्यम् अपि यच्छतु ।
- कृतिः फलम् अपि खादति ।

## अवधेयम्

'अपि' इति अव्ययस्य प्रयोगः सप्तभिः विभक्तिभिः युक्तेषु वाक्येषु अपि शक्यः ।

उच्चैः पठन्तु -

एव

- बालः एव दुग्धम् इच्छति, पिता न ।
- ज्ञानम् एव अस्माकं वास्तविकं नेत्रम् ।
- बाला दुग्धम् एव पातुम् इच्छति, न अन्यत् ।
- जनाः संस्कृतेन सम्भाषणं कुर्वन्ति एव ।

## अवधेयम्

- 'एव' इति अव्ययस्य प्रयोगः 'निश्चयः' इत्यर्थे क्रियते । एतत् अन्यस्य निवारणं करोति ।
- 'एव' इति अव्ययस्य प्रयोगः अपि सप्तभिः विभक्तिभिः युक्तेषु वाक्येषु शक्यः ।

## अभ्यासः

1. 'च' इति अव्ययं प्रयुज्य वाक्यानि पुनः लिखन्तु –

यथा– १. मोहनः श्यामः गिरिधरः कृष्णस्य अन्यानि नामानि सन्ति ।

मोहनः श्यामः गिरिधरः च कृष्णस्य अन्यानि नामानि सन्ति ।

२. पिता माता पितामहः अत्र उपविशन्ति ।

........................................................................ ।

www.thearyasamaj.org

३. काकः पिकः शुकः आकाशे सन्ति ।

........................................................................ ।

४. सः प्रथमं, त्वं द्वितीयम्, अहं तृतीयं स्थानं प्राप्तवन्तः ।

........................................................................ ।

५. सुमेधा लिखति । सुलेखा लिखति । सुरभिः लिखति ।

सुमेधा, सुलेखा, सुरभिः च लिखन्ति ।

६. बालकाः क्रीडन्ति । बालिकाः क्रीडन्ति । तरुणाः क्रीडन्ति ।

........................................................................ ।

७. सः मम कार्यं करोति । सः तव कार्यं करोति ।

........................................................................ ।

८. इदं पुस्तकं मह्यं यच्छतु । इदं पुस्तकं तस्मै यच्छतु ।

........................................................................ ।

९. धूलिः आसन्दे अस्ति, कपाटिकायाम् अस्ति, उत्पीठिकायाम् अस्ति ।

........................................................................ ।

१०. मित्राणि बेङ्गलूरुतः आगतानि, देहलीतः आगतानि शिमलातः आगतानि ।

........................................................................ ।

## 2. उदाहरणानुसारं वाक्यानि पुनः लिखन्तु –

यथा - १. भवान् अधुना गृहं गमिष्यति । भवान् कार्यालयं न गमिष्यति ।

भवान् अधुना गृहम् एव गमिष्यति, कार्यालयं न ।

२. वयं सर्वे भोजनं करिष्यामः । वयं मधुरं न खादिष्यामः ।

........................................................................ ।

३. ताः विद्यालयं गच्छन्ति । ताः अन्यत्र न गच्छन्ति ।

........................................................................ ।

४. पुस्तकालये पुस्तकानि सन्ति । पुस्तकालये उत्तरपुस्तकानि न सन्ति ।

........................................................................ ।

५. सौचिकः वस्त्रं सीव्यति । सौचिकः वस्त्रं न वयति ।

........................................................................ ।

www.thearyasamaj.org

६. सिंहः गर्जति । शुकः न ।

........................................................................ ।

७. वृक्षः फलति । काष्ठं न ।

........................................................................ ।

८. सज्जनः उपकारं करोति । मूर्खः न ।

........................................................................ ।

९. हंसः तरति । मूषकः न ।

........................................................................ ।

१०. मयूरः नृत्यति । शुनकः न ।

........................................................................ ।

११. नदी वहति । सागरः न ।

........................................................................ ।

*इति*

## एतत् सम्भाषणम् उच्चैः पठन्तु –

अध्यापकः – प्रभाकर ! किं सुधाकरः पाठम् अलिखत् ?

प्रभाकरः – अद्य अहं लिखामि इति सः उक्तवान् । अहं न जानामि अलिखत् न वा ।

अध्यापकः – एवम् ! चिन्तां मा कुरु । किं राधिका अद्य उद्घाटनाय गमिष्यति ?

प्रभाकरः – 'गमिष्यामि' इति सा उक्तवती ।

अध्यापकः – एवम् ! किं भवान् कपाटिकाम् अद्य क्रेष्यति श्वः वा ?

प्रभाकरः – 'अद्य एव क्रेष्यामि' इति चिन्तयामि ।

## एतानि वाक्यानि उच्चैः पठन्तु –

- 'संस्कृतम् एव राजभाषा भवेत्' इति डा॰ भीमराव अम्बेड्करः अचिन्तयत् ।
- 'बालाः एव राष्ट्रस्य सम्पत्तिः' इति अस्माकं राष्ट्रपतिः पुनः पुनः कथयति ।
- 'परिश्रमेण एव साफल्यं प्राप्यते' इति सर्वे कथयन्ति ।
- 'सङ्गच्छध्वं संवदध्वम्' इति ऋग्वेदस्य सन्देशः ।

www.thearyasamaj.org

## अवधेयम्

- यदा कस्यापि अन्यस्य जनस्य ग्रन्थस्य वा वचनं, कथनं, सन्देशः – इत्यादीनाम् उद्धरणं क्रियते तदा वचन-कथन-सन्देशादीनाम् अन्ते 'इति' अव्ययस्य प्रयोगः भवति।
- 'इति' अव्ययात् पूर्वं वचनं कथनं वा यथावत् उच्यते।

  यथा – 'अहम् अद्य एव मिलामि' इति नागेन्द्रः अवदत्।

### अभ्यासः

1. 'इति'शब्दं प्रयुज्य वाक्यानि पुनः लिखन्तु –

१. 'अहम् अद्य एव कार्यं पूर्णं करिष्यामि'। नवीनः अवदत्।

२. 'सत्यम् एव जीवनस्य आधारशिला'। महात्मा गान्धिः अचिन्तयत्।

३. 'राष्ट्राय इदं न मम'। श्रीगुरुजीः चिन्तितवान्।

४. 'भवन्तः मह्यं रक्तं यच्छन्तु, अहं भवद्भ्यः स्वातन्त्र्यं दास्यामि'। सुभाषचन्द्रबोसः उद्घोषितवान्।

५. 'बालाः धरायाः पुष्पाणि।' रवीन्द्रनाथठागोरस्य चिन्तनम् आसीत्।

वाक्यानि

१. .................................................................... ।

२. .................................................................... ।

३. .................................................................... ।

४. ....................................................................

.................................................................... ।

५. .................................................................... ।

www.thearyasamaj.org

## 2. उदाहरणानुगुणं वाक्यानि लिखन्तु -

| | | |
|---|---|---|
| १. ''सत्यमेव जयते'' | - | मुण्डकोपनिषद् |
| २. ''कर्मण्येवाधिकारस्ते'' | - | श्रीमद्भगवद्गीता |
| ३. ''गुणाः पूजास्थानम्'' | - | भवभूतिः |
| ४. ''सत्यं वद, धर्मं चर'' | - | तैत्तिरीयोपनिषद् |
| ५. ''यतो धर्मस्ततो जयः'' | - | महाभारतम् |
| ६. ''सर्वमात्मवशं सुखम् | - | चाणक्यनीतिः |

उदा॰ – ''सत्यमेव जयते'' इति मुण्डकोपनिषदः वचनम् ।

२. ........................................................................

३. ........................................................................

४. ........................................................................

५. ........................................................................

६. ........................................................................

यत्

### उच्चैः पठन्तु, जानन्तु च -

- ''एतत् न शक्यम्'' इति मा वदतु ।
  मा वदतु यत् एतत् न शक्यम् ।
- ''मया न ज्ञायते'' इति सा उक्तवती ।
  सा उक्तवती यत् मया न ज्ञायते ।
- ''सत्यमेव जयते'' इति मुण्डकोपनिषद् वदति ।
  मुण्डकोपनिषद् वदति यत् सत्यमेव जयते ।

## अवधेयम्

- *इति इत्यस्य प्रयोगद्वारा यत् उच्यते तत् 'यत्' पदयोगेन अपि वक्तुं शक्यते ।*
  *यथा – 'लोको भिन्नरुचिः' इति पण्डिताः वदन्ति –*
  *पण्डिताः वदन्ति यत् लोको भिन्नरुचिः ।*

www.thearyasamaj.org

## अभ्यासः

1. 'यत्' इति पदम् उपयुज्य वाक्यानि रचयन्तु –

१. ''परोपकाराय एव मम जीवनम्'' सज्जनाः चिन्तयन्ति ।

२. ''हितं मनोहारि च वचः दुर्लभम्'' महात्मनः वचनम् अस्ति ।

३. ''सत्यं वद'' गुरुः शिष्यम् अकथयत् ।

४. ''कुत्र प्रदर्शनम् ?'' मां मा पृच्छतु ।

५. ''उत्तिष्ठत जाग्रत'' स्वामिनः विवेकानन्दस्य उद्घोषः ।

१. ........................................................................... ।

२. ........................................................................... ।

३. ........................................................................... ।

४. ........................................................................... ।

५. ........................................................................... ।

2. 'इति'शब्दं परित्यज्य 'यत्'शब्दम् उपयुज्य उदाहरणानुसारं वाक्यानि परिवर्तयन्तु –

उदा॰ – १. ''ईशावास्यमिदं सर्वम्'' इति ईशावास्योपनिषदः कथनम् अस्ति ।
ईशावास्योपनिषदः कथनम् अस्ति यत् ईशावास्यमिदं सर्वम् ।

२. 'क्षम्यताम्, क्षम्यताम्' इति अनुजः अवदत् ।

........................................................................... ।

३. 'आगच्छतु, आगच्छतु' इति गृहस्वामी अवदत् ।

........................................................................... ।

४. 'शीघ्रं शीघ्रं चलतु' इति पिता कथयति ।

........................................................................... ।

५. 'मया एव क्रियते' इति शङ्करः कथयति ।

........................................................................... ।

६. 'वसुधैव कुटुम्बकम्' इति भावना विश्वशान्तेः मूलम् अस्ति ।

........................................................................... ।

www.thearyasamaj.org

# ३६ चतुर्थीविभक्तिः

पश्यन्तु, पठन्तु च ।



ग्राहकः



आपणिकः



ग्राहकः आपणिकाय धनं ददाति



छात्रा



शिक्षिका



छात्रा शिक्षिकायै पुष्पं ददाति



पत्रवाहकः



गृहिणी



पत्रवाहकः गृहिण्यै पत्रं ददाति

उच्चैः पठन्तु, जानन्तु च -

- धनिकः मित्राय उपायनं ददाति ।
- माता पुत्राय पायसं ददाति ।
- नेता कृषकाय क्षेत्रं ददाति ।
- जनाः भिक्षुकाय नाणकं ददति ।
- युवकः वृद्धायै उपनेत्रं ददाति ।
- सखी महिलायै छत्रं ददाति ।
- वैद्यः रुग्णायै औषधं यच्छति ।
- अग्रजः भगिन्यै वस्त्रं ददाति ।
- पितामहः जनन्यै आशिषं ददाति ।
- पतिः पत्न्यै आभूषणं यच्छति ।

www.thearyasamaj.org

## अवधेयम्

| प्रथमाविभक्तिः | | | चतुर्थीविभक्तिः | | |
|---|---|---|---|---|---|
| युवकः | युवकौ | युवकाः | युवकाय | युवकाभ्याम् | युवकेभ्यः |
| महिला | महिले | महिलाः | महिलायै | महिलाभ्याम् | महिलाभ्यः |
| पुत्री | पुत्र्यौ | पुत्र्यः | पुत्र्यै | पुत्रीभ्याम् | पुत्रीभ्यः |
| मित्रम् | मित्रे | मित्राणि | मित्राय | मित्राभ्याम् | मित्रेभ्यः |

**अभ्यासः**

### 1. उदाहरणानुगुणं वाक्यानि रचयन्तु -




उदा - पितामहः जनकाय प्रसादं ददाति ।

जनकः ------------------------------------------------

------------------------------------------------

------------------------------------------------

------------------------------------------------

------------------------------------------------

### 2. कोष्ठके विद्यमानानां शब्दानां साहय्येन वाक्यानि रचयन्तु -

उदा - स्वामी सेवकेभ्यः वेतनं ददाति ।

१. ........................................ ।

२. ........................................ ।

३. ........................................ ।

४. ........................................ ।

| | | |
|---|---|---|
| स्वामी | सेवकाः | वेतनम् |
| गृहिणी | भिक्षुकाः | अन्नम् |
| अधिकारी | सैनिकाः | पुरस्कारः |
| प्रधानाचार्यः | छात्राः | प्रमाणपत्रम् |
| आपणिकः | ग्राहकाः | वस्तूनि |

www.thearyasamaj.org

3. कोष्ठकस्य साहाय्येन राष्ट्रपतिः केभ्यः पुरस्कारं ददाति इति लिखन्तु -

| | | | | | | |
|---|---|---|---|---|---|---|
| वैज्ञानिकः | पण्डितः | बालिका | गायिका | नर्तकी | कवयित्री | मित्रम् |
| वैज्ञानिकाः | पण्डिताः | बालिकाः | गायिकाः | नर्तक्यः | कवयित्र्यः | मित्राणि |

उदा - राष्ट्रपतिः वैज्ञानिकाय पुरस्कारं ददाति । राष्ट्रपतिः वैज्ञानिकेभ्यः पुरस्कारं ददाति ।

१. राष्ट्रपतिः .......... पुरस्कारं ददाति । .......... ........ पुरस्कारं ददाति ।

२. .......... .......... पुरस्कारं ददाति । .......... ........ पुरस्कारं ददाति ।

३. .......... .......... पुरस्कारं ददाति । .......... ......... पुरस्कारं ददाति ।

४. .......... .......... पुरस्कारं ददाति । ......... .......... पुरस्कारं ददाति ।

५. .......... .......... पुरस्कारं ददाति । ......... ......... पुरस्कारं ददाति ।

६. ........... ......... पुरस्कारं ददाति । ......... ......... पुरस्कारं ददाति ।

एतानि वाक्यानि उच्चैः पठन्तु –

१. नेता प्रतिनिधये उपायनं ददाति ।

२. गुरुः वटवे आशिषं ददाति ।

३. आपणिकः उपभोक्त्रे वस्तु ददाति ।

४. कृषकः धेनवे सस्यं ददाति ।

५. श्वश्रूः वध्वै कङ्कणानि ददाति ।

६. बालः मात्रे फलं ददाति ।

७. भक्तः मूर्तये पुष्पम् अर्पयति ।

www.thearyasamaj.org

उच्चैः पठन्तु, जानन्तु च -

| | चतुर्थीविभक्तिरूपाणि | | |
|---|---|---|---|
| वैज्ञानिकः | वैज्ञानिकाय | वैज्ञानिकाभ्याम् | वैज्ञानिकेभ्यः |
| कविः | कवये | कविभ्याम् | कविभ्यः |
| अतिथिः | अतिथये | अतिथिभ्याम् | अतिथिभ्यः |
| राष्ट्रपतिः | राष्ट्रपतये | राष्ट्रपतिभ्याम् | राष्ट्रपतिभ्यः |
| गुरुः | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| बन्धुः | बन्धवे | बन्धुभ्याम् | बन्धुभ्यः |
| हिन्दुः | हिन्दवे | हिन्दुभ्याम् | हिन्दुभ्यः |
| भ्राता | भ्रात्रे | भ्रातृभ्याम् | भ्रातृभ्यः |
| अभियन्ता | अभियन्त्रे | अभियन्तृभ्याम् | अभियन्तृभ्यः |
| कार्यकर्ता | कार्यकर्त्रे | कार्यकर्तृभ्याम् | कार्यकर्तृभ्यः |
| शिक्षिका | शिक्षिकायै | शिक्षिकाभ्याम् | शिक्षिकाभ्यः |
| भगिनी | भगिन्यै | भगिनीभ्याम् | भगिनीभ्यः |
| मूर्तिः | मूर्त्यै / मूर्तये | मूर्तिभ्याम् | मूर्तिभ्यः |
| भूमिः | भूम्यै / भूमये | भूमिभ्याम् | भूमिभ्यः |
| सन्ततिः | सन्तत्यै / सन्ततये | सन्ततिभ्याम् | सन्ततिभ्यः |
| धेनुः | धेन्वै / धेनवे | धेनुभ्याम् | धेनुभ्यः |
| तनुः | तन्वै / तनवे | तनुभ्याम् | तनुभ्यः |
| रज्जुः | रज्ज्वै / रज्जवे | रज्जुभ्याम् | रज्जुभ्यः |
| वधूः | वध्वै | वधूभ्याम् | वधूभ्यः |
| माता | मात्रे | मातृभ्याम् | मातृभ्यः |
| मित्रम् | मित्राय | मित्राभ्याम् | मित्रेभ्यः |
| दधि | दध्ने | दधिभ्याम् | दधिभ्यः |
| वारि | वारिणे | वारिभ्याम् | वारिभ्यः |
| वस्तु | वस्तुने | वस्तुभ्याम् | वस्तुभ्यः |

www.thearyasamaj.org

## अभ्यासः

4. उदाहरणानुगुणं चतुर्थीविभक्तिरूपैः रिक्तस्थानानि पूरयन्तु -

| | | | |
|---|---|---|---|
| सारथिः | सारथये | सारथिभ्याम् | सारथिभ्यः |
| सेनापतिः | ............ | ............ | ............ |
| प्रतिनिधिः | ............ | ............ | ............ |
| वटुः | वटवे | वटुभ्याम् | वटुभ्यः |
| शत्रुः | ............ | ............ | ............ |
| दस्युः | ............ | ............ | ............ |
| पिता | पित्रे | पितृभ्याम् | पितृभ्यः |
| नेता | ............ | ............ | ............ |
| अधिवक्ता | ............ | ............ | ............ |
| भूमिः | भूम्यै / भूमये | भूमिभ्याम् | भूमिभ्यः |
| सन्ततिः | ......../......... | ............ | ............ |
| मूर्तिः | ......../......... | ............ | ............ |
| तनुः | तन्वै / तनवे | तनुभ्याम् | तनुभ्यः |
| धेनुः | ......../......... | ............ | ............ |
| रज्जुः | ......../......... | ............ | ............ |
| माता | ............ | ............ | ............ |
| दधि | दध्ने | दधिभ्याम् | दधिभ्यः |
| वारि | ............ | ............ | ............ |
| मधु | मधुने | मधुभ्याम् | मधुभ्यः |
| वस्तु | ............ | ............ | ............ |

www.thearyasamaj.org

एतस्य कोष्ठकस्य साहाय्येन वाक्यानि रचयन्तु -

| | | | | |
|---|---|---|---|---|
| नेता | कविः | कवयः | राङ्कवाणि | ददाति |
| गृहस्थः | अतिथिः | अतिथयः | पानीयं | |
| माता | शिशुः | शिशवः | क्रीडनकानि | |
| अभियन्ता | पटुः | पटवः | यन्त्राणि | |
| कृषकः | जन्तुः | जन्तवः | आहारं | |
| जननी | सन्ततिः | सन्ततयः | धनं | |
| भवान् | व्यक्तिः | व्यक्तयः | वस्त्राणि | |
| अधिकारी | अभिनेता | अभिनेतारः | पुरस्कारं | |
| शिक्षकः | अध्येता | अध्येतारः | पुस्तकानि | |
| अध्यक्षः | श्रोता | श्रोतारः | उपायनानि | |

१. यथा - नेता कवये राङ्कवाणि ददाति । नेता कविभ्यः राङ्कवाणि ददाति ।
२. ........................... ददाति । ........................... ददाति ।
३. ........................... ददाति । ........................... ददाति ।
४. ........................... ददाति । ........................... ददाति ।
५. ........................... ददाति । ........................... ददाति ।
६. ........................... ददाति । ........................... ददाति ।
७. ........................... ददाति । ........................... ददाति ।
८. ........................... ददाति । ........................... ददाति ।
९. ........................... ददाति । ........................... ददाति ।
१०. ........................... ददाति । ........................... ददाति ।

आवरणे विद्यमानस्य शब्दस्य चतुर्थीविभक्तिरूपेण रिक्तस्थानानि पूरयन्तु -

उदा - माता पुत्राभ्याम् (पुत्रौ) खाद्यं ददाति ।
१. स्वामी ................................ (प्रतिनिधी) धनं यच्छति ।
२. सः ................................ (मित्रे) उपायनानि ददाति ।
३. अनुजा ................................ (बन्धू) मधुरं यच्छति ।

www.thearyasamaj.org

४. अध्यक्षः ........................ (नर्तक्यौ) पुरस्कारं ददाति ।
५. अहं .......................... (भ्रातरौ) वस्त्राणि यच्छामि ।
६. अधिकारी .................. (सेविके) रूप्यकाणि ददाति ।
७. अग्रजः ............................ (धेनू) तृणानि यच्छति ।
८. भवान् .................... (कार्यकर्तारौ) मोदकानि ददाति ।
९. पुत्रः .......................... (मातरौ) फलानि यच्छति ।

उच्चैः पठन्तु, लिखन्तु च -

| | | | | |
|---|---|---|---|---|
| तत् | पुंलिङ्गे नपुंसकलिङ्गे च | तस्मै | ताभ्याम् | तेभ्यः |
| | स्त्रीलिङ्गे | तस्यै | ताभ्याम् | ताभ्यः |
| एतत् | पुंलिङ्गे नपुंसकलिङ्गे च | एतस्मै | एताभ्याम् | एतेभ्यः |
| | स्त्रीलिङ्गे | एतस्यै | एताभ्याम् | एताभ्यः |
| युष्मद् | त्रिषु लिङ्गेषु | तुभ्यम् | युवाभ्याम् | युष्मभ्यम् |
| अस्मद् | त्रिषु लिङ्गेषु | मह्यम् | आवाभ्याम् | अस्मभ्यम् |
| भवत् | पुंलिङ्गे नपुंसकलिङ्गे च | भवते | भवद्भ्याम् | भवद्भ्यः |
| | स्त्रीलिङ्गे | भवत्यै | भवतीभ्याम् | भवतीभ्यः |
| सर्व | पुंलिङ्गे नपुंसकलिङ्गे च | सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| | स्त्रीलिङ्गे | सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः |

आवरणे विद्यमानस्य शब्दस्य चतुर्थीविभक्तिरूपेण रिक्तस्थानं पूरयन्तु -

१. बालाः रुदन्ति । तेभ्यः (ते) चाकलेहं यच्छन्तु ।
२. बालिकाः जयं प्राप्तवत्यः । ........................... (ताः) पारितोषिकं दत्तवन्तः ।
३. कार्यकतारौ श्रान्तौ स्तः । ........................ (तौ) पानकं दद्मः ।
४. संस्कृतभारती सेवां करोति । ..........................(सा) सहकारं यच्छन्तु ।
५. अनुजः रुग्णः अस्ति । ........................... (सः) औषधं ददामि ।
६. एका एव लेखनी अस्ति । .............................. (का) ददानि ?
७. सर्वे सेवां कर्तुम् इच्छन्ति । .......................... (ते) अवसरं कल्पयामः ।
८. अत्र बहूनि पुस्तकानि सन्ति । ........................ (काः) दद्मः ।

www.thearyasamaj.org

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु ।

**तादर्थ्ये चतुर्थी**

सेवकः

१. चित्रकाराय (चित्रकारः) फलकं
२. ................... (भवान्) पुष्पाणि
३. ................... (पत्नी) मिष्टान्नं
४. ................... (त्वम्) अल्पाहारं
५. ................... (भवती) कागदानि
६. ................... (सा) आभूषणानि
७. ................... (अहम्) तक्रम्

आनयति

युवकः

१. कार्यालयाय (कार्यालयः) सङ्गणकं
२. ................... (भवन्तः) यानं
३. ................... (एषः) स्यूतं
४. ................... (सा) घटीं
५. ................... (का) लेखनीं
६. ................... (सर्वे) पुस्तकानि
७. ................... (गृहम्) वस्तूनि

क्रीणाति

***नमः योगे चतुर्थी***

'नमः' इति शब्दस्य योगः यत्र तस्य शब्दस्य चतुर्थीविभक्तिः भवति ।

यथा - शिवाय नमः । सीतायै नमः । लक्ष्म्यै नमः । विष्णवे नमः ।

(विशेषः - 'नमस्करोमि' इति क्रियापदस्य प्रयोगसन्दर्भे द्वितीयाविभक्तेः प्रयोगः करणीयः ।
यथा - अहं शिक्षकं नमस्करोमि ।)

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु -

उदा - (कविः) कवये नमः ।

१. (अतिथिः) ....................... । ६. (भवान्) ....................... ।
२. (महोदयः) ....................... । ७. (धेनुः) ....................... ।
३. (गुरुः) ....................... । ८. (शारदा) ....................... ।
४. (सरस्वती) ....................... । ९. (कुलपतिः) ....................... ।
५. (जन्मभूमिः) ....................... । १०. (माता) ....................... ।

www.thearyasamaj.org

## रोचतेः प्रयोगे चतुर्थी

पश्यन्तु, अवगच्छन्तु च –



बालकाय मधुरं रोचते ।
गीतायै नाटकं रोचते ।
मनोजाय उपन्यासः रोचते ।

- रोचते इत्यस्य प्रयोगे यस्मै रोचते तस्य चतुर्थीविभक्तिः भवति ।
- विशेषः - यत् रोचते तस्य तु प्रथमाविभक्तिः एव ।

1. कोष्ठकाधारेण उदाहरणानुगुणं वाक्यानि लिखन्तु ।

| | |
|---|---|
| बालकः | मधुरम् |
| गजः | इक्षुदण्डः |
| भगिनी | चित्रम् |
| अम्बिका | सङ्गीतम् |
| कार्यकर्ता | कार्यम् |
| मुनिः | आश्रमः |
| त्वम् | कदलीफलम् |
| शिशुः | क्रीडा |
| अहम् | शास्त्रम् |
| सन्ततिः | संस्कृतिः |
| वयम् | संस्कृतम् |

उदा॰ - बालकाय मधुरं रोचते ।

१. ....................

२. ....................

३. ....................

४. ....................

५. ....................

६. ....................

७. ....................

८. ....................

९. ....................

१०. ....................

www.thearyasamaj.org

क्रुध्यति / ईर्ष्यति / द्रुह्यति / असूयति

अधस्तनचित्रसाहाय्येन कः कस्मै क्रुध्यति / ईर्ष्यति / द्रुह्यति / असूयति इति लिखन्तु -




उदा० - १. कंसः कृष्णाय क्रुध्यति । २. ..............................

३. .............................. ४. ..............................

५. .............................. ६. ..............................

७. .............................. ८. ..............................

९. .............................. १०. ..............................

११. .............................. १२. ..............................

## अवधेयम्

- क्रुध्यति (कुप्यति), असूयति, ईर्ष्यति, द्रुह्यति इत्येतेषां प्रयोगः यत्र क्रियते तत्र क्रोधादीनां पात्रस्य चतुर्थीविभक्तिः भवति ।
  उदा० - रावणः रामाय क्रुध्यति / द्रुह्यति / ईर्ष्यति / असूयति ।

www.thearyasamaj.org



**अभ्यासः**

*किमर्थम् ?*

I. उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु –

उदा – सैनिकाः किमर्थम् उद्योगं कुर्वन्ति ?
सैनिकाः देशरक्षणाय उद्योगं कुर्वन्ति । (देशरक्षणम्)

१. छात्राः किमर्थं विद्यालयं गच्छन्ति ? (अध्ययनम्)

---------------------------------------------

२. जनाः किमर्थं भोजनं कुर्वन्ति ? (जीवनम्)

---------------------------------------------

३. पर्यटकाः किमर्थं भारतम् आगच्छन्ति ? (ज्ञानार्जनम्)

---------------------------------------------

४. सर्वे किमर्थं योगासनं कुर्वन्ति ? (स्वास्थ्यवर्धनम्)

---------------------------------------------

५. भारतीयाः किमर्थं प्रार्थनां कुर्वन्ति ? (मानवकल्याणम्)

---------------------------------------------

६. वैज्ञानिकाः किमर्थं विदेशं गच्छन्ति ? (अनुसन्धानम्)

---------------------------------------------

७. बालाः किमर्थं क्रीडाङ्गणं गच्छन्ति ? (क्रीडनम्)

---------------------------------------------

८. वयं किमर्थं मन्दिरं गच्छामः ? (अर्चनम्)

---------------------------------------------

९. पाचकः किमर्थं पाकशालायाम् अस्ति ? (भोजननिर्माणम्)

---------------------------------------------

१०. सर्वे किमर्थं तत्र समवेताः सन्ति ? (अवलोकनम्)

---------------------------------------------

www.thearyasamaj.org

2. कोष्ठकं दृष्ट्वा उचितयोः शब्दयोः योजनेन कः किमर्थं जीवनं कृतवान् इति लिखतु –

| | |
|---|---|
| रामः | स्वराज्यप्राप्तिः |
| विवेकानन्दः | दीनसेवा |
| बुद्धः | रामकार्यम् |
| तिलकः | दलितोद्धारः |
| मदनमोहनः | हिन्दुस्वराज्यनिर्माणम् |
| आञ्जनेयः | निद्रा |
| निवेदिता | जनसेवा |
| शिवराजः | विश्वविद्यालयस्थापनम् |
| कुम्भकर्णः | लोकाराधनम् |
| बसवेश्वरः | सनातनधर्मप्रचारः |

१. रामः लोकाराधनाय जीवनं कृतवान् ।

२. ..........

३. ..........

४. ..........

५. ..........

६. ..........

७. ..........

८. ..........

९. ..........

१०. ..........

www.thearyasamaj.org

3. स्वस्य विषये चिन्तनं कृत्वा अहं किमर्थं जीवनं करोमि इति ६ वाक्यानि लिखन्तु –

१. ........................................................................................................

२. ........................................................................................................

३. ........................................................................................................

४. ........................................................................................................

५. ........................................................................................................

६. ........................................................................................................

4. एतान् श्लोकान् उच्चैः पठन्तु –

विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय ।
खलस्य साधोः विपरीतमेतद् ज्ञानाय दानाय च रक्षणाय ॥

(दुष्टस्य विद्या विवादार्थम् एव भवति । तस्य धनं मदाय । शक्तिः च अन्यान् पीडयितुम् एव । परन्तु सज्जनस्य तु विद्या ज्ञानदानाय, धनं दानार्थं शक्तिः रक्षणार्थं च भवति ।)

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥

(रामाय नमः, रामभद्राय नमः, रामचन्द्राय नमः, वेधसे (सृष्टिकर्त्रे) नमः, रघुनाथाय, सीतायाः पतये, सर्वेषां नाथाय च नमः ।)

परोपकाराय फलन्ति वृक्षाः
परोपकाराय वहन्ति नद्यः
परोपकाराय दुहन्ति गावः ।
परोपकारार्थमिदं शरीरम् ॥

(वृक्षाः अन्येभ्यः उपकारं कर्तुम् एव फलन्ति । नद्यः अपि परोपकारार्थम् एव प्रवहन्ति । धेनवः परसाहाय्यार्थम् एव क्षीरं यच्छन्ति । अतः एतत् शरीरं परोपकाराय एव अस्ति ।)

www.thearyasamaj.org

# अन्धाय अनन्धाय देहि ३८

पुरा देवलः नाम सर्वशास्त्रकोविदः धार्मिकः ऋषिः आसीत् । तस्य सुवर्चला नाम गुणवती कन्यका आसीत् ।

सुवर्चला यदा प्राप्तवयस्का जाता तदा देवलः 'पुत्रीं कस्मै ददामि' इति चिन्ताकुलः अभवत्। तदा सुवर्चला एव पितरम् उक्तवती - ''पितः ! माम् अन्धाय अनन्धाय देहि'' इति । तत् श्रुत्वा देवलः अवदत् - ''पुत्रि ! किमर्थम् उन्मत्ता इव वदसि ?'' इति । सुवर्चला अवदत् - '' पितः ! नाहम् उन्मत्ता इव वदामि । सत्यमेव वदामि । भवान् येभ्यः मां दातुं चिन्तयति तादृशान् ऋषिकुमारान् अत्र आनयतु । अहमेव तेषु योग्यं चिनोमि'' इति ।

''त्वं यथा वदसि तथा'' इति उक्त्वा देवलः तादृशान् ऋषिकुमारान् आनेतुं सर्वेभ्यः आश्रमेभ्यः शिष्यान् प्रेषितवान् । देवलस्य प्रभावं सुवर्चलायाः ख्यातिं च श्रुत्वा बहवः ऋषिकुमाराः तां परिणेतुम् आगताः । देवलः तान् सर्वान् विधिवत् सम्पूज्य पुत्रीम् अवदत् - ''पुत्रि ! एतेषु योग्यं वरय । तस्मै ऋषिकुमाराय त्वां दास्यामि'' इति ।

सुवर्चला तान् दृष्ट्वा उक्तवती - ''भवत्सु: यः अन्धः अस्ति, अनन्धः अस्ति तस्मै पिता मां दास्यति'' इति । ऋषिकुमाराः तस्याः वचनं श्रुत्वा विस्मिताः जाताः ततः सर्वे परस्परं मुखं दृष्ट्वा असन्तोषेण देवलं कटुवचनैः निन्दित्वा स्वस्थानाय गतवन्तः । ततः सुवर्चला सन्तोषेण पितृगृहे एव आसीत् ।

अथ कदाचित् श्वेतकेतुः नाम न्यायविशारदः ऋषिकुमारः एतं वृत्तान्तं श्रुत्वा तत्र आगतवान्, यत्र देवलस्य आश्रमः आसीत् । देवलः तं विधिवत् सम्पूज्य पुत्रीम् उक्तवान् - ''उद्दालकस्य पुत्रः एषः श्वेतकेतुः महाप्राज्ञः अस्ति । एतं वरय'' इति । सुवर्चला तत् श्रुत्वा कुपिता अभवत् । तदा श्वेतकेतुः ताम् अवदत् - अहम् अन्धः अस्मि, अनन्धः अपि अस्मि'' इति । ''तत् कथम् ?'' इति सुवर्चला अपृच्छत् ।

श्वेतकेतुः अवदत् - ''परमात्मनः कारणादेव जीवात्मा अहं पश्यामि, शृणोमि, जिघ्रामि वा । परमात्मा एव चक्षुः । वस्तुतः सः एव पश्यति । नाहम् । अतः अहम् अन्धः । किन्तु मम कदापि संशयः न भवति । अतः संशयाभावरूपं चक्षुः मम अस्ति । अतः अहम् अनन्धः । एवम् अहम् अन्धः, अनन्धः अपि'' इति ।

श्वेतकेतोः उत्तरेण सुवर्चला नितरां सन्तुष्टा अभवत् । सा पितरम् अवदत् - ''पितः ! एषः मह्यं रोचते । मया एषः वृतः अस्ति । माम् एतस्मै ददातु'' इति ।

देवलः अपि अत्यन्तं सन्तोषेण श्वेतकेतवे सुवर्चलां दत्तवान् । सुवर्चला श्वेतकेतोः सहधर्मचरी अभवत् । तौ दम्पती दीर्घकालं यावत् सुखेन गार्हस्थ्यम् आचरितवन्तौ ।

www.thearyasamaj.org

◆ एतस्मिन् पाठे वर्णाक्षरैः मुद्रितानि पदानि अव्ययानि सन्ति –

## अवधेयम्

त्रिषु लिङ्गेषु, सप्तसु विभक्तिषु, त्रिषु वचनेषु च यत् विकारं न प्राप्नोति, तत् अव्ययम् ।

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ।।

यथा - त्रिषु लिङ्गेषु -

रामः अपि गच्छति । सीता अपि गच्छति । मित्रम् अपि गच्छति ।

सप्तसु विभक्तिषु -

राकेशः अपि पठति ।
राकेशम् अपि आह्वयतु ।
राकेशेन सह अपि क्रीडामि ।
राकेशाय अपि उपायनं ददातु ।
राकेशात् अपि धनं स्वीकरोतु ।
राकेशस्य अपि निवासः अत्र अस्ति ।
राकेशे अपि सद्गुणाः सन्ति ।

त्रिषु वचनेषु -

शिक्षकः अपि आगच्छति ।
शिक्षकौ अपि आगच्छतः ।
शिक्षकाः अपि आगच्छन्ति ।

एतेषु सर्वेषु वाक्येषु 'अपि' इत्यस्य कोऽपि विकारः नैव जातः । तत् सर्वत्रापि समानतया एव अस्ति । अव्ययानि एवमेव तिष्ठन्ति ।

यदा - तदा, यथा - तथा, यत्र - तत्र - इत्यादीनि नित्यसम्बद्धानि अव्ययानि । तन्नाम यत्र 'यदा' इत्यस्य प्रयोगः अस्ति तस्मिन् वाक्ये 'तदा' इत्यस्य अपि प्रयोगः भवति ।

www.thearyasamaj.org

उदाहरणम् -

यदा - तदा

यदा पञ्चवादनं भवति तदा बालकः उत्तिष्ठति ।
यदा रात्रिः भवति तदा चन्द्रोदयः भवति ।
यदा सूर्यः उदेति तदा कमलं विकसति ।

## अभ्यासः

1. 'यदा - तदा' अव्यययोः योजनेन वाक्यानि रचयन्तु -

१. अध्यापकः आगच्छति - छात्राः उत्तिष्ठन्ति →
यदा अध्यापकः आगच्छति, तदा छात्राः उत्तिष्ठन्ति ।

२. सूर्योदयः - स्नानम् → ..........................................

३. दशवादनम् - कार्यालयः → ..........................................

४. वसन्त-ऋतुः - कोकिलः → ..........................................

५. मित्रम् - समुद्रतीरम् → ..........................................

६. दीपावली - नूतनवस्त्रम् → ..........................................

७. जन्मदिनम् - अन्नदानम् → ..........................................

८. वर्षाकालः - वृक्षः → ..........................................

९. सिंहः - मृगः → ..........................................

१०. सङ्कटकालः - भगवद्गीता → ..........................................

www.thearyasamaj.org

2. 'कदा कदा भवन्तः जनसाहाय्यम् कुर्वन्ति' इति पञ्च वाक्यानि लिखन्तु -

उदा - यदा भूकम्पः भवति तदा अहं जनसाहाय्यं करोमि ।

१. ..............................................................................
२. ..............................................................................
३. ..............................................................................
४. ..............................................................................
५. ..............................................................................

एतं श्लोकम् उच्चैः पठन्तु -

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ।।

('यदा यदा धर्मस्य ग्लानिः भवति, अधर्मस्य च उत्कर्षः भवति,
तदा अहम् अवतारं करोमि' इति श्रीकृष्णः वदति ।)

यथा - तथा

यथा अश्वः धावति तथा धेनुः न धावति ।
यथा नरः करोति तथा वानरः करोति ।
भवती यथा वदति तथा अस्तु ।
भवान् यथा इच्छति तथा करोतु ।
सर्वेषाम् अभिप्रायः यथा अस्ति तथा भवतु ।

**अभ्यासः**

3. 'यथा - तथा' - अव्यययोः योजनेन एतेषां शब्दानां च साहाय्येन उदाहरणानुगुणं वाक्यानि रचयन्तु -

उदा० - माता - पिता → यथा मम माता गायति, तथा मम पिता न गायति ।

१. राजादेशः - सैनिकः →

.............................................................................. ।

२. दुर्योधनः - धृतराष्ट्रः →

.............................................................................. ।

www.thearyasamaj.org

३. हिरण्यकशिपुः - प्रह्लादः →

........................................................................ ।

४. राजा - प्रजा →

........................................................................ ।

५. रामः - विभीषणः →

........................................................................ ।

4. उदाहरणानुगुणं वाक्यानि रचयन्तु -

१. यथा पूर्वं जनाः आसन् तथा इदानीं न सन्ति ।
२. यथा माता पचति ........................................................................
३. यथा अध्यापिका वदति ........................................................................
४. यथा वैद्यः वदति ........................................................................
५. यथा नरः करोति ........................................................................
६. यथा हिमालयः अस्ति ........................................................................
७. यथा सिंहः गर्जति ........................................................................
८. यथा नर्तकी नृत्यति ........................................................................

5. लघुशिशुः मातरं दृष्ट्वा बहूनि कार्याणि करोति । यथा–तथा उपयुज्य ८ वाक्यानि लिखन्तु-

उदा - यथा माता सम्मार्जयति तथा पुत्री सम्मार्जयति ।

१. ........................................................................
२. ........................................................................
३. ........................................................................
४. ........................................................................
५. ........................................................................

एतं श्लोकम् उच्चैः पठन्तु -

यथा देशस्तथा भाषा यथा राजा तथा प्रजाः ।
यथा भूमिस्तथा तोयं यथा बीजस्तथाङ्कुरः ।।

www.thearyasamaj.org



यत्र पुष्पाणि सन्ति तत्र भ्रमराः आगच्छन्ति ।
भवन्तः यत्र वसन्ति तत्र एव संस्कृतकार्यं कुर्वन्तु ।
यत्र दीपः अस्ति तत्र अन्धकारः न भवति ।

6. 'यत्र - तत्र' - अव्यययोः योजनेन एतेषां शब्दानां साहाय्येन वाक्यानि रचयन्तु -

उदा : - रामनाम - आञ्जनेयः यत्र रामनामसङ्कीर्तनं भवति तत्र आञ्जनेयः भवति ।

१. शर्करा - पिपीलिकाः

........................................................................ ।

२. शब्दः - शिशुः

........................................................................ ।

३. भूकम्पः - समाजसेवकाः

........................................................................ ।

४. माता - शिशुः

........................................................................ ।

५. कृष्णः - विजयः

........................................................................ ।

६. धूमः - अग्निः

........................................................................ ।

७. पुष्पाणि - सुगन्धः

........................................................................ ।

८. पर्वतः - वायुः

........................................................................ ।

९. क्रीडाङ्गणम् - बालकाः

........................................................................ ।

१०. भक्तिः - देवानुग्रहः

........................................................................ ।

www.thearyasamaj.org

6. भवन्तः कुत्र कुत्र गच्छन्ति इति चिन्तयित्वा दश वाक्यानि लिखन्तु -

उदा॰ - यत्र उत्सवः भवति, तत्र अहं गच्छामि ।

१. ..........................................................................

२. ..........................................................................

३. ..........................................................................

४. ..........................................................................

५. ..........................................................................

६. ..........................................................................

७. ..........................................................................

८. ..........................................................................

९. ..........................................................................

१०. ..........................................................................

एतान् श्लोकांन् उच्चैः पठतु -

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिः ध्रुवा नीतिर्मतिर्मम ।।

(योगेश्वरः कृष्णः, धनुर्धारी अर्जुनः च यत्र भवतः तत्र लक्ष्मीः, विजयः, सम्पत्, अचला नीतिः च निश्चयेन भविष्यन्ति इति मम अभिप्रायः ।)

यत्र यत्र रघुनाथकीर्तनं तत्र तत्र कृतमस्तकाञ्जलिम् ।
बाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम् ।।

(यत्र यत्र श्रीरामचन्द्रस्य कीर्तनं भवति, तत्र तत्र हनूमान् भवति । सः मस्तके अञ्जलिं निधाय तिष्ठति । तस्य नेत्रे बाष्पजलेन पूर्णे भवतः । तस्य राक्षसनाशकस्य हनूमतः नमस्कारं कुर्वन्तु ।)

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ।।

(यत्र महिलानां गौरवं भवति तत्र देवाः सन्तोषेण तिष्ठन्ति । यत्र महिलानां गौरवं न भवति तत्र सर्वाः क्रियाः विफलाः भवन्ति ।)

www.thearyasamaj.org

३९

*अद्यतन-ह्यस्तन-श्वस्तन–पूर्वतन-इदानीन्तन–इत्यादयः*

पश्यन्तु, पठन्तु, अवगच्छन्तु च –



अहं सुरेशः ।
अद्य मम परीक्षा आसीत् ।
अहम् अद्यतनपरीक्षां सम्यक् लिखितवान् ।



अहं सारिका ।
ह्यः मम परीक्षा आसीत् ।
अहम् अपि ह्यस्तनपरीक्षां सम्यक् लिखितवती ।



वयं बालाः ।
श्वः अस्माकं परीक्षा भविष्यति ।
वयं श्वस्तनपरीक्षार्थम् अभ्यासं कुर्मः ।
वयं श्वस्तनपरीक्षां सम्यक् लेखिष्यामः ।

एतत् सम्भाषणम् उच्चैः पठन्तु –

भगिनी – भ्रातः ! भवान् कुत्र गतवान् आसीत् ? कार्यं कृतवान् वा न वा ?

भ्राता – भगिनि ! क्षम्यताम् । अहं कथनं विना गतवान् । अद्यतनं कार्यं तु अहं कृतवान् । परन्तु ह्यस्तनकार्यं न कृतवान् । अधुना करिष्यामि ।

भगिनी – शोभनम् । करोतु । श्वस्तनकार्यं श्वः एव करोतु ।

भ्राता – धन्यवादः । श्वस्तनकार्यं श्वः एव करिष्यामि ।

भगिनी – करोतु । अहम् गच्छामि । अहम् अपि अद्यतनकार्यं करिष्यामि । श्वस्तनकार्यस्य अपि अधुना सज्जता करणीया ।

भ्राता – कृतज्ञोऽस्मि । पुनः धन्यवादः ।

www.thearyasamaj.org

भगिनी - शोभनम् । श्यामम् अपि कथयतु, पूर्वतनकार्यस्य समापनाय ।
भ्राता - कथयिष्यामि । अधुना सः इदानीन्तनकार्यं करोति ।

## अभ्यासः

### 1. वाक्यानि उचितपदैः पूरणीयानि । पदानि कोष्ठके लिखितानि सन्ति ।

१. सुलेखा लेखनकार्यं सम्यक् करोति । सा .............. सम्यक् लिखितवती अस्ति ।
२. गिरीशः अधुना ..................... अभ्यासं करोति ।
३. श्यामा ..................... पूर्णतः पठिष्यति ।
४. बालाः ..................... नाट्याभ्यासं कुर्वन्ति ।
५. भवती ..................... कदा करिष्यति ?
६. दीपकः ..................... अधुना पर्यन्तं न कृतवान् ।

| |
|---|
| अद्यतननाटकस्य, ह्यस्तनलेखं, अद्यतनकार्यं<br>श्वस्तनकार्यक्रमाय, श्वस्तनपरीक्षार्थं, पूर्वतनकार्यं |

### 2. सम्भाषणं पूर्णं कुर्वन्तु –

सुधीरः - गिरीश ! ह्यस्तनपाठं लिखितवान् वा ?
गिरीशः - आम् महोदय ! .................................. लिखितवान् ।
सुधीरः - अधुना किं करोषि ?
गिरीशः - अधुना अहं ................. पाठस्य सज्जतां करोमि । भवान् किं करोति ?
सुधीरः - अहम् ............................. पाठं लिखामि ।
गिरीशः - शोभनम् । लिखतु । अहं गच्छामि ।

### 3. एतत् सम्भाषणं पठित्वा प्रश्नानाम् उत्तराणि लिखन्तु –

''गोविन्द ! किं भवतः अद्य परीक्षा आसीत् ?''
''आम् । आसीत् । ततः एव आगच्छामि ।''
''अद्यतनपरीक्षापत्रं कथम् आसीत् ।''
''अतीव सरलम् आसीत् ।''
''एवं वा ! पूर्वतनपरीक्षापत्रं कथम् आसीत् ।''

www.thearyasamaj.org

''तत् तु कठिनम् आसीत् ।''
''अहम् अधुना इदानीन्तनकार्यार्थं पत्रालयं गच्छामि ।''
''गच्छतु । भवान् श्वस्तनपरीक्षायाः सज्जतां कदा करिष्यति ?''
''सायङ्काले करिष्यामि । अधुना गच्छामि ।''

### प्रश्नाः

१. अतीव सरलं किम् आसीत् ? ............................................ ।
२. कठिनं किम् आसीत् ? ................................................ ।
३. गोविन्दः पत्रालयं किमर्थं गच्छति ? ................................. ।
४. गोविन्दः कस्याः सज्जतां सायङ्काले करिष्यति ? ........................ ।

## 4. निर्दिष्टपदानां प्रयोगद्वारा वाक्यानि रचयन्तु –

अद्यतनकार्यं – ........................................................ ।

ह्यस्तनपाठं – ......................................................... ।

श्वस्तननाटकं – ........................................................ ।

इदानीन्तनसूचनां – ..................................................... ।

## 5. कोष्ठकस्य साहाय्येन पञ्चवाक्यानि रचयन्तु –

| | | | |
|---|---|---|---|
| सः<br>सा | अद्यतन –<br>पूर्वतन –<br>श्वस्तन –<br>इदानीन्त –<br>ह्यस्तन – | समाचारं | पठितवान्<br>पठितवती<br>पठति<br>पठिष्यति |

१. ............................................................................ ।

२. ............................................................................ ।

३. ............................................................................ ।

४. ............................................................................ ।

५. ............................................................................ ।

www.thearyasamaj.org



*किन्तु / निश्चयेन / प्रायशः / खलु / अपेक्षया*

एतत् सम्भाषणम् उच्चैः पठन्तु –



सुमितः - राकेश ! शीघ्रम् आगच्छतु, कार्यालयस्य समयः अभवत् ।

राकेशः - सुमित ! अद्य आवां केन यानेन कार्यालयं गच्छाव ?

सुमितः - भवतः यानम् अस्ति **खलु** ? तेन एव गच्छावः ।

राकेशः - यानम् अस्ति, **किन्तु** तत् सम्यक् नास्ति ।

सुमितः - किम् अभवत् यानस्य ?

राकेशः - किं जातम् इति **निश्चयेन** वक्तुं न शक्नोमि । **प्रायशः** चक्रस्य शृङ्खलायां दोषः जातः । भवतु, अधुना लोकयानेन गच्छाव ।

सुमितः - मित्र ! लोकयानेन मास्तु । विलम्बः जातः अस्ति । अहं चिन्तयामि यत् लोकयानस्य **अपेक्षया** त्रिचक्रिकया गमनं वरम् इति ।

राकेशः - अस्तु । तथैव गच्छावः ।

उच्चैः पठन्तु, जानन्तु च -

१. अहं मधुरं खादामि, किन्तु अधिकं न ।

२. सः विद्यालयं गतवान्, किन्तु पुस्तकं विस्मृतवान् ।

३. वयं निश्चयेन संस्कृतं पठिष्यामः ।

४. भारतं निश्चयेन विश्वगुरुः भविष्यति ।

५. प्रायशः बालाः क्रीडाप्रियाः भवन्ति ।

६. भारते प्रायशः सर्वेषु राज्येषु जनाः संस्कृतेन वदन्ति ।

७. दुर्योधनस्य अपेक्षया भीमः बलवान् आसीत् ।

८. कच्छपस्य अपेक्षया शशः वेगेन धावति ।

www.thearyasamaj.org

## अभ्यासः

1. कोष्ठकतः उचितं पदं चित्वा रिक्तस्थाने पूरयन्तु -

| किन्तु | निश्चयेन | प्रायशः | अपेक्षया |
|---|---|---|---|

१. सः बालः अस्ति, सः निश्चयेन युवकः भविष्यति ।

२. नगरस्य वातावरणं कलुषितं भवति, ........................ ग्रामस्य वातावरणं स्वच्छं भवति ।

३. पाचकः सूपं कृतवान्, ........................ लवणं योजितवान् ।

४. संस्कृतं ........................................ जनभाषा भविष्यति ।

५. ते ...................................... प्रतिदिनं विलम्बेन आगच्छन्ति ।

६. बेङ्गलूरुनगरस्य ........................ चेन्नैनगरे अधिकम् औष्ण्यं भवति ।

७. अहं बहु पठामि, ...................................... सर्वं न स्मरामि ।

८. आवां ...................................... श्वः भ्रमणार्थं गमिष्यावः ।

2. उदाहरणानुगुणम् 'अपेक्षया' इति पदम् उपयुज्य वाक्यानि पूरयन्तु -

उदा - (उत्तरप्रदेशः) उत्तरप्रदेशस्य अपेक्षया उत्तराञ्चलं लघुप्रदेशः अस्ति ।

१. (लेखनी) ........................................ मापिका दीर्घा भवति ।

२. (पाण्डवाः) ............................ कौरवाणां सङ्ख्या अधिका आसीत् ।

३. (भवान्) ................................................ ते चतुराः सन्ति ।

४. (रामायणम्) ......................... महाभारते अधिकाः श्लोकाः सन्ति ।

५. (फलानि) .................................... मह्यं मधुरम् अधिकं रोचते ।

६. (मानवः) ................................. कच्छपः अधिकं कालं जीवति ।

७. (तौ) ................................................ एषः सम्यक् पठति ।

८. (सा) ............................................ मम माता ज्येष्ठा अस्ति ।

९. (नलिनी) ........................................ गीता मन्दम् अलिखत् ।

१०. (आम्रवृक्षः) ................................. नारिकेलवृक्षः उन्नतः भवति ।

www.thearyasamaj.org



तृतीयाविभक्तिः

पश्यन्तु, उच्चैः पठन्तु च –



बालकः



चमसः



बालकः चमसेन खादति ।



छात्रः द्विचक्रिकया गच्छति ।



बालिका लेखन्या लिखति ।



पुरुषः जलेन सिञ्चति ।

उच्चैः पठन्तु -

१. शिक्षकः सुधाखण्डेन लिखति ।

२. महिला मालया अलङ्करोति ।

३. गणेशः मूषकेण गच्छति ।

४. जनाः दुग्धेन शिवं पूजयन्ति ।

५. सः छुरिकया शाकं कर्तयति ।

६. अहं कुञ्चिकया तालम् उद्घाटयामि ।

७. जनाः विमानेन प्रयाणं कुर्वन्ति ।

८. माता दीपेन पूजयति ।

९. सौचिकः कर्तर्या कर्तयति ।

१०. भक्तः हस्ताभ्याम् देवं प्रणमति ।

www.thearyasamaj.org

## अवधेयम्

| प्रथमाविभक्तिरूपाणि | | | तृतीयाविभक्तिरूपाणि | | |
|---|---|---|---|---|---|
| हस्तः | हस्तौ | हस्ताः | हस्तेन | हस्ताभ्याम् | हस्तैः |
| माला | माले | मालाः | मालया | मालाभ्याम् | मालाभिः |
| सूची | सूच्यौ | सूच्यः | सूच्या | सूचीभ्याम् | सूचीभिः |
| फलं | फले | फलानि | फलेन | फलाभ्याम् | फलैः |

### अभ्यासः

1. तृतीयाविभक्तिरूपैः रिक्तस्थानं पूरयन्तु -

युवकः

१. हस्तः ➞ ............................ लिखति ।
२. घटः ➞ ..................... जलम् आनयति ।
३. कर्णौ ➞ कर्णाभ्याम् शृणोति ।
४. पादौ ➞ ............................ चलति ।
५. पुष्पाणि ➞ ...................... पूजां करोति ।

2. उदाहरणानुगुणं वाक्यानि रचयन्तु –

१. जनाः (दीपाः) दीपैः पूजां कुर्वन्ति ।
२. वयं (नेत्रे) ........................................ पश्यामः ।
३. सेविका (सम्मार्जनी) ........................... स्वच्छं करोति ।
४. पर्यटकः (कूप्यः) .............................. जलं पिबति ।
५. भीमः (गदा) .............................. युद्धं करोति ।
६. गजाः (पादाः) ...............................चलन्ति ।
७. मुनयः (घृतम्) .............................. हवनं कुर्वन्ति ।
८. कपयः (फलानि) ................................ क्रीडन्ति ।
९. युवत्यः (पुष्पाणि) ........................... मालां रचयन्ति ।
१०. बालिकाः (द्विचक्रिकाः) .................... विद्यालयं गच्छन्ति ।

www.thearyasamaj.org

2. उच्चैः पठन्तु, जानन्तु च -

| प्रथमाविभक्तिः | | | तृतीयाविभक्तिः | | |
|---|---|---|---|---|---|
| बालः | बालौ | बालाः | बालेन | बालाभ्याम् | बालैः |
| घटः | घटौ | घटाः | घटेन | घटाभ्याम् | घटैः |
| मुनिः | मुनी | मुनयः | मुनिना | मुनिभ्याम् | मुनिभिः |
| गिरिः | गिरी | गिरयः | गिरिणा | गिरिभ्याम् | गिरिभिः |
| शिशुः | शिशू | शिशवः | शिशुना | शिशुभ्याम् | शिशुभिः |
| तन्तुः | तन्तू | तन्तवः | तन्तुना | तन्तुभ्याम् | तन्तुभिः |
| वक्ता | वक्तारौ | वक्तारः | वक्त्रा | वक्तृभ्याम् | वक्तृभिः |
| दाता | दातारौ | दातारः | दात्रा | दातृभ्याम् | दातृभिः |
| महिला | महिले | महिलाः | महिलया | महिलाभ्याम् | महिलाभिः |
| मापिका | मापिके | मापिकाः | मापिकया | मापिकाभ्याम् | मापिकाभिः |
| मूर्तिः | मूर्ती | मूर्तयः | मूर्त्या | मूर्तिभ्याम् | मूर्तिभिः |
| मतिः | मती | मतयः | मत्या | मतिभ्याम् | मतिभिः |
| दर्वी | दर्व्यौ | दर्व्यः | दर्व्या | दर्वीभ्याम् | दर्वीभिः |
| कर्तरी | कर्तर्यौ | कर्तर्यः | कर्तर्या | कर्तरीभ्याम् | कर्तरीभिः |
| भगिनी | भगिन्यौ | भगिन्यः | भगिन्या | भगिनीभ्याम् | भगिनीभिः |
| धेनुः | धेनू | धेनवः | धेन्वा | धेनुभ्याम् | धेनुभिः |
| रज्जुः | रज्जू | रज्जवः | रज्ज्वा | रज्जुभ्याम् | रज्जुभिः |
| चञ्चुः | चञ्चू | चञ्चवः | चञ्च्वा | चञ्चुभ्याम् | चञ्चुभिः |
| वधूः | वध्वौ | वध्वः | वध्वा | वधूभ्याम् | वधूभिः |
| पुष्पम् | पुष्पे | पुष्पाणि | पुष्पेण | पुष्पाभ्याम् | पुष्पैः |
| वस्त्रम् | वस्त्रे | वस्त्राणि | वस्त्रेण | वस्त्राभ्याम् | वस्त्रैः |
| पुस्तकम् | पुस्तके | पुस्तकानि | पुस्तकेन | पुस्तकाभ्याम् | पुस्तकैः |

www.thearyasamaj.org

3. उदाहरणं दृष्ट्वा तृतीयाविभक्तिरूपैः रिक्तस्थानानि पूरयन्तु -

| | | | |
|---|---|---|---|
| सैनिकः | सैनिकेन | सैनिकाभ्याम् | सैनिकैः |
| दण्डः | .............. | .............. | .............. |
| गणेशः | .............. | .............. | .............. |
| अतिथिः | अतिथिना | अतिथिभ्याम् | अतिथिभिः |
| निधिः | .............. | .............. | .............. |
| कपिः | .............. | .............. | .............. |
| साधुः | साधुना | साधुभ्याम् | साधुभिः |
| वटुः | .............. | .............. | .............. |
| तरुः | .............. | .............. | .............. |
| पिता | पित्रा | पितृभ्याम् | पितृभिः |
| भ्राता | .............. | .............. | .............. |
| अध्येता | .............. | .............. | .............. |
| शिक्षिका | शिक्षिकया | शिक्षिकाभ्याम् | शिक्षिकाभिः |
| तुला | .............. | .............. | .............. |
| पत्रिका | .............. | .............. | .............. |
| मतिः | मत्या | मतिभ्याम् | मतिभिः |
| दृष्टिः | .............. | .............. | .............. |
| स्मृतिः | .............. | .............. | .............. |
| घटी | घट्या | घटीभ्याम् | घटीभिः |
| वेल्लनी | .............. | .............. | .............. |
| रज्जुः | .............. | रज्जुभ्याम् | .............. |
| वधूः | वध्वा | .............. | .............. |
| माता | मात्रा | .............. | .............. |
| पत्रम् | पत्रेण | पत्राभ्याम् | पत्रैः |
| वातायनम् | .............. | .............. | .............. |
| द्वारम् | .............. | .............. | .............. |

www.thearyasamaj.org

## अभ्यासः

1. कोष्ठके विद्यमानानां शब्दानां तृतीयाविभक्तिरूपं प्रयुज्य वाक्यं पूरयन्तु -

१. अश्वाः पादैः धावन्ति ।
२. वयं ................ वदामः ।
३. भीमः दुर्योधनः च ............. युद्धं कृतवन्तौ ।
४. कृषकः ............................ कर्षति ।
५. यशोदा ......................... कृष्णं बध्नाति ।
६. सेवकः......................... जलम् आनयति ।
७. महिलाः .............................. अर्चन्ति ।
८. आपणिकः ......................... तोलयति ।
९. छात्राः .............................. लिखन्ति ।
१०. तन्तुवायः ......................... वस्त्रं वयति ।
११. अहं............................... जलं पूरयामि ।
१२. माता ...................... भोजनं परिवेषयति ।
१३. सः .................................. चुटति ।

| | |
|---|---|
| १. पादाः | २. मुखम् |
| ३. गदे | ४. हलम् |
| ५. रज्जुः | ६. द्रोण्यौ |
| ७. पुष्पाणि | ८. तुला |
| ९. लेखन्यः | १०. तन्तवः |
| ११. घटः | १२. दर्वी |
| १३. अङ्गुल्यौ | |

2. 'क' विभागे एकः शब्दः दत्तः अस्ति । 'ख' विभागे तस्य शब्दस्य तृतीयाविभक्तेः रूपद्वयं दत्तम् अस्ति । तयोः उचितं रूपं चित्वा रिक्तस्थाने लिखन्तु -

यथा - १. चषकौ - चषकाभ्याम्
२. मापिका – ..................
३. ..................
४. ..................
५. ..................
६. ..................
७. ..................
८. ..................
९. ..................
१०. ..................

| क | ख |
|---|---|
| १. चषकौ | १. मातृभ्याम्,मातृभिः |
| २. मापिका | २. चित्रैः, चित्रेण |
| ३. नद्यः | ३. सूचीभिः, सूच्या |
| ४. साधवः | ४. नद्या, नदीभिः |
| ५. मातरः | ५. मित्रैः, मित्राभ्याम् |
| ६. गायकाः | ६. मापिकाभिः, मापिकया |
| ७. अङ्कन्यौ | ७. साधुभ्याम्, साधुभिः |
| ८. चित्रम् | ८. चषकेण, चषकाभ्याम् |
| ९. सूची | ९. अङ्कनीभिः, अङ्कनीभ्याम् |
| १०. मित्राणि | १०. गायकेन, गायकैः |

www.thearyasamaj.org

3. उदाहरणं दृष्ट्वा प्रश्नान् लिखन्तु -

| | |
|---|---|
| १. शिक्षकः सुधाखण्डेन लिखति । | प्र. - शिक्षकः केन लिखति ? |
| २. छात्राः हस्ताभ्यां प्रणमन्ति । | प्र. - छात्राः काभ्यां प्रणमन्ति ? |
| ३. युवकाः घट्या समयं जानन्ति । | प्र. - ................................ |
| ४. वैज्ञानिकः सूक्ष्मदर्शकेन पश्यति । | प्र. - ................................ |
| ५. बालिकाः लेखनीभिः लिखन्ति । | प्र. - ................................ |
| ६. गजाः पादैः चलन्ति । | प्र. - ................................ |
| ७. ऋषयः मन्त्रैः देवं पूजयन्ति । | प्र. - ................................ |
| ८. चटकाः चञ्चुभिः भक्षयन्ति । | प्र. - ................................ |
| ९. तौ गदाभ्यां युद्धं कुरुतः । | प्र. - ................................ |
| १०. सौचिकाः सूचीभिः सीव्यन्ति । | प्र. - ................................ |
| ११. भ्रातरः वाहनैः भ्रमन्ति । | प्र. - ................................ |
| १२. युवकाः अङ्गुलीभ्यां शिशुं चुटन्ति । | प्र. - ................................ |
| १३. मीरा श्रद्धया भजनानि गीतवती । | प्र. - ................................ |
| १४. देवाः भक्त्या प्रसन्नाः भवन्ति । | प्र. - ................................ |
| १५. वयं संस्कृतेन वदामः । | प्र. - ................................ |
| १६. पिता प्रीत्या वदति । | प्र. - ................................ |
| १७. शिशवः आनन्देन क्रीडन्ति । | प्र. - ................................ |
| १८. त्वं कर्णाभ्यां श्रृणोषि । | प्र. - ................................ |
| १९. भवन्तः कन्दुकेन क्रीडन्तु । | प्र. - ................................ |
| २०. ते गर्दभाभ्यां भारं नयन्ति । | प्र. - ................................ |

www.thearyasamaj.org

4. आवरणे दत्तस्य शब्दस्य उचितेन विभक्तिरूपेण रिक्तस्थानं पूरयन्तु -

१. दर्व्यः तत्र सन्ति । ताभिः (ताः) भवती परिवेषयतु ।

२. कूर्चाः समीचीनाः सन्ति ।............................(ते) चित्रकारः चित्राणि लिखति ।

३. छुरिका तीक्ष्णा अस्ति । .................................(सा) जागरूकतया कर्तयतु ।

४. पुष्पाणि सुन्दराणि सन्ति ।..................................(तानि) देवम् अर्चामः ।

५. विमानं शीघ्रं गच्छति ।....................................(सः) भवान् प्रयाणं करोतु ।

६. कूष्माण्डः उत्तमः अस्ति । .....................................(सः) क्वथितं करोतु ।

उच्चैः पठन्तु -

| प्रथमाविभक्तिः | तृतीयाविभक्तिः | | |
|---|---|---|---|
| सः / तत् | तेन | ताभ्याम् | तैः |
| एषः / एतत् | एतेन | एताभ्याम् | एतैः |
| कः / किम् | केन | काभ्याम् | कैः |
| सा | तया | ताभ्याम् | ताभिः |
| एषा | एतया | एताभ्याम् | एताभिः |
| का | कया | काभ्याम् | काभिः |
| भवान् | भवता | भवद्भ्याम् | भवद्भिः |
| भवती | भवत्या | भवतीभ्याम् | भवतीभिः |
| अहम् | मया | आवाभ्याम् | अस्माभिः |
| त्वम् | त्वया | युवाभ्याम् | युष्माभिः |
| सर्वः / सर्वम् | सर्वेण | सर्वाभ्याम् | सर्वैः |
| सर्वा | सर्वया | सर्वाभ्याम् | सर्वाभिः |

www.thearyasamaj.org

## सहयोगे तृतीया

उच्चैः पठन्तु, जानन्तु च -



बालः गच्छति ।



युवकः गच्छति ।



बालः युवकेन सह गच्छति ।



पुरुषः महिलया सह सम्भाषणं करोति ।



अर्जुनः भगिन्या सह क्रीडति ।



शिशुः मात्रा सह अस्ति ।

एतानि वाक्यानि उच्चैः पठन्तु -

१. शिशुः मात्रा सह प्रसन्नः भवति ।
२. सैनिकाः लवकुशाभ्यां सह युद्धं कृतवन्तः ।
३. श्रीकृष्णः पाण्डवैः सह आसीत् ।
४. राजा मुनिना सह वार्तालापं करोति ।
५. बालिकाः शिक्षिकाभिः सह भ्रमणार्थं गच्छन्ति ।
६. त्वं भगिन्या सह पठ ।
७. भवन्तः अस्माभिः सह क्रीडन्तु ।
९. अहं त्वया सह चलामि ।
१०. सः अतिथिभिः सह उपविशति ।

www.thearyasamaj.org

## अभ्यासः

### 1. कोष्ठकात् शब्दं स्वीकृत्य रिक्तस्थानानि पूरयन्तु –

| |
|---|
| युवकः |
| गजाः |
| महिलाः |
| भगिन्यौ |
| भवान् |
| युवाम् |
| सर्वे |
| नट्यः |
| ओदनम् |
| एतौ |
| कौरवाः |
| शोभा |
| वधूः |
| कपयः |

१. बालकाः युवकेन सह क्रीडन्ति ।
२. भवन्तः .................. सह न क्रीडन्तु ।
३. पुरुषाः ...................... सह गायन्ति ।
४. माता .............. सह मन्दिरं गमिष्यति ।
५. सः ..................... सह खादिष्यति ।
६. सर्वे ............. सह क्रीडितुम् इच्छन्ति ।
७. वयं ............... सह वार्तालापं कुर्मः ।
८. नायकाः .................... सह नृत्यन्ति ।
९. जनाः .................. सह सूपं खादन्ति ।
१०. अहम् ................ सह गीतं गास्यामि ।
११. पाण्डवाः ............ सह युद्धम् अकुर्वन् ।
१२. शालिनी .................... सह गच्छति ।
१३. श्वश्रूः ............... सह पाकम् अकरोत् ।
१४. रामः .............. सह लङ्काम् अगच्छत् ।

### 2. उदाहरणं दृष्ट्वा वाक्यानि रचयन्तु –

१. सीता रामेण सह वनं गच्छति । (रामः)
२. अहं ............................ सह क्रीडामि । (बालकः)
३. सः ................................ पठति । (मित्रम्)
४. त्वं ............................. सह चल । (अहम्)
५. राजा ......................... वार्तालापं करोति । (मुनिः)
६. वयं ............................. भ्रमामः । (भवान्)
७. पुत्राः ......................... आपणं गतवन्तः । (पिता)
८. युवां ............................. पठिष्यथ ? (कः)
९. कृष्णः ............................ युद्धं कृतवान् । (कंसः)
१०. बालिका ......................... गुडं खादति । (रोटिका)
११. माता ............................. मालां रचयति । (भगिनी)
१२. शिवः ............................ तिष्ठति । (पार्वती)

www.thearyasamaj.org

एतत् सम्भाषणम् उच्चैः पठन्तु -

अभिषेकः – गणेश ! त्वं प्रतिदिनं किं किं करोषि ?

गणेशः – अहं प्रातः मित्रेण सह भ्रमामि । अनन्तरं पित्रा सह योगासनं करोमि । नववादने भगिन्या सह पठामि । दशवादने मित्रैः सह विद्यालयं गच्छामि ।

माता – गणेश ! त्वया सह कः अस्ति ?

गणेशः – मातः ! मया सह अभिषेकः अस्ति ।

माता – आगच्छतु अभिषेक ! अस्माभिः सह भोजनं करोतु ।

अभिषेकः – मम अद्य उपवासः अस्ति ।

माता – एवं चेत् दुग्धेन सह फलं स्वीकरोतु ।

नन्दिनी – मातः ! मम कृते शाकं मास्तु । अहं रोटिकया सह गुडं स्वीकरोमि ।

माता – गणेश ! ओदनेन सह दधि इच्छति किम् ?

गणेशः – मास्तु । अनन्तरं दध्ना सह शर्करां मेलयित्वा खादामि ।

अभिषेकः – अस्तु, अहं गच्छामि ।

सर्वे – अस्तु, पुनः मिलामः ।

3. इदानीम् एतेषां प्रश्नानाम् उत्तराणि लिखन्तु -

१. गणेशः केन सह योगासनं करोति ?

........................................................................ ।

२. गणेशः कैः सह विद्यालयं गच्छति ?

........................................................................ ।

३. गणेशेन सह कः अस्ति ?

........................................................................ ।

४. अभिषेकः केन सह फलं खादति ?

........................................................................ ।

५. नन्दिनी कया सह गुडं खादति ?

........................................................................ ।

६. गणेशः शर्करां केन सह मेलयति ?

........................................................................ ।

www.thearyasamaj.org

पश्यन्तु, उच्चैः पठन्तु च -

*'विना' योगे तृतीया*



युवकः बालेन विना गच्छति ।

युवकः बालेन सह गच्छति ।



१. सूर्येण विना प्रकाशः न भवति ।
२. अहं मित्रेण विना विपणिं गच्छामि ।
३. घट्या विना समयस्य ज्ञानं न भवति ।
४. फेनकेन विना वस्त्रस्य मालिन्यं न गच्छति ।
५. रामः भरतशत्रुघ्नाभ्यां विना वनं गतवान् ।
६. वेदैः विना भारतस्य प्रसिद्धिः नास्ति ।
७. तुलया विना भारं ज्ञातुं न शक्नुमः ।
८. सैनिकैः विना सीमायाः रक्षणं न भवति ।
९. गृहं जनैः विना न शोभते ।
१०. दशरथः रामेण विना न जीवितवान् ।

**अभ्यासः**

1. कोष्ठके दत्तानां शब्दानां साहाय्येन वाक्यानि पूरयन्तु -

| | |
|---|---|
| १. बालः दुग्धेन विना भोजनं न करोति । | (दुग्धम्) |
| २. लक्ष्मणः ........................ विना वनं गतवान् । | (उर्मिला) |
| ३. भोजनं ...................... विना रुचिकरं न भवति । | (लवणम्) |
| ४. वृद्धः ............................... विना न चलति । | (दण्डः) |
| ५. सः ........................ विना कुत्रापि न गच्छति । | (अहम्) |
| ६. छात्रः ........................... विना कार्यं कुर्वन्ति । | (कोलाहलः) |
| ७. कुचेलः .................... विना चणकान् अखादत् । | (कृष्णः) |
| ८. सभा ............................... विना न शोभते । | (अध्यक्षः) |
| ९. देशः ............................... विना न शोभते । | (देशभक्ताः) |
| १०. ते .................................. विना न अटन्ति । | (वाहनम्) |

www.thearyasamaj.org

## 2. उदाहरणं दृष्ट्वा वाक्यं परिवर्तयन्तु –

| | |
|---|---|
| १. बालकः मात्रा सह गच्छति । | बालकः मात्रा विना न गच्छति । |
| २. सा मया सह पठति । | ............ |
| ३. तौ गायिकया सह गायतः । | ............ |
| ४. ऋषिभिः सह वटवः यज्ञं कुर्वन्ति । | ............ |
| ५. युवां बालकैः सह अटतम् । | ............ |
| ६. जनाः अस्माभिः सह भ्रमन्ति । | ............ |
| ७. सा सख्या सह गच्छति । | ............ |
| ८. अहं तया सह पुस्तकं लेखिष्यामि । | ............ |
| ९. छात्राः गुरुणा सह आलपन्ति । | ............ |
| १०. ते अभिनेत्र्या सह आगच्छन्ति । | ............ |

## 3. कोष्ठकतः शुद्धं रूपं चित्वा रिक्तस्थानं पूरयन्तु –

| | | | | |
|---|---|---|---|---|
| १. प्रधानमन्त्री सचिवेन विना विदेशं गतवान् । | (सचिवः) | सचिवस्य | सचिवेन | सचिवाय |
| २. वयं ........ विना न जीवामः । | (ते) | तेभ्यः | तेषाम् | तैः |
| ३. सेवकाः ....... विना कार्यं न कुर्वन्ति । | (आदेशः) | आदेशाय | आदेशेन | आदेशस्य |
| ४. वयं ........ विना द्रष्टुं न शक्नुमः । | (नेत्रे) | नेत्रयोः | नेत्राभ्याम् | नेत्रस्य |
| ५. त्वं ...... विना एव क्रीड । | (अहं) | मया | मम | माम् |
| ६. माता ....... विना आपणम् अगच्छत् । | (धनं) | धनस्य | धनाय | धनेन |
| ७. भवान् ....... विना किमर्थं न खादति ? | (मधुरम्) | मधुराय | मधुरेण | मधुरस्य |
| ८. ....... विना पुष्पाणि म्लायन्ते । | (जलम्) | जलेन | जलाय | जलस्य |
| ९. सा ......... विना कथं गमिष्यति । | (सख्यः) | सखीनाम् | सखीभिः | सख्यः |
| १०. एताः ....... विना आगतवत्यः । | (घट्यः) | घटीभिः | घटीषु | घटीनाम् |

www.thearyasamaj.org

4. उदाहरणं दृष्ट्वा रिक्तस्थानानि पूरयन्तु ।

*भाववाचकानां तृतीयाविभक्तिः*

यथा - बालकः .............. क्रीडति । (आनन्दः)
बालकः आनन्देन क्रीडति ।

१. गुरवः ............ पाठयन्ति । (परिश्रमः)
२. वयं ..............................वसामः । (सुखम्)
३. अश्वः .............................. धावति । (वेगः)
४. ताः स्पष्टतया वदन्ति । (स्पष्टता)
५. अहं .............................. गच्छामि । (जागरूकता)
६. अग्रजा ........................ कार्यं करोति । (सुन्दरता)
७. भवन्तः ....................... न उपविशन्तु । (दुःखम्)
८. मातरः बालकान् .................. पालयन्ति । (प्रीतिः)
९. त्वं ............................ देवं प्रणम । (भक्ति)
१०. अर्जुनः ................ विश्वरूपं दृष्टवान् । (आश्चर्यम्)
११. एते .............................. पश्यन्ति । (कुतूहलम्)
१२. यूयम् ................................ न पठथ । (आलस्यम्)

5. एतेषां शब्दानां तृतीयान्तरूपाणि लिखन्तु ।

| | |
|---|---|
| १. धैर्यम् - धैर्येण | २. आदरः ............................ |
| ३. सन्तोषः - ........................... | ४. उपेक्षा - ........................... |
| ५. ईर्ष्या - ............................ | ६. त्यागः - ........................... |
| ७. बलम् - ............................ | ८. कोपः - ........................... |
| ९. पूर्णता - ............................ | १०. सरलता - ......................... |
| ११. जल्पनम् - .......................... | १२. वार्तालापः - ....................... |
| १३. सुचारुता - ......................... | १४. विश्वासः - ......................... |
| १५. आचरणम् - ......................... | १६. शक्तिः - .......................... |
| १७. नीतिः - ............................ | १८. प्रीतिः - .......................... |
| १९. भीतिः - ............................ | २०. स्तुतिः - .......................... |

www.thearyasamaj.org

# ४२ तुमुन्–प्रत्ययान्तानि

उच्चैः पठन्तु, जानन्तु च -

छात्राः - श्रीमन् ! अद्य भवन् किं पाठयति ?

शिक्षकः - यूयं किं पठितुम् इच्छथ ।

छात्राः - वयं संस्कृतसम्भाषणविषये ज्ञातुम् इच्छामः ।

शिक्षकः - किं ज्ञातुम् इच्छथ ?

लता - अहं श्रुतवती यत् संस्कृतेन अपि सम्भाषणं कर्तुं शक्यते ।

मोहनः - एवं भवितुं न अर्हति । अहं विश्वसितुं न शक्नोमि ।

शिक्षकः - भोः ! लता सत्यम् उक्तवती । समीपे एव एकं सम्भाषणशिबिरं प्रचलति । द्रष्टुम् इच्छथ किम् ?

छात्राः - आम् ।

अभयः - श्रीमन् ! अहं किञ्चित् प्रष्टुम् इच्छामि ।

शिक्षकः - पृच्छ ।

अभयः - ये संस्कृतं पठितुं लेखितुं च जानन्ति, तेषाम् एव तत्र प्रवेशः भवति किम् ?

शिक्षकः - न भोः ! तथा नास्ति । तत्र यः किञ्चित् अपि संस्कृतं न जानाति सः अपि प्रवेष्टुम् अर्हति ।

छात्राः - श्रीमन् ! वयं सर्वेऽपि तत्र गन्तुम् उत्सुकाः स्मः ।

शिक्षकः - स्वागतम् । श्वः गमिष्यामः ।

## अभ्यासः

1. सम्भाषणं पठित्वा वाक्यानि पूरयन्तु -

१. यूयं किं पठितुम् इच्छथ ?

२. सम्भाषणं .......................................................... शक्यते ?

३. अहं .......................................................... न शक्नोमि ।

४. किञ्चित् .......................................................... इच्छामि ।

५. ये संस्कृतं .............................. च जानन्ति तेषां तत्र प्रवेशः भवति किम् ?

६. सः अपि .......................................................... अर्हति ।

www.thearyasamaj.org

## तुमुन्प्रत्ययान्तरूपाणि

| | | | |
|---|---|---|---|
| लिखति | लेखितुम् | आनयति | आनेतुम् |
| खादति | खादितुम् | प्रविशति | प्रवेष्टुम् |
| क्रीडति | क्रीडितुम् | विस्मरति | विस्मर्तुम् |
| चलति | चलितुम् | उत्तिष्ठति | उत्थातुम् |
| धावति | धावितुम् | उन्नयति | उन्नेतुम् |
| जानाति | ज्ञातुम् | अनुकरोति | अनुकर्तुम् |
| हसति | हसितुम् | आकर्षति | आक्रष्टुम् |
| ददाति | दातुम् | वदति | वदितुम् |
| तिष्ठति | स्थातुम् | युद्ध्यति | योद्धुम् |
| पश्यति | द्रष्टुम् | चिन्तयति | चिन्तयितुम् |
| गच्छति | गन्तुम् | भक्षयति | भक्षयितुम् |
| गायति | गातुम् | दहति | दग्धुम् |
| श्रृणोति | श्रोतुम् | नृत्यति | नर्तितुम् |
| नयति | नेतुम् | दण्डयति | दण्डयितुम् |

2. तुमुन्नन्तरूपस्य प्रयोगेण वाक्यद्वयम् एकं वाक्यं कृत्वा लिखन्तु -

१. धावकः धावति, क्रीडाङ्गणं गच्छति ।　　धावकः धावितुं क्रीडाङ्गणं गच्छति ।

२. बालक पठिष्यति, पुस्तकं स्वीकरिष्यति ।

............ पठितुं ........................................................ ।

३. शिशुः चलितवान्, प्रयत्नं कृतवान् ।

.................................................................................. ।

४. मातरः अर्चिष्यन्ति, मन्दिरं गमिष्यन्ति ।

.................................................................................. ।

५. भ्राता जलम् अपिबत्, पाकशालाम् अगच्छत् ।

.................................................................................. ।

www.thearyasamaj.org

६. ते वैज्ञानिकाः भविष्यन्ति, सम्यक् पठिष्यन्ति ।

.................................................................................... ।

७. सैनिकाः युद्धयन्ति, रणाङ्गणं गच्छन्ति ।

.................................................................................... ।

८. वक्ता अवदत्, सभाम् अगच्छत् ।

.................................................................................... ।

९. युवत्यः गायन्ति, मञ्चे तिष्ठन्ति ।

.................................................................................... ।

१०. अभियन्ता भवनं निर्माति, मानचित्रं लिखति ।

.................................................................................... ।

११. रामस्य सेना लङ्कां गच्छति, सेतुं निर्माति ।

.................................................................................... ।

१२. भगिन्यः चाकलेहं खादन्ति, आपणं गच्छन्ति ।

.................................................................................... ।

3. उदाहरणं दृष्ट्वा वाक्यानि रचयतु –

| | | | |
|---|---|---|---|
| १. सः | भ्रमणं | गच्छति । | सः भ्रमितुं गच्छति । |
| २. शिशवः | खेलनम् | इच्छन्ति । | ...... ......... .......... । |
| ३. त्वं | पठनं | प्रयत्नं कुरु । | ...... ......... .......... । |
| ४. भवन्तः | गमनं | शक्नुवन्ति । | ...... ......... .......... । |
| ५. आवां मालां | रचनं | वाटिकां गच्छवः । | ...... ......... .......... । |
| ६. युवाम् | अर्चनार्थं | कुत्र गच्छथः ? | युवाम् अर्चितुं कुत्र गच्छथः ? |
| ७. वध्वः | क्रयणार्थं | विपणिं गमिष्यन्ति । | ...... ......... .......... । |
| ८. प्रतिनिधयः | चर्चार्थम् | आगच्छन् । | ...... ......... .......... । |
| ९. भवती गीतं | श्रवणार्थं | किं करोति ? | ...... ......... .......... । |
| १०. भोजनम् | चर्वणार्थं | दन्ताः आवश्यकाः । | ...... ......... .......... । |

www.thearyasamaj.org

3. कोष्ठके विद्यमानानि पदानि दृष्ट्वा उदाहरणानुगुणं वाक्यानि रचयन्तु –

बालिका

खादति...................... उपाहारगृहं
भ्रमति ..................... काश्मीरं
अर्चति...................... मन्दिरम्
पठति...................... विद्यालयं
पत्रं प्रेषयति.................. पत्रालयं
मिलति ................ राष्ट्रपतिभवनं
स्नातिका भवति ......... महाविद्यालयं
रसं पास्यति.................. आपणं
क्रेष्यति...................... विपणिं
लेखिष्यति.................... प्रकोष्ठं

गच्छति

उदा – १. बालिका खेलितुं क्रीडाक्षेत्रं गच्छति ।
२. बालिका ............ ............ ............... ।
३. बालिका ............ .............. ............. ।
४. बालिका ............. ............. ............. ।
५. बालिका ............ ............... ............ ।
६. बालिका .......... ............... .............. ।
७. बालिका ........... .............. ............. ।
८. बालिका ........... .............. ............. ।
९. बालिका ......... .......... ........... ......... ।
१०. बालिका ........ .......... ........ ............ ।

www.thearyasamaj.org

# ४३ अतः

पश्यन्तु, उच्चैः पठन्तु च -



रात्रिः अभवत्, अतः चन्द्रः आकाशे उदितः ।

सुबोधः - सुरुचे ! भवती कुत्र गच्छति ? किम् आरोग्यं सम्यक् नास्ति ?

सुरुचिः - आं भ्रातः ! आरोग्यं सम्यक् नास्ति । अतः वैद्यस्य समीपं गच्छामि ।

सुबोधः - एवम् ! अहम् अपि आगच्छामि वैद्यस्य समीपम् ।

सुरुचिः - किमर्थम् ? किं जातम् ?

सुबोधः - भगिनि ! मम पादे पीडा अस्ति, अतः अहम् अपि आगच्छामि ।

सुरुचिः - तर्हि आगच्छतु भ्रातः ! शीघ्रं चलाव ।

सुबोधः - आगच्छामि ।

उच्चैः पठन्तु, जानन्तु च -

- यानं शीघ्रं प्राप्तम्, अतः अहं शीघ्रम् आगतः ।
- विद्युत् नास्ति, अतः व्यजनं न भ्रमति ।
- सः सम्यक् पठितवान्, अतः विषयं सम्यक् जानाति ।
- अस्य मूल्यम् अधिकम्, अतः अहं न क्रीणामि ।

## अवधेयम्

यानं शीघ्रं प्राप्तम् । अतः शीघ्रम् आगतः ।

अत्र आगमनं कार्यं, शीघ्रं यानप्राप्तिः कारणम् । एतादृशस्य वाक्यद्वयस्य प्रयोगः यदा भवति, तदा यत्र कारणवाक्यं पूर्वम् उच्यते, कार्यवाक्यं च अनन्तरम् उच्यते तत्र कार्यवाक्ये 'अतः' इति अव्ययपदं योज्यते ।

यथा - अद्य शैत्यम् अधिकम् अस्ति, अतः उष्णजलं पास्यामि ।

www.thearyasamaj.org

## अभ्यासः

### 1. उचितं कारणवाक्यं कार्यवाक्यं च योजयित्वा लिखन्तु -

| | | |
|---|---|---|
| वृष्टिः अभवत्<br>परिश्रमं करोति<br>विद्युत् अस्ति<br>आरोग्यं सम्यक् नास्ति<br>सत्कार्यं करिष्यसि<br>धनम् अस्ति<br>अभ्यासः अस्ति<br>विद्युत् नास्ति<br>तक्रम् अस्ति<br>उत्सवः अस्ति | अतः | भोजनं तक्रेण करोमि ।<br>सम्यक् संस्कृतेन वदति ।<br>कीर्तिं प्राप्स्यसि ।<br>दीपः न ज्वलति ।<br>सर्वत्र जलम् अस्ति ।<br>सर्वे सन्तुष्टाः सन्ति ।<br>साफल्यं प्राप्नोति ।<br>व्यजनं भ्रमति ।<br>निर्धनेभ्यः यच्छतु ।<br>चिकित्सालयं गच्छामि । |

१. वृष्टिः अभवत्, अतः सर्वत्र जलम् अस्ति ।
२. ............................................................ ।
३. ............................................................ ।
४. ............................................................ ।
५. ............................................................ ।
६. ............................................................ ।
७. ............................................................ ।
८. ............................................................ ।
९. ............................................................ ।
१०. ............................................................ ।

### 2. एतेषु वाक्येषु किं वाक्यं 'कारणवाक्यं' किञ्च 'कार्यवाक्यम्' इति लिखन्तु -

यथा - चिकित्सालयं गच्छामि । (कार्यवाक्यम्)

१. उत्सवः अस्ति । (..................)
२. वृष्टिः अभवत् । (..................)
३. अभ्यासः अस्ति । (..................)
४. व्यजनं चलति । (..................)
५. दीपः न ज्वलति । (..................)
६. विद्युत् नास्ति । (..................)
७. कीर्तिं प्राप्स्यति । (..................)
८. सत्कार्यं करिष्यसि । (..................)

www.thearyasamaj.org

# ४४ यतः



प्रकोष्ठे अन्धकारः नास्ति,
यतः दीपः ज्वलति ।

उच्चैः पठन्तु, जानन्तु च -

१. एषा बालिका स्वस्था, यतः एषा प्रतिदिनं भ्रमणं करोति ।
२. एषः बालकः अपि स्वस्थः, यतः एषः अपि प्रातः भ्रमणं करोति ।
३. दीपः न ज्वलति, यतः विद्युत् नास्ति ।
४. अहम् अभ्यासं करोमि, यतः सम्यक् संस्कृतं वक्तुम् इच्छामि ।
५. वयम् एव परिवेषणं कुर्मः, यतः अद्य अस्माकं पर्यायः अस्ति ।
६. अद्य बुधवासरः अस्ति, यतः ह्यः मङ्गलवासरः आसीत् ।

## अवधेयम्

अत्र वाक्येषु कार्यवाक्यं प्रथमम् उक्तम्, कारणवाक्यं च अनन्तरम् । 'यतः' इति अव्ययस्य प्रयोगः कारणवाक्येन सह कृतः अस्ति ।
उदा - अहम् उष्णजलं पातुम् इच्छामि, यतः अद्य शैत्यम् अस्ति ।

## अभ्यासः

1. उदाहरणं दृष्ट्वा 'अतः' स्थाने 'यतः' इति प्रयुज्य वाक्यानि परिवर्तयन्तु -

१. यानं शीघ्रं प्राप्तम्, अतः अहं शीघ्रम् आगतः ।
अहं शीघ्रम् आगतः, यतः यानं शीघ्रं प्राप्तम् ।

२. अस्य मूल्यम् अधिकम् अस्ति, अतः अहम् इदं न क्रीणामि ।

........................................................................... ।

३. भवतः अभ्यासः अस्ति, अतः भवान् सुन्दरं लिखति ।

........................................................................... ।

www.thearyasamaj.org

४. ते सदा सत्यं वदन्ति, अतः ते सत्यवादिनः सन्ति ।

........................................................................................ ।

५. सा सदैव राष्ट्रस्य सेवायां लग्ना, अतः सा राष्ट्रसेविका ।

........................................................................................ ।

६. नवीनः सम्यक् चित्रं लिखति, अतः सः चतुरः चित्रकारः ।

........................................................................................ ।

2. 'यतः' इति प्रयोगद्वारा वाक्यानि पुनः रचयन्तु –

१. बालाः शीघ्रं विद्यालयं गच्छन्ति । तेषां विद्यालये वार्षिकोत्सवः अस्ति ।

........................................................................................ ।

२. शैत्यकाले जनाः स्वेदकं धरन्ति । तदा बहुशैत्यं भवति ।

........................................................................................ ।

३. बालाः अपि संस्कृतं वदन्ति । बालानां संस्कृतसम्भाषणस्य अभ्यासः अस्ति ।

........................................................................................ ।

४. विज्ञानशिक्षणे प्रयोगः अनिवार्यः । विज्ञानं प्रायोगिकः विषयः ।

........................................................................................ ।

५. बालाः सदैव प्रश्नान् पृच्छन्ति । एषः बालानां स्वभावः ।

........................................................................................ ।

3. अधोलिखितानि वाक्यानि पठन्तु –

१. काकः जलं न अपिबत् । घटे जलं न्यूनम् आसीत् ।
२. युवकाः उत्साहिनः आसन् । ते स्वामिनः विवेकानन्दस्य जीवनचरित्रं पठितवन्तः ।
३. मयूराः हर्षेण नृत्यन्ति । वर्षाकालः आगतः ।
४. उत्साहिनः जनाः शीघ्रं कार्यं कुर्वन्ति । ते चिन्तयन्ति, जीवनं अमूल्यम् अस्ति ।

इदानीम् उदाहरणानुगुणं एतेषां प्रश्नानाम् उत्तरं लिखन्तु -

१. काकः किमर्थं जलं न अपिबत् ? यतः घटे जलं न्यूनम् आसीत् ।
२. युवकाः किमर्थम् उत्साहिनः आसन् ? ........................................ ।
३. मयूराः किमर्थं हर्षेण नृत्यन्ति ? ........................................ ।
४. उत्साहिनः जनाः किमर्थं शीघ्रं कार्यं कुर्वन्ति ? ........................................ ।

www.thearyasamaj.org

# ४५ सम्बोधनम्

पश्यन्तु, जानन्तु च -



पुत्रि ! लिख ।



पुत्र ! लिख ।



मित्र ! श्रृणु

## अवधेयम्

- सम्बोधनरूपस्य प्रयोगः सूचनार्थं भवति । सामान्यतः एतदर्थं (!) इति चिह्नस्य, अल्पविरामस्य (,) वा उपयोगः भवति । यथा - मित्र ! सखि ! पुत्रि ! पुत्र !
- सम्बोधनरूपात् पूर्वं 'भोः, हे, रे, अये' इत्यादीनि अपि कदाचित् प्रयुज्यन्ते ।
  यथा - हे मित्र !
- सामान्यसम्बोधनानि
  पुरुषम् उद्दिश्य - मित्र !
  महिलाम् उद्दिश्य - सखि ! भगिनि !
  सामान्यम् - भोः ! अयि भोः !
- आदरसूचनार्थं नामसूचकपदेन सह
  - पुंलिङ्गे - प्रायः वर्य-महोदय-महाशयमहाभागशब्दाः योज्यन्ते ।
    यथा - राजेशवर्य ! सुधीरमहोदय !
    राकेशमहाशय ! आशुतोषमहाभाग !
  - स्त्रीलिङ्गे - प्रायः वर्या-महोदया-भगिनीशब्दाः योज्यन्ते ।
    यथा - लतावर्ये ! रेखामहोदये ! लक्ष्मीभगिनि !
  - नामनिर्देशं विना -
    - पुंलिङ्गे - मान्य / आर्य / श्रीमन् - इत्यादीनि प्रयुज्यन्ते ।
    - स्त्रीलिङ्गे - मान्ये / आर्ये भगिनि - इत्यादीनि प्रयुज्यन्ते ।

www.thearyasamaj.org

सम्बोधनरूपाणि

| | | | |
|---|---|---|---|
| पुत्रः | पुत्र ! | पुत्रौ ! | पुत्राः ! |
| मान्या | मान्ये ! | मान्ये ! | मान्याः ! |
| अम्बा | अम्ब ! | अम्बे ! | अम्बाः ! |
| लक्ष्मीः | लक्ष्मि ! | लक्ष्म्यौ ! | लक्ष्म्यः ! |
| गौरी | गौरि ! | गौर्यौ ! | गौर्यः ! |
| पिता | पितः ! | पितरौ ! | पितरः ! |
| माता | मातः ! | मातरौ ! | मातरः ! |
| गुरुः | गुरो ! | गुरू ! | गुरवः ! |
| मित्रम् | मित्र ! | मित्रे ! | मित्राणि ! |
| मुनिः | मुने ! | मुनी ! | मुनयः ! |
| मन्त्री | मन्त्रिन् ! | मन्त्रिणौ ! | मन्त्रिणः ! |
| राजा | राजन् ! | राजानौ ! | राजानः ! |
| श्रीमान् | श्रीमन् ! | श्रीमन्तौ ! | श्रीमन्तः ! |

**अभ्यासः**

1. एतेषां सम्बोधनरूपाणि रिक्तस्थाने लिखन्तु –

| | | | |
|---|---|---|---|
| छात्रः | ............ | ............ | ............ |
| सरस्वती | ............ | ............ | ............ |
| पार्वती | ............ | ............ | ............ |
| शारदा | ............ | ............ | ............ |
| अम्बा | अम्ब ! | ............ | ............ |
| मित्रम् | ............ | ............ | ............ |
| पुत्री | ............ | ............ | ............ |
| मुनिः | ............ | ............ | ............ |
| भानुः | ............ | ............ | ............ |
| माता | ............ | ............ | ............ |
| भ्राता | ............ | ............ | ............ |
| हरिः | ............ | ............ | ............ |
| विष्णुः | ............ | ............ | ............ |

www.thearyasamaj.org

## 2. आवरणे लिखितानां शब्दानां सम्बोधनरूपैः वाक्यानि पूरयन्तु –

१. (अम्बा) ................ ! आगच्छतु, मां पाठयतु ।
२. (मित्रम्) ................ ! भवान् मया सह कदा आगमिष्यति ?
३. (मित्रम्) ................ ! वयं मिलित्वा एव अभ्यासार्थं गमिष्यामः ।
४. (पिता) ................ ! अहम् अद्य भवता सह एव गमिष्यामि ।
५. (पुत्री) ........................... ! उत्तिष्ठतु ।
६. (भगिनी) .................... ! अहं त्वया सह एव क्रीडिष्यामि ।
७. (विवेकः) ........................... ! अत्र आगत्य इदं पत्रं पठ ।
८. (शिष्यः) ................... ! अधुना श्लोकस्य भावं स्पष्टीकुरु ।
९. (शिक्षिका) ...................... ! सर्वे बालाः सभागारे सन्ति ।
१०. (कविः) ....................... ! एकां कवितां श्रावयतु कृपया ।
११. (सरस्वती) .......................... ! भवती माम् अनुगृह्णातु ।
१२. (बन्धुः) .............................. ! मम गृहम् आगच्छतु ।
१३. (भ्राता) ................ ! आवां संस्कृतभारतीं कदा गमिष्यावः ?
१४. (गुरुः) .................. ! कृपया अस्य पाठस्य विवेचनां करोतु ।
१५. (महोदयः) ............................ ! सर्वे जनाः कुत्र गताः ?

## 3. कोष्ठकतः वचनानुसारं सम्बोधनरूपाणि पृथक् कुर्वन्तु -

| | | | |
|---|---|---|---|
| मीमांसे ! | गुरवः ! | मातरौ ! | भ्रातरः ! |
| विवेक ! | बन्धो ! | कवी ! | पुत्र्यौ ! |
| श्रीमन् ! | अध्यापिकाः ! | भगिन्यौ ! | मित्राणि ! |

| एकवचने | द्विवचने | बहुवचने |
|---|---|---|
| ...................... | ........................ | ..................... |
| ...................... | ........................ | ..................... |
| ...................... | ........................ | ..................... |
| ...................... | ........................ | ..................... |

www.thearyasamaj.org

# ४६ गर्वभङ्गः

*अव्ययानि*

मत्स्यदेशस्य महाराजः विराटः । पाण्डवाः अज्ञातवाससमये विराटराजस्य आस्थाने प्रच्छन्नरूपेण आसन् । त्रिगर्तनरेशः सुशर्मा विराटराजस्य गोसम्पत्तिम् अपहर्तुं तत्र आगच्छति । विराटः युद्धार्थं सन्नद्धः भवति । पाण्डवाः अपि तेन सह युद्धार्थं गच्छन्ति । पाण्डवानां साहाय्येन विराटः युद्धे जयं प्राप्नोति । सः त्रिगर्तं गच्छति ।



अत्रान्तरे कौरवाः ससैन्यं विराटनगरम् आगत्य गोधनम् अपहरन्ति । तदा गवाध्यक्षः रक्षणाय राजकुमारम् उत्तरं निवेदयति । उत्तरः वदति - ''यद्यपि अहं युद्धे कुशलः, तथापि इदानीं न गच्छामि । यतः इदानीं मम सारथिः मृतः अस्ति । यदि सारथिः अस्ति, तर्हि अहं युद्धार्थं गमिष्यामि, दुर्योधनं भीष्मं, कर्णं, कृपं, द्रोणं च विद्राव्य गोधनं रक्षिष्यामि'' इति ।

तदा सैरन्ध्री वदति - ''अत्र बृहन्नला या अस्ति, पूर्वं सा अर्जुनस्य सारथिः आसीत् । तां नय'' इति । ततः सा एव बृहन्नलां तत्र आनयति । बृहन्नला वदति - ''गीतं, नृत्यं, वाद्यं वा करिष्यामि । सारथ्यं कथं करिष्यामि ?'' इति । उत्तरः वदति - ''गायकः, नर्तकः च अनन्तरं भव । इदानीन्तु सारथिः भव'' इति ।

ततः बृहन्नला रथम् आरुह्य अश्वं प्रेरयति । किन्तु युद्धभूमौ विशालं कुरुसैन्यं दृष्ट्वा उत्तरः हतोत्साहः भवति । सः वदति - ''मम पिता त्रिगर्तदेशं गतवान् अस्ति । सर्वामपि सेनां सः नीतवान् अस्ति । अहम् एकः बालः एतान् अस्त्रकोविदान् प्रतिरोद्धुं न शक्नोमि, बृहन्नले ! निवर्तस्व'' इति ।

बृहन्नला वदति - ''स्त्रीणां पुरतः बहु जल्पसि । इदानीं कथं युद्धं न करोषि ? यदि न युद्ध्यसि तर्हि सर्वे प्रहसिष्यन्ति'' इति ।

''ये केऽपि हसन्तु । मम चिन्ता नास्ति'' इति उक्त्वा उत्तरः रथात् अवतीर्य अधावत् । बृहन्नला तु ''एषः धर्मः न । क्षत्रियः कदापि पलायनं न करोति । युद्धमेव श्रेयः, न पलायनम्'' इति तम् अनुधावति । केशेषु गृह्णाति च । तदा उत्तरः वदति - ''तुभ्यं शतं सुवर्णनाणकानि ददामि । अष्ट मणीन् ददामि । उत्तमं रथम् अश्वान्, गजान् च ददामि । मां मुञ्च'' इति ।

www.thearyasamaj.org

''मास्तु चिन्ता । आवाम् अग्रे गच्छाव । त्वं मम सारथिः भव । अहं युद्धं करिष्यामि'' इति उक्त्वा बृहन्नला तं रथम् आरोपयति ।

ततः तौ श्मशानभूमिं गच्छतः । तत्र शमीवृक्षे पाण्डवैः पूर्वं रक्षितानि आयुधानि गृह्णीतः । तदा उत्तरः जिज्ञासया ''को भवान् ?'' इति बृहन्नलां पृच्छति । बृहन्नला - ''अहम् अर्जुनः । युधिष्ठिरः, भीमः, नकुलः, सहदेवश्चापि तव पितुः आश्रिताः एव सन्ति'' इति वदति । तदा उत्तरः धैर्यं प्राप्नोति ।

ततः प्रवृत्ते युद्धे अर्जुनः भीष्मद्रोणकर्णादिसहितान् कौरवान् पराजित्य विराटराजस्य गोधनं रक्षति । तावता पाण्डवानाम् अज्ञातवासः अपि समाप्तः भवति । विराटराजः स्वपुत्र्याः उत्तरायाः विवाहम् अर्जुनस्य पुत्रेण अभिमन्युना सह कारयति ।

## अभ्यासः

1. एतेषां प्रश्नानाम् उत्तरं लिखन्तु -

१. विराटः कस्य देशस्य महाराजः ?

..........................................................................................

२. गवाध्यक्षः रक्षणाय कं निवेदयति ?

..........................................................................................

३. त्रिगर्तनरेशः कः ?

..........................................................................................

४. उत्तरः कुत्र बहु जल्पति ?

..........................................................................................

५. शमीवृक्षे कैः आयुधानि रक्षितानि आसन् ?

..........................................................................................

६. उत्तरायाः विवाहः केन सह भवति ?

..........................................................................................

2. एतेषाम् उत्तराणां प्रश्नवाक्यं लिखन्तु -

१. त्रिगर्तनरेशः गोसम्पत्तिम् अपहर्तुम् आगच्छति ।

..........................................................................................

२. उत्तरः विराटस्य पुत्रः ।

..........................................................................................

३. सैरन्ध्री बृहन्नलाम् आनयति ।

..........................................................................................

www.thearyasamaj.org

४. ततः तौ श्मशानभूमिं गच्छतः ।

..........................................................................................

५. पाण्डवानाम् अज्ञातवासः समाप्तः भवति ।

..........................................................................................

## अवधेयम्

अस्मिन् पाठे नूतनानि अपि अव्ययानि प्रयुक्तानि सन्ति -

यथा - यद्यपि - तथापि          यदि - तर्हि

एतानि अपि नित्यसम्बद्धानि अव्ययानि । अतः एतेषां प्रयोगे अपि द्वयोः मिलित्वा एव (समानवाक्ये) प्रयोगः भवति ।

उच्चैः पठन्तु -

*यद्यपि - तथापि*

यद्यपि समुद्रे अधिकं जलं, तथापि न उपयोगाय ।
यद्यपि सः वृद्धः, तथापि धावति ।
यद्यपि सः राजपुत्रः, तथापि विनयशीलः ।
यद्यपि मरणं निश्चितं, तथापि जनाः तत् न चिन्तयन्ति ।

## अभ्यासः

1. उदाहरणानुगुणं वाक्यानि रचयन्तु -

उदा० - यद्यपि परीक्षा नास्ति, तथापि सः पठति ।

१. धनं नास्ति - दानं

.................................................................................... ।

२. बुभुक्षा नास्ति - खादति

.................................................................................... ।

३. ज्वरपीडितः - सेवाकार्यम्

.................................................................................... ।

४. शर्कराव्याधिः - मधुरम्

.................................................................................... ।

www.thearyasamaj.org

५. भानुवासरः - शीघ्रम्

............................................................................ ।

६. समयः नास्ति - कार्यं समापितवान्

............................................................................ ।

2. पूर्वं दत्तयोः शब्दयोः साहाय्येन उदाहरणानुगुणं वाक्यानि लिखन्तु -

१. विभीषणः - राक्षसः → यद्यपि विभीषणः राक्षसः, तथपि सः रामभक्तः ।

२. प्रह्लादः - राक्षसः → ........................................... ।

३. दुर्योधनः - चन्द्रवंशे जातः → ........................................... ।

४. रावणः - शिवभक्तः → ........................................... ।

५. आञ्जनेयः - वानरः → ........................................... ।

६. रामः - अवतारपुरुषः → ........................................... ।

७. कृष्णः - अवतारपुरुषः → ........................................... ।

८. भीष्मः - कौरवपक्षीयः → ........................................... ।

९. सुधीरः - पदवीधरः → ........................................... ।

१०. श्रीशः - वैद्यः → ........................................... ।

*यदि - तर्हि*

यदि भवान् योगासनं करोति, तर्हि शरीरं दृढं भवति ।

यदि ज्वरः अस्ति, तर्हि वैद्यं पश्यतु ।

यदि विद्युत् अस्ति, तर्हि दीपः ज्वलति ।

www.thearyasamaj.org

## अभ्यासः

### 1. रिक्तस्थानानि पूरयन्तु ।

१. यदि बुभुक्षा अस्ति, तर्हि खादतु ।
२. यदि पिपासा ..................................................
३. यदि ज्ञानम् आवश्यकम् ..................................................
४. यदि मित्रम् आगच्छति ..................................................
५. यदि दुःखम् अस्ति ..................................................
६. यदि अन्धकारः अस्ति ..................................................
७. यदि कष्टम् आगच्छति ..................................................
८. यदि उत्सवः अस्ति ..................................................
९. यदि दीनं पश्यामि ..................................................
१०. यदि आरोग्यम् आवश्यकम् ..................................................

### 2. उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु –

यथा – १. विद्युत् अस्ति । दीपः ज्वलति ।
यदि विद्युत् अस्ति, तर्हि दीपः ज्वलति ।

२. स्नानं न करोति । शरीरं मलिनं भवति ।
.................................................................. ।

३. कार्यालयस्य विरामः अस्ति । चलच्चित्रं पश्यामि ।
.................................................................. ।

४. आत्मविश्वासः अस्ति । सर्वं सुकरं भवति ।
.................................................................. ।

५. सर्वे सत्कार्यं कुर्वन्ति । देशस्य उन्नतिः भवति ।
.................................................................. ।

६. मूल्यं न्यूनम् अस्ति । फलानि क्रीणामि ।
.................................................................. ।

७. भवती विपणिं गच्छति । अहमपि आगच्छामि ।
.................................................................. ।

८. भवान् न पठति । परीक्षायाम् उत्तीर्णः न भवति ।
.................................................................. ।

www.thearyasamaj.org

९. छात्राः न सन्ति । कथं पाठं करोमि ?

.......................................................................... ।

१०. लोकयानं वेगेन न गच्छति । समये तत्र न प्राप्नुमः ।

.......................................................................... ।

3. रिक्तस्थानानि पूरयन्तु –

१. यदि अध्यापकः अस्ति, ........................ कक्ष्याम् उपविशामि ।

२. ..................... भवान् मधुरं खादति, तर्हि दन्ताः नश्यन्ति ।

३. यदि भवान् असत्यं वदति, .................... कः भवति विश्वासं करोति ?

४. यदि दैवम् अनुकूलकरं नास्ति, .................. कः किं वा कुर्यात् ?

५. .............. यानं शीघ्रं प्राप्यते, .................. पञ्चवादने आगच्छामि ।

६. ................. देशभक्तिः अस्ति, ............... कर्तव्यप्रज्ञा अस्ति, तर्हि समाजसेवां करोतु ।

4. यदि भवान् मन्त्री भविष्यति, तर्हि किं किं करिष्यति इति १० वाक्यानि लिखतु ।

उदा॰ - १. यदि अहं मन्त्री भविष्यामि तर्हि अधिकम् उद्योगं कल्पयामि ।

२. .......................................................................... ।

३. .......................................................................... ।

४. .......................................................................... ।

५. .......................................................................... ।

६. .......................................................................... ।

७. .......................................................................... ।

८. .......................................................................... ।

९. .......................................................................... ।

१०. .......................................................................... ।

## अन्यानि अपि कानिचित् अव्ययानि

*यावत् - तावत्*

उच्चैः पठन्तु -

नद्यां यावत् जलम् अस्ति, तावत् सरोवरे नास्ति ।
कर्णाटकं यावत् विशालं, केरलं तावत् विशालं नास्ति ।
एषा यावत् कार्यं करोति, तावत् अन्या न करोति ।

www.thearyasamaj.org

भीमस्य यावत् धैर्यम् अस्ति, तावत् अन्येषां नास्ति ।
मम भगिनी यावत् पठति, तावत् अहं न पठामि ।

**अभ्यासः**

रिक्तानि स्थानानि 'यावत्-तावत्' इति शब्दाभ्यां पूरयन्तु -

उदा०- १. मित्र ! सुरेशः कीदृशः ?
सः ....................... वदति .................... कार्यं न करोति ।
सः यावत् वदति, तावत् कार्यं न करोति ।

२. जनाः फलं कियत् प्राप्नुवन्ति ?
ते कार्यं ...................... कुर्वन्ति, फलं ...................... प्राप्नुवन्ति ।

३. कियद्दीर्घं भाषणम् आसीत् तस्य ?
.................... जनाः न उत्थितवन्तः ................. भाषणम् आसीत् तस्य ।

४. एषः सेवकः कथम् अस्ति ?
................. वदामः ............ एव करोति । ततोऽपि न किञ्चिदधिकम् ।

## अवधेयम्

'यावत्-तावत्' इत्येतत् युगलम् अवधिं (दैर्घ्यं, कालं च) सूचयति । 'यावत्,' इत्यस्य प्रयोगः कृतः चेत् 'तावत्' इत्यपि प्रयोक्तव्यम् एव ।

'चेत् - नो चेत्'

एतत् सम्भाषणम् उच्चैः पठन्तु -

मिलिन्दः - आगामिमासस्य कार्यक्रमस्य विषये चिन्तनम् एव न कृतम् । यदि एवम् एव दिनानि गच्छन्ति तर्हि...

नारायणः - मित्र ! चिन्ता मास्तु । यदि वयं सर्वे कार्याणि विभज्य स्वीकुर्मः, तर्हि न कोऽपि क्लेशः भवति ।

मिलिन्दः - यदि अस्माकं गोष्ठी भवति, तर्हि खलु कार्यविभागः ?

www.thearyasamaj.org

नारायणः - अस्तु मित्र ! अद्य एव गोष्ठी भवतु । आगच्छामि तावत् । यदि कार्यालयं विलम्बेन गच्छामि, तर्हि मम अधिकारी कुप्यति ।

मिलिन्दः - सायं मम गृहम् आगच्छति खलु भवान् ?

नारायणः - शक्यं चेत् सायङ्काले आगच्छामि । नो चेत् दूरभाषां करोमि ।

मिलिन्दः - शक्यं चेत् इति ?

नारायणः - आम् ! अद्य गणनापरिशोधकः अस्माकं कार्यालयम् आगतः अस्ति । सः प्रायः चतुर्वादने गच्छति । सः गच्छति चेत् अहं भवतः गृहम् आगच्छामि । नो चेत् ....

मिलिन्द - भोः ! कार्यक्रमस्वरूपविषये अद्य एव निर्णयं कुर्मः ।

नारायणः - अस्तु । शक्यं चेत् सायङ्काले मिलामः । नो चेत् श्वः प्रातःकाले मेलिष्यामः ।

मिलिन्दः - श्वः अरविन्दस्य समयः न भविष्यति चेत् ... ?

नारायणः - तर्हि अहम् अद्य रात्रौ अरविन्दस्य गृहमेव गच्छामि ।

मिलिन्दः - सः गृहे अस्ति चेत् समीचीनम् । नो चेत् ..... ?

नारायणः - नो चेत् उषसि पुनः गमिष्यामि । चिन्ता मास्तु भवतः ।

## अभ्यासः

### 1. उदाहरणानुगुणं वाक्यानि रचयन्तु -

उदा॰ - १. भवान् शीघ्रम् आगच्छतु । ...................... पिता तर्जयति ।
भवान् शीघ्रम् आगच्छतु । नो चेत् पिता तर्जयति ।

२. औषधं स्वीकरोतु । .............................. ज्वरः वर्धते ।

३. इच्छा अस्ति । ................................ भोजनं करोतु ।

४. परश्वः भवतः गृहम् आगमिष्यामि । ................... प्रपरश्वः ।

५. सम्यक् पठतु । ......................... उत्तीर्णता कथं प्राप्यते ?

६. सुरेशः आगच्छति । ............................ माम् आह्वयतु ।

७. उपविश्य पठतु । ............................ उत्थाय वा पठतु ।

८. वृष्टिः आगच्छति । ............................ मयूराः नृत्यन्ति ।

९. समयः अस्ति । .............................. भवान् आगच्छतु ।
................................ अनुजं प्रेषयतु ।

१०. विना शब्दं पठतु । ................... इतः निर्गच्छतु ।

www.thearyasamaj.org

# पत्रम् ४७

प्रियशिष्ये अश्विनि ! नवदेहली

शुभाशिषः । दिनाङ्कः - ३०.४.०७

अहम् अत्र कुशली । तवापि कुशलं कामये ।

त्वया प्रेषितं पत्रं प्राप्तवान् । जीवने किं किं प्रचलति, अग्रे त्वं किं कर्तुम् इच्छसि, भाविनी योजना च का इत्यपि ज्ञातवान् । त्वं स्नातककक्ष्यां प्रथमश्रेण्या उत्तीर्णवती इति ज्ञात्वा महान् सन्तोषः अनुभूतः । एतदर्थं हार्दाः शुभाशयाः ।

ग्रीष्मावकाशे त्वं परिवारजनैः सह ग्रामे वत्स्यसि इति उत्तमम् । तत्रापि त्वं अध्ययने संलग्ना भविष्यसि इति विश्वसिमि । जीवनस्य साफल्यम् अध्ययने एव निहितम् इति सर्वे जानन्ति एव । अध्ययनेन एव तव सर्वाः योजनाः सफलाः भविष्यन्ति इति निश्चितम् । परिश्रमेण च किं किं न साध्यते ? दृढनिश्चयः यदि अस्ति तर्हि किं असम्भवम् ? नेत्राभ्यां हीनः अपि श्रेष्ठकविः सूरदासः किं किं न रचितवान् ? वस्तुतः भगवतः कृष्णस्य दर्शनं सः एव कृतवान् । तस्य ग्रन्थाः अद्य शोधस्य विषयाः सन्ति । अन्यत् किञ्चिद् अपि वक्तुम् इच्छामि । त्वं विज्ञानस्य छात्रा । विज्ञानेन सह आध्यात्मिकविकसनम् अनिवार्यम् । एतदर्थं भगवद्गीता, उपनिषदः, स्मृतयः, रामायणं, महाभारतम् इत्यादयः ग्रन्थाः तव वैचारिकीं शक्तिं वर्धयिष्यन्ति । एतेषु ग्रन्थेषु सर्वविधविषयाः विराजन्ते । अतः तान् अपि पठ ।

महतः आनन्दस्य विषयः यत् त्वं संस्कृतसम्भाषणं शिक्षितुम् इच्छसि । वस्तुतः संस्कृतेन विना अस्माकं भारतीयत्वं पूर्णतां न याति । उपरि लिखितान् ग्रन्थान् त्वं संस्कृतसम्भाषणेन सरलतया प्रवेष्टुं शक्ष्यसि । अस्माकं विश्वप्रसिद्धाः – स्वामी विवेकानन्दः, रवीन्द्रनाथठैगोरः, महर्षिः अरविन्दः इत्यादयः राष्ट्रनायकाः बहून् विषयान् पठितवन्तः, किन्तु तैः विषयैः सह संस्कृतस्य अपि सम्यक् अध्ययनं कृतवन्तः । अश्विनि ! अग्रिमे मासे अहं स्वपुत्रेण सह चेन्नैनगरं गमिष्यमि । ततः आवां रामेश्वरम् इति प्रसिद्धं स्थानं गमिष्यावः । रामायणकाले श्रीरामः लङ्कां गन्तुं वानराणां साहाय्येन एकं सेतुं निर्मितवान् आसीत् । अहं रामायणे अपठं यत् ते वृक्षाः महाशिलाखण्डाः, लताः इत्यादिभिः वस्तुभिः तं सेतुं निर्मितवन्तः इति । सः सेतुः अधुना अपि समुद्रस्य अन्तः अस्ति इति 'नासा'केन्द्रस्य वैज्ञानिकाः चित्रेण दर्शितवन्तः सन्ति । अहं तस्य विषये शोधं कर्तुम् एव तत्र गमिष्यामि ।

तव ये प्रश्नाः संशयाः च भविष्यन्ति तान् अग्रे अपि मां सूचय । अहम् अपि यथोचितं सूचयिष्यामि । पुनः निरन्तरम् अध्ययनं कुरु । इति शुभाशयाः ।

तव गुरुः
गिरीशमिश्रः

www.thearyasamaj.org

# ४८ दशमस्त्वमसि

उच्चैः पठन्तु –

## *प्रथमं दृश्यम्*

(कस्यचित् गुरोः आश्रमः । गुरुः उन्नतस्थाने उपविश्य ध्यानमग्नः
अस्ति । दश शिष्याः प्रविशन्ति ।)

शिष्याः – आचार्य ! नमो नमः ।

गुरुः – *(नेत्रे उन्मील्य)* प्रियशिष्याः ! सर्वे आगताः किम् ?

शिष्यः – आं गुरो, वयं सर्वेऽपि आगताः ।

गुरुः – समीचीनम् । शिष्याः ! अद्य अनध्ययनम् अस्ति । भवतां पाठः नास्ति ।

प्रथमः – *(सन्तोषेण)* सत्यं वा ?

गुरुः – आम् । परन्तु अन्यदेकं कार्यं सूचयामि ।

द्वितीयः – किं तत् गुरो ?

गुरुः – वदामि, सावधानं शृण्वन्तु । पार्श्वस्थे ग्रामे अद्य रथोत्सवः प्रचलति । भवन्तः सर्वे तत्र गत्वा रथोत्सवं दृष्ट्वा सायङ्काले प्रत्यागच्छन्तु ।

तृतीयः – *(सन्तोषेण)* अहो भाग्यम् ! महान् सन्तोषः ! वयं सर्वे इदानीम् एव गच्छामः ।

सर्वे – गच्छामः, गच्छामः । *(सज्जाः भवन्ति)*

गुरुः – परन्तु बहुजागरूकतया गन्तव्यम् । यतः, अहं भवतां बुद्धिमत्तां जानामि ।

चतुर्थः – वयं बहुजागरूकाः भवामः गुरो !

गुरुः – भवतु । सर्वे मिलित्वा एव गच्छन्तु ।

पञ्चमः – तथैव अस्तु गुरो ।

गुरुः – *(स्वगतम्)* तथापि एतेषां मन्दमतीनां विषये इतोऽपि मम विश्वासः नास्ति । अतः एवं करोमि । *(प्रकाशः)* सर्वे पङ्क्तिशः तिष्ठन्तु ।
*(शिष्याः तिष्ठन्ति । गुरुः गणयति)*
एकं, द्वे, त्रीणि, चत्वारि, पञ्च, षट्, सप्त, अष्ट, नव, दश ...... । पश्यन्तु, भवन्तः दश जनाः सन्ति । मध्ये मध्ये परिशीलयन्तु, सर्वे आगताः वा, कोऽपि च्युतः वा इति ।

षष्ठः – अवश्यं परिशीलयामः गुरो ! वयं गच्छामः ।

गुरुः – शुभं भवतु ।
*(गुरुः गच्छति । शिष्याः सन्तोषेण नृत्यन्तः अन्यस्यां दिशि गच्छन्ति ।)*

www.thearyasamaj.org

## द्वितीयं दृश्यम्



प्रथमः - भोः, सर्वे शीघ्रम् आगच्छन्तु । नो चेत् विलम्बः भवति ।

सर्वे - आगताः भोः, आगताः ।

द्वितीयः - वयं सर्वेऽपि स्मः किल ।

सर्वे - स्मः । कः संशयः ?

तृतीयः - परन्तु मित्राणि, वयम् इदानीमेव एकां नदीं तीर्त्वा अग्रे आगतवन्तः । तत्र सर्वेऽपि नदीं तीर्णवन्तः वा इति मम संशयः ।

द्वितीयः - ममापि सः एव संशयः ।

चतुर्थः - अतः एव गुरुः उक्तवान् अस्ति, मध्ये मध्ये सर्वे सन्ति वा इति परिशीलयन्तु इति ।

पञ्चमः - सत्यम् । दश जनाः अपि स्मः वा इति इदानीम् एव परिशीलयामः ।

षष्ठः - मित्राणि, भवन्तः सर्वे पङ्क्तिरूपेण तिष्ठन्तु । अहं गणयामि । *(सर्वे तिष्ठन्ति)* इदानीं गणयामि । एकं, द्वे, त्रीणि, चत्वारि, पञ्च, षट्, सप्त, अष्ट, नव........!

प्रथमः - सत्यं खलु ..., दशमः कुत्र गतः ?

द्वितीयः - भोः, भवान् गणनां सम्यक् न जानाति । आगच्छतु, अहं गणयामि ...... एकं, द्वे, त्रीण, चत्वारि, पञ्च, षट्, सप्त, अष्ट, नव, .... ! सत्यमेव खलु.. ! नव जनाः एव सन्ति ।

www.thearyasamaj.org

चतुर्थः - तर्हि दशमः कः ? सः कुत्र गतः ?

पञ्चमः - अत्र एव स्यत् । एतेषु एव स्यात् । एतेषु दशमः कः ? दशमः कः ?

पथिकः - *(प्रविश्य)* भोः, कः कोलाहलः ? का समस्या भवताम् ?

पञ्चमः - भोः, गुरोः आदेशानुसारं वयं दश जनाः रथोत्सवार्थं प्रस्थिताः । इदानीं पश्यामः, नव जनाः एव स्मः । हा हन्तः ....! *(उच्चैः रोदिति)*

पथिकः - *(स्वगतं)* कथम् एवं वदति एषः ? *(मनसा एव सर्वान् गणयति । ) (प्रकाशः)* भोः, सर्वे सन्ति खलु ?

पञ्चमः - न हि, न हि... पश्यतु, अहमेव गणयित्वा दर्शयामि । एकं, द्वे, त्रीणि, चत्वारि, पञ्च, षट्, सप्त, अष्ट, नव । पश्यतु, नव जनाः एव स्मः । दशमः कुत्र गतः ?

पथिकः - *(हसन्)* मित्र, भवान् एव दशमः, यः दशमस्य अन्वेषणं करोति ।
*(सर्वे निष्कम्पाः तिष्ठन्ति । निरूपकः नेपथ्ये वदति ।)*

निरूपकः - मित्राणि... ! एषः एव लोकस्य व्यवहारः । एवमेव वयम् आत्मनः अन्वेषणं कुर्वन्तः भवामः । विषयः, देहः, इन्द्रियाणि, प्राणाः, मनः, बद्धिः, अहङ्कारः, चित्तम्, अज्ञानम् - इत्येतेषु अन्यतमः एव आत्मा स्यात् इति चिन्तयन्तः वयं तत्र एव तस्य अन्वेषणं कुर्मः । परन्तु वयं न जानीमः यत् यः अन्वेषणं करोति सः एव आत्मा । सः एव परमं ब्रह्म !!

*(पटाक्षेपः)*

## अभ्यासः

1. निर्देशानुसारं रूपाणि परिवर्त्य उदाहरणानुसारं लिखन्तु -

| पदानि | विभक्तिः | प्रथमान्तरूपाणि | एवं परिवर्तयन्तु | |
|---|---|---|---|---|
| अचार्य ! | सम्बोधनप्रथमा | आचार्यः | (ष.वि.) ए.व | आचार्यस्य |
| भवन्तः | प्रथमा | भवन्तः | (स.वि.) ब.व | भवत्सु |
| मित्राणि | ........... | .......... | (प.वि.) ब.व | ................ |
| मन्दमतीनां | ........... | .......... | (तृ.वि.) ब.व. | ................ |
| विषये | ........... | .......... | (द्वि.वि.) ए.व | ................ |
| वयं | ........... | .......... | (च.वि.) ब.व | ................ |

www.thearyasamaj.org

| | | | | |
|---|---|---|---|---|
| एतं | ............ | ........... | (ष.वि.) ए.व | .................... |
| मम | ............ | ........... | (स.वि.) ए.व | .................... |
| जनाः | ............ | ........... | (द्वि.वि) ब.व | .................... |
| बुद्धिमत्तां | ............ | ........... | (प्र.वि.) ए.व. | .................... |
| पथिकः | ............ | ........... | (द्वि.वि.) ए.व. | .................... |
| गुरुः | ............ | ........... | (तृ.वि.) ए.व | .................... |
| एतेषु | ............ | ........... | (च.वि.) ब.व. | .................... |
| भवतां | ............ | ........... | (प.वि.) ब.व. | .................... |
| विश्वासः | ............ | ........... | (ष.वि.) ए.व. | .................... |
| गुरोः | ............ | ........... | (स.वि.) ए.व. | .................... |

### 2. निर्देशानुसारम् उदाहरणानुगुणं वाक्यानि परिवर्तयन्तु -

उदा॰ - दश शिष्याः प्रविशन्ति । (लोट् लकारे) दश शिष्याः प्रविशन्तु ।

१. सर्वे आगताः किम् ? (ऌट्) ....................................

२. वयम् इदानीं गच्छामः । (ए.व.) ....................................

३. परन्तु अन्यदेकं कार्यं सूचयामि । (प्र.पु.) ....................................

४. सायङ्काले प्रत्यागच्छन्तु । (लट्) ....................................

५. अन्वेषणं करोति । (म.पु.) ....................................

६. सज्जाः भवन्ति । (लोट्) ....................................

### 3. एतानि अव्ययपदानि अधिकृत्य वाक्यानि रचयन्तु -

१. अपि - ........................................................................

२. अद्य - ........................................................................

३. आम् - ........................................................................

४. परन्तु - ........................................................................

५. तत्र - ........................................................................

www.thearyasamaj.org

६. एव - ..........................................................................
७. इदानीम् - ..........................................................................
८. न - ..........................................................................
९. खलु - ..........................................................................
१०. कुत्र - ..........................................................................

## 4. अङ्कैः सङ्ख्यां लिखन्तु -

| | |
|---|---|
| एकम् - | षट् - |
| द्वे - | सप्त - |
| त्रीणि - | अष्ट - |
| चत्वारि - | नव - |
| पञ्च - | दश - |

## 5. पाठात् क्त्वान्तानि, ल्यबन्तानि च अव्ययानि चित्वा वाक्यानि रचयन्तु -

१. ..........................................................................
२. ..........................................................................
३. ..........................................................................
४. ..........................................................................

## 6. उदाहरणानुगुणं क्रियापदं विभज्य वाक्यानि पुनः लिखन्तु -

| | | |
|---|---|---|
| उदाहरणम् - कार्यं सूचयामि | - | कार्यस्य सूचनां करोमि । |
| १. वयम् इदानीं गच्छामः | - | ........................................ । |
| २. गुरुः गणयति | - | ........................................ । |
| ३. कार्यं परिशीलयामः | - | ........................................ । |
| ४. दशमम् अन्वेषयति | - | ........................................ । |
| ५. निरूपकः नेपथ्ये कथयति | - | ........................................ । |

www.thearyasamaj.org

# बालाः श्रद्धया कथां शृण्वन्ति ४९

(भारतात् प्रवासार्थम् अमेरिकां गतः कश्चन अस्याः घटनायाः निरूपकः । अमेरिकायां भारतीये परिवारे निवासं कृतवता तेन तस्य परिवारस्य बालान् उद्दिश्य कथाकथनप्रयासः कृतः । सः प्रसङ्गः अत्र प्रदत्तः अस्ति । 'अपश्चिमः पश्चिमे' इति प्रवासकथनात् उद्धृतः भागः एषः ।)

विजयपल्लोडः कदाचित् मां निवेदितवान् - ''कृपया मम बालान् उद्दिश्य काश्चित् कथां कथयतु'' इति । कथाकथनं ममापि प्रियमेव । अतः अहं सन्तोषेण अङ्गीकृतवान् । तान् बालान् उपवेश्य सावधानं कथां कथितवान् । मम आङ्ग्लभाषाज्ञानं यद्यपि न उत्तमं, तथापि तत् कथाकथनाय अलम् इति मया अनुभूतम् । आञ्जनेयः कथं हनूमान् अभवत् इत्येषा कथा मया श्राविता । मम संशयः आसीत् यत् भारते इव अत्रापि बालाः श्रद्धया उपविश्य कथां शृण्वन्ति, उत न इति । परम् अत्रापि तथैव आसक्त्या शृण्वन्ति इति मया शीघ्रमेव अनुभूतम् । अत्रत्यानां बालकानां लोकज्ञानं किञ्चित् अधिकं भवति । अतः कथाश्रवणावसरे ते मध्ये मध्ये बहुविधान् प्रश्नान् पृच्छन्ति । यावत् तेषां समाधानं न प्राप्नुवन्ति तावत् तृप्ताः न भवन्ति ।

कथायां मध्ये मया उक्तम् - ''आकाशे स्थितं सूर्यं दृष्ट्वा आञ्जनेयः तं फलं चिन्तितवान् । अतः फलं ग्रहीतुम् उत्पतितवान् ...... ।''

''कपिः कथं उत्पतितुं शक्नोति ....... ?'' (How can a monkey fly ?) झटिति पृष्टवान् भरतः ।

'किं समाधानं वदामि' इति विचिन्त्य अहम् उक्तवान् - ''वायुदेवः आञ्जनेयस्य पिता । सः पुत्रस्य साहाय्यं कृतवान् । वायोः साहाय्येन सः आकाशम् उत्पतितवान् ।''

दैवात् भरतः सन्तुष्टः अभवत् । कथाम् अनुवर्तयता मया पुनः उक्तम् - ''यदा आञ्जनेयः सूर्यस्य समीपं गतवान्, तदा एव राहुः अपि सूर्यं ग्रसितुं तत्र आगतवन् । ....''

पुनः मध्ये भरतः पृष्टवान् - ''राहुः किमर्थं सूर्यं ग्रसते.... ?''

मया तन्निमित्तम् अमृतमथनस्य कथा अपि वक्तव्या अभवत् । तामपि उक्तवान् । राहुः किमर्थं सूर्यं द्विषति इति सकारणम् उक्तवान् । इदानीं तु बालः सन्तुष्टः अभवत् । तथापि सः उक्तवान् - ''मम अपरः प्रश्नः अस्ति....''

''पृच्छतु.....'' अहम् उक्तवान् ।

''राहुः यदि सकृत् सूर्यं ग्रसते तर्हि किञ्चित्कालानन्तरं सूर्यः कथं वा पुनः दृष्टिगोचरः भवति... ?''

www.thearyasamaj.org

मया पुनः व्याख्यानं कृतम् - ''ग्रसते इत्यस्य अर्थः मुखेन गिलति इति न स्यात् । तं गृहीत्वा, तदुपरि उपविश्य नानाप्रकारैः पीडयति इति स्यात् !''

मदीयं व्याख्यानं स्मृत्वा मया एव हासः अनुभूतः । तथापि भरतः समाहितः अभवत् ।

बालानां प्रश्नानां समाधानं यदि वदामः तर्हि ते निश्चयेनापि श्रद्धया कथां शृण्वन्ति एव इति मया अनुभूतम् ।

## अभ्यासः

1. कोष्ठके लिखितानि पदानि उदाहरणानुगुणं पृथक् कृत्वा लिखन्तु –

| |
|---|
| अतः कथं, अलम्, पृच्छतु, न, अहं, यदा, यत्र, किमर्थं, अभवत्, पीडयति, एव, इति, यदि, तर्हि, आगतवान्, वदसि, यत्, कृतवान्, परम् |

अव्ययपदानि

अतः..................................................................

.....................................................................

.....................................................................

क्रियापदानि

पृच्छतु ..............................................................

.....................................................................

.....................................................................

2. पाठात् क्त्वान्तं, ल्यबन्तं तुमुन्नन्तं वा पदं चित्वा एतानि वाक्यानि उदाहरणानुगुणं पूरयन्तु –

उदा – संस्कृतसम्भाषणम् उद्दिश्य संस्कृतभारती सम्भाषणशिबिराणि आयोजयति।

१. पितामहः बालान् .......................................... एकां कथां कथितवान् ।

२. बालाः अपि सावधानेन .......................................... कथां श्रुतवन्तः ।

३. निशायां आकाशे चन्द्रं .......................................... कः प्रसन्नः न भवति ?

www.thearyasamaj.org

४. आञ्जनेयः सूर्यं फलं .................................. आकाशम् उत्पतितवान् ।
५. आपणं .................................. वस्त्राणि क्रेतुं सर्वे सज्जाः आसन् ।
६. बालाः कुत्र ........................................................ न समर्थाः ?
७. वृक्षस्य उपरि .................................. वानराः किं किं न कुर्वन्ति ?
८. बालः कन्दुकं ........................................................प्रयत्नं करोति ।
९. पश्यन्तु कथम् एते बालाः सावधानम् ........................... वार्तां शृण्वन्ति ।
१०. अहं किञ्चित् .................................................. एव उत्तरं कथयिष्यामि ।

## 3. पाठात् अव्ययानि चित्वा एतां कथां पूरयन्तु –

कस्मिंश्चित् वने वृक्षस्य अधः एकः मूषकः वसति स्म । एकदा कश्चन शशः ............ आगत्य आनन्देन क्रीडति खादति च । अयं शशः प्रसन्नः अस्ति ........... चिन्तयित्वा मूषकः.......... प्रसन्नः अभवत् । सः .......... तेन सह क्रीडितुम् इष्टवान् । सः तथैव शशम् अकथयत् । ........ शशः गर्वेण उक्तवान् – भवान् कृष्णवर्णीयः । .......... अहं भवता सह .............. क्रीडिष्यामि । मूषकः स्वबिलं प्रविष्टवान् । एकदा एकः सिंहः आगतः । मूषकः ....... तत्रैव आसीत् । अयं शशः स्वस्थः स्थूलः च अस्ति .......... मूषकः कृशः, लघुः, मलिनः च ......... चिन्तयित्वा सः शशं खादितवान् । मूषकः रक्षितः । सः बिलं प्रविष्टवान् ।

## 4. निर्देशानुसारं वाक्यानि परिवर्तयन्तु –

१. विजयपल्लोडः मां निवेदितवान् । (लट्लकारे)
विजयपल्लोडः मां निवेदयति ।
२. बालाः श्रद्धया उपविश्य कथां शृण्वन्ति ।
................................................................ (एकवचने)
३. प्रश्नानां समाधानं न प्राप्नुवन्ति ।
................................................................ (लृट्लकारे)
४. दैवात् भरतः सन्तुष्टः अभवत् ।
................................................................ (लोट् लकारे)
५. आञ्जनेयः सूर्यस्य समीपं गतवान् ।
................................................................ (लङ्लकारे)

www.thearyasamaj.org

# ५० परिशिष्टम्

### अकारान्तः पुंलिङ्गः 'राम'शब्दः

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.वि. | रामः | रामौ | रामाः |
| सं.प्र.वि. | हे राम | हे रामौ | हे रामाः |
| द्वि.वि. | रामम् | रामौ | रामान् |
| तृ.वि. | रामेण | रामाभ्याम् | रामैः |
| च.वि. | रामाय | रामाभ्याम् | रामेभ्यः |
| पं.वि. | रामात् | रामाभ्याम् | रामेभ्यः |
| ष.वि. | रामस्य | रामयोः | रामाणाम् |
| स.वि. | रामे | रामयोः | रामेषु |

### उकारान्तः पुंलिङ्गः 'गुरु'शब्दः

| | | |
|---|---|---|
| गुरुः | गुरू | गुरवः |
| हे गुरो | हे गुरू | हे गुरवः |
| गुरुम् | गुरू | गुरून् |
| गुरुणा | गुरुभ्याम् | गुरुभिः |
| गुरवे | गुरुभ्याम् | गुरुभ्यः |
| गुरोः | गुरुभ्याम् | गुरुभ्यः |
| गुरोः | गुर्वोः | गुरूणाम् |
| गुरौ | गुर्वोः | गुरुषु |

### १.६. ऋकारान्तः पुंलिङ्गः 'पितृ'शब्दः

| | | |
|---|---|---|
| पिता | पितरौ | पितरः |
| हे पितः | हे पितरौ | हे पितरः |
| पितरम् | पितरौ | पितॄन् |
| पित्रा | पितृभ्याम् | पितृभिः |
| पित्रे | पितृभ्याम् | पितृभ्यः |
| पितुः | पितृभ्याम् | पितृभ्यः |
| पितुः | पित्रोः | पितॄणाम् |
| पितरि | पित्रोः | पितृषु |

### इकारान्तः पुंलिङ्गः 'हरि'शब्दः

| | | |
|---|---|---|
| हरिः | हरी | हरयः |
| हे हरे | हे हरी | हे हरयः |
| हरिम् | हरी | हरीन् |
| हरिणा | हरिभ्याम् | हरिभिः |
| हरये | हरिभ्याम् | हरिभ्यः |
| हरेः | हरिभ्याम् | हरिभ्यः |
| हरेः | हर्योः | हरीणाम् |
| हरौ | हर्योः | हरिषु |

### ऋकारान्तः पुंलिङ्गः 'कर्तृ'शब्दः

| | | |
|---|---|---|
| कर्ता | कर्तारौ | कर्तारः |
| हे कर्तः | हे कर्तारौ | हे कर्तारः |
| कर्तारम् | कर्तारौ | कर्तॄन् |
| कर्त्रा | कर्तृभ्याम् | कर्तृभिः |
| कर्त्रे | कर्तृभ्याम् | कर्तृभ्यः |
| कर्तुः | कर्तृभ्याम् | कर्तृभ्यः |
| कर्तुः | कर्त्रोः | कर्तॄणाम् |
| कर्तरि | कर्त्रोः | कर्तृषु |

### आकारान्तः स्त्रीलिङ्गः 'रमा'शब्दः

| | | |
|---|---|---|
| रमा | रमे | रमाः |
| हे रमे | हे रमे | हे रमाः |
| रमाम् | रमे | रमाः |
| रमया | रमाभ्याम् | रमाभिः |
| रमायै | रमाभ्याम् | रमाभ्यः |
| रमायाः | रमाभ्याम् | रमाभ्यः |
| रमायाः | रमयोः | रमाणाम् |
| रमायाम् | रमयोः | रमासु |

www.thearyasamaj.org

### इकारान्तः स्त्रीलिङ्गः 'मति'शब्दः

| | | |
|---|---|---|
| मतिः | मती | मतयः |
| हे मते | हे मती | हे मतयः |
| मतिम् | मती | मतीः |
| मत्या | मतिभ्याम् | मतिभिः |
| मत्यै/मतये | मतिभ्याम् | मतिभ्यः |
| मत्याः/मतेः | मतिभ्याम् | मतिभ्यः |
| मत्याः/मतेः | मत्योः | मतीनाम् |
| मत्याम् /मतौ | मत्योः | मतिषु |

### ईकारान्तः स्त्रीलिङ्गः 'गौरी'शब्दः

| | | |
|---|---|---|
| गौरी | गौर्यौ | गौर्यः |
| हे गौरि | हे गौर्यौ | हे गौर्यः |
| गौरीम् | गौर्यौ | गौरीः |
| गौर्या | गौरीभ्याम् | गौरीभिः |
| गौर्यै | गौरीभ्याम् | गौरीभ्यः |
| गौर्याः | गौरीभ्याम् | गौरीभ्यः |
| गौर्याः | गौर्योः | गौरीणाम् |
| गौर्याम् | गौर्योः | गौरीषु |

### उकारान्तः स्त्रीलिङ्गः 'धेनु'शब्दः

| | | |
|---|---|---|
| धेनुः | धेनू | धेनवः |
| हे धेनो | हे धेनू | हे धेनवः |
| धेनुम् | धेनू | धेनूः |
| धेन्वा | धेनुभ्याम् | धेनुभिः |
| धेन्वै/धेनवे | धेनुभ्याम् | धेनुभ्यः |
| धेन्वाः/धेनोः | धेनुभ्याम् | धेनुभ्यः |
| धेन्वाः/धेनोः | धेन्वोः | धेनूनाम् |
| धेन्वाम्/धेनौ | धेन्वोः | धेनुषु |

### ऊकारान्तः स्त्रीलिङ्गः 'वधू'शब्दः

| | | |
|---|---|---|
| वधूः | वध्वौ | वध्वः |
| हे वधु | हे वध्वौ | हे वध्वः |
| वधूम् | वध्वौ | वधूः |
| वध्वा | वधूभ्याम् | वधूभिः |
| वध्वै | वधूभ्याम् | वधूभ्यः |
| वध्वाः | वधूभ्याम् | वधूभ्यः |
| वध्वाः | वध्वोः | वधूनाम् |
| वध्वाम् | वध्वोः | वधूषु |

### ऋकारान्तः स्त्रीलिङ्गः 'मातृ'शब्दः

| | | |
|---|---|---|
| माता | मातरौ | मातरः |
| हे मातः | हे मातरौ | हे मातरः |
| मातरम् | मातरौ | मातॄः |
| मात्रा | मातृभ्याम् | मातृभिः |
| मात्रे | मातृभ्याम् | मातृभ्यः |
| मातुः | मातृभ्याम् | मातृभ्यः |
| मातुः | मात्रोः | मातॄणाम् |
| मातरि | मात्रोः | मातृषु |

### अकारान्तः नपुंसकलिङ्गः 'ज्ञान'शब्दः

| | | |
|---|---|---|
| ज्ञानम् | ज्ञाने | ज्ञानानि |
| हे ज्ञान | हे ज्ञाने | हे ज्ञानानि |
| ज्ञानम् | ज्ञाने | ज्ञानानि |
| ज्ञानेन | ज्ञानाभ्याम् | ज्ञानैः |
| ज्ञानाय | ज्ञानाभ्याम् | ज्ञानेभ्यः |
| ज्ञानात् | ज्ञानाभ्याम् | ज्ञानेभ्यः |
| ज्ञानस्य | ज्ञानयोः | ज्ञानानाम् |
| ज्ञाने | ज्ञानयोः | ज्ञानेषु |

www.thearyasamaj.org

इकारान्तः नपुंसकलिङ्गः 'वारि' शब्दः

| | | |
|---|---|---|
| वारि | वारिणी | वारीणि |
| वारि | हे वारिणी | हे वारीणि |
| वारि | वारिणी | वारीणि |
| वारिणा | वारिभ्याम् | वारिभिः |
| वारिणे | वारिभ्याम् | वारिभ्यः |
| वारिणः | वारिभ्याम् | वारिभ्यः |
| वारिणः | वारिणोः | वारीणाम् |
| वारिणि | वारिणोः | वारिषु |

उकारान्तः नपुंसकलिङ्गः 'मधु' शब्दः

| | | |
|---|---|---|
| मधु | मधुनी | मधूनि |
| हे मधो/हे मधु | हे मधुनी | हे मधूनि |
| मधु | मधुनी | मधूनि |
| मधुना | मधुभ्याम् | मधुभिः |
| मधुने | मधुभ्याम् | मधुभ्यः |
| मधुनः | मधुभ्याम् | मधुभ्यः |
| मधुनः | मधुनोः | मधूनाम् |
| मधुनि | मधुनोः | मधुषु |

दकारान्तः त्रिलिङ्गकः 'अस्मद्' शब्दः

| | | |
|---|---|---|
| अहम् | आवाम् | वयम् |
| माम्/मा | आवाम्/नौ | अस्मान्/नः |
| मया | आवाभ्याम् | अस्माभिः |
| मह्यम्/मे | आवाभ्याम्/नौ | अस्मभ्यम्/नः |
| मत् | आवाभ्याम् | अस्मत् |
| मम/मे | आवयोः/नौ | अस्माकम्/नः |
| मयि | आवयोः | अस्मासु |

दकारान्तः त्रिलिङ्गकः 'युष्मद्' शब्दः

| | | |
|---|---|---|
| त्वम् | युवाम् | यूयम् |
| त्वाम्/त्वा | युवाम्/वाम् | युष्मान्/वः |
| त्वया | युवाभ्याम् | युष्माभिः |
| तुभ्यम्/ते | युवाभ्याम्/वाम् | युष्मभ्यम्/वः |
| त्वत | युवाभ्याम् | युष्मत् |
| तव/ते | युवयोः/वाम् | युष्माकम्/वः |
| त्वयि | युवयोः | युष्मासु |

अकारान्तः पुंलिङ्गः 'सर्व' शब्दः

| | | |
|---|---|---|
| सर्वः | सर्वौ | सर्वे |
| हे सर्व | हे सर्वौ | हे सर्वे |
| सर्वम् | सर्वौ | सर्वान् |
| सर्वेण | सर्वाभ्याम् | सर्वैः |
| सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः |
| सर्वस्य | सर्वयोः | सर्वेषाम् |
| सर्वस्मिन् | सर्वयोः | सर्वेषु |

आकारान्तः स्त्रीलिङ्गः 'सर्वा' शब्दः

| | | |
|---|---|---|
| सर्वा | सर्वे | सर्वाः |
| हे सर्वे | हे सर्वे | हे सर्वाः |
| सर्वाम् | सर्वे | सर्वाः |
| सर्वया | सर्वाभ्याम् | सर्वाभिः |
| सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः |
| सर्वस्याः | सर्वाभ्याम् | सर्वाभ्यः |
| सर्वस्याः | सर्वयोः | सर्वासाम् |
| सर्वस्याम् | सर्वयोः | सर्वासु |

www.thearyasamaj.org

# संस्कृताय भवन्तः कृपया अधोनिर्दिष्टेषु पञ्चविंशत्यां कार्येषु कानिचन पञ्च कार्याणि कुर्वन्तु

१. 'वदतु संस्कृतम्' इत्यस्य पुस्तकस्य पञ्च प्रतिकृतीः क्रीत्वा पञ्चभ्यः जनेभ्यः ददातु ।
२. 'पत्राचारद्वारा संस्कृतशिक्षणम्' इति योजनायां पञ्च शिक्षार्थिनः योजयतु ।
३. सम्भाषणसन्देशपत्रिकायाः पञ्च ग्राहकान् सङ्गृह्णातु ।
४. पञ्चभ्यः जनेभ्यः संस्कृतभारत्यै धनसहयोगराशिं सङ्गृह्य ददातु ।
५. संस्कृतभारत्याः पञ्च पुस्तकानि क्रेतुं पञ्च जनान् प्रेरयतु ।
६. पञ्चसु स्थानेषु सम्भाषणशिबिराणाम् आयोजने साहाय्यं करोतु ।
७. वर्षे पञ्च दिनानि संस्कृतप्रचारकार्याय ददातु ।
८. पञ्चविधानि प्रचारपत्रकाणि मुद्राप्य ददातु ।
९. पञ्च संश्लेषकान् कारयित्वा मुद्राप्य च ददातु ।
१०. पञ्च संस्कृतशुभाशयपत्राणि कारयित्वा / मुद्रयित्वा ददातु ।
११. पञ्चसु विद्यालयेषु संस्कृतच्छात्रेभ्यः दानाय पञ्च पुरस्कारान् ददातु ।
१२. Pride of India इत्यस्य पुस्तकस्य पञ्च प्रतिकृतीः क्रीणातु विक्रीणतां वा ।
१३. पञ्चसु मन्दिरेषु संस्कृतभारत्याः प्रचारफलकानि स्थापयतु ।
१४. पञ्चानां प्रभावि-प्रतिष्ठित-जनानां कृते संस्कृतभारत्याः परिचयं कारयतु ।
१५. प्रचारार्थं पञ्च वस्त्रफलकानि कारयित्वा ददातु ।
१६. पञ्चानां विद्यालयानां ग्रन्थालयेभ्यः संस्कृतभारत्याः पुस्तकानां गुच्छान् ददातु ।
१७. प्रतिदिनं पञ्च रूप्यकाणि संस्कृतप्रचारकार्याय दानरूपेण दानपात्रे स्थापयतु ।
१८. प्रतिदिनं पञ्चभिः जनैः सह किञ्चित् किञ्चित् संस्कृतसम्भाषणं करोतु ।
१९. पञ्च जनान् संस्कृतं पाठयतु ।
२०. प्रतिसप्ताहं पञ्च नूतनजनान् दूरभाषया सम्पर्क्य संस्कृतभारतीं परिचाययतु ।
२१. संस्कृतकार्ये सहयोगाय पञ्च संस्थाः प्रेरयतु ।
२२. संस्कृतकार्यविषये पञ्च लेखान् लिखतु ।
२३. पञ्चभ्यः जनेभ्यः संस्कृतविषये पत्राणि लिखतु ।
२४. पञ्चसु स्थानेषु संस्कृतविषये, संस्कृतभारत्याः विषये च भाषणं करोतु ।
२५. उपायनदानसमये पञ्चसु प्रसङ्गेषु संस्कृतपुस्तकानि ददातु ।

www.thearyasamaj.org




# सम्भाषणसन्देशः

(बहुवर्णरञ्जिता संस्कृतमासपत्रिका) सरला भाषा, सुलभावगमनयोग्या ललिता शैली । कथा, विज्ञानं, भाषापाठनं, भाषाभ्यासः, राष्ट्रियचिन्तनं, शब्दसम्पत्तिः, सामयिकविचारः, आधुनिकाः समाचाराः- अन्येऽपि बहवः लेखाः ।

**वार्षिकं ग्राहकशुल्कम् रू0 ११०/-**

**द्वैवार्षिकं ग्राहकशुल्कम् रू0 २१०/-**

**त्रैवार्षिकं ग्राहकशुल्कम् रू0 ३००/-**

ग्राहकशुल्कं धनादेश(M.O) / डिमाण्ड् ड्राफ्ट्(D.D) द्वारा अधस्तनसङ्केताय प्रेषयन्तु -

Sambhashana Sandeshah
"Aksharam", Girinagar
Bangalore - 560 085
Ph : (080) 26722576 / 26721052

ISBN 818727636-3
9 788187 276364

रू. १३०/-

ISBN 978- 81-87276-36-3